MSS No. 311 Subject Religion

Name of MSS मार्कण्डय पुराण

Author

Period Folios 201A – 302

Script Sanskrit Source Prithi Pal Singh

Missing Folios 1 – 201

परंग्रीवायांजग्रहे अन्यंपादेनाक्रम्यापोथयन्ममर्द अन्यमसुरंसा हृदयपातेनसमचूर्णयत् तैर्मु
क्तान्यपि शस्त्राणितथास्त्राणिमहासुरैः मुखेनकालीजग्रहे दशनैर्मथितान्यपि तैर्महासुरैः मुक्ता
निशस्त्राणिपाद्यायुधानि अस्त्राणिवायव्यादीनिकालामुखेनजग्रहे अपितथादशनैर्मथितान्यपि वै
निचर्वितानि बलिनांतद्बलंसर्वमसुराणांदुरात्मनां ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तदा सा
देवीवलिनांदुरात्मनांतद्बलंसर्वंममर्दक्षोभयत् अन्यानभक्षयत् तथान्याननताडयत् प्रचक्रुः अ
सिनानिहताकेचित्केचित्खट्वांगताडिताः जग्मुर्विनाशमसुरादंताग्राभिहतास्तथा असिना
खड्गेणकेचिदसुरादेव्यानिहताः केचित्खट्वांगताडिताः संतः केचित् दंताग्राभिहताः संतोविनाशं
जग्मुः क्षणेनतद्बलंसर्वं असुराणांनिपातितं दृष्ट्वाचंडोभिदुद्राव तांकालीमतिभीषणां किंबहु
नात्तदसुराणांबलंक्षणेननिपातितंक्षयेन तद्दृष्ट्वाचंडः तांकालीमतिभीषणांभयानकाकृतिम
भिदुद्राबधावतिस्म शरवर्षैर्महाभीमैर्भीमाक्षीतांमहासुराः छादयामासचक्रैश्चमुंडःक्षिप्तैः
सहस्रशः चंडोमहासुरस्तांभीमाक्षीं कालीमहाभीमैः शरवर्षैः तथासहस्रशः क्षिप्तैः चक्रैश्चछा

दयामास तानिचक्राणपेतकानिविषमान्यानितन्मुखं वभुर्यथार्कविंवानिसुवहूनिघनोदरं ता
मार्कं॰ न्यमेकानिचक्राणपनेकानिविषमानानितन्मुखं वभुर्यथार्कविंवानि विषमानानिबभुः यथा
२-२ र्कविंवानुवहूनिघनोदरं अथवर्षविशंतिसंतिष्ठोभते ततोजहासातिरुषाभीमाभैरवनादि
202 नी कालीकरालवदनादुर्दर्शादशनोज्वला ततोनंतरंसाकालीअतिरुषाकोपेनभीमंरौद्रंजहा
साट्टहासंचकीदृशीभैरवनादिनीघोरस्वना अपरंकरालवदनाभैरवनानातथादुर्दर्शीदशनोज्व
लादुर्दर्शारौद्राठज्वलादशनादंतापस्यासा उत्थायचमहासिंहादेवीचंडमधावत ग्रहीत्वाचा
स्यकेशेषुशिरस्तेनासिनछिनत् सादेवीमहासिंहेतिकृत्वामहाखड्गमुत्थायोक्रूरचंडप्रत्यभिधा
वतत्तः केशेषुग्रहीत्वातेनासिनास्यचंडस्यशिरोछिनत् चकर्त अथमुंडोभ्यधावत्तांदृष्ट्वाचंडंनि
पातितं तमप्यपातयद्भूमौखड्गाभिहतंरुषा अथमुंडस्तांदेवीमभ्यधावत्किंकृत्वाचंडंनिपा २·२
तितं दृष्ट्वासादेवीरुषाकोपेनखड्गाभिहतमायुधविशेषः खड्गंतेनाभिहतंताडितंभूम्याव
पातयत् हतशेषंततःसैन्यंदृष्ट्वाचंडंनिपातितंदृष्ट्वाततोहतशेषंभयातुरंसाध्वसाकुलंसद्द

२०२A

क्षोभेजेदिक्षुविदिक्षुप्रदुद्राव शिरश्चंडस्यकालीचगृहीत्वामुंडमेवच प्राहप्रचंडाट्टहासमिश्रमभ्ये
त्यचंडिकां कालीदेवीचंडस्यमुंडस्यचशिरोगृहीत्वाभ्येत्यप्रचंडाट्टहासमिश्रंचंडिकाप्राह श्रीदेव्युवा
च महातावत्रोपहृतौचंडमुंडौमहापशू युद्धयज्ञेस्वयंशुंभंनिशुंभंचहनिष्यसि हेचंडिकेमयात्रतव
चंडमुंडौमहापशूउपहृतावुपहारितौआनीतौ अस्मिन्युद्धयज्ञेशुंभंनिशुंभंचत्वंस्वयंहनिष्यसि ऋषिरु
वाच तावानीतौततोदृष्ट्वाचंडमुंडौमहासुरौ उवाचकालींकल्याणीललितंचंडिकावचः तौचंडमु
डौमहासुरौआनीतौदृष्ट्वानिलोक्यकल्याणीकल्याणकारिणीचंडिकाललितसविलासंकालीदे
वीप्रत्युवाच यस्माच्चंडंचमुंडंचगृहीत्वात्वमुपागता चामुंडेतिततोलोकेख्यातादेवीभविष्यति सुगमं
व्याख्यानं इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येचंडमुंडवधोनामसप्तमोध्यायः
८१ ऋषिरुवाच चंडेचनिहतेदैत्येमुंडेचविनिपातिते बहुलेषुचसैन्येषुक्षपितेषुमहेश्वरः तुल्ययो
गताप्रतिपादनास्वंचकारक्षयं बहुलेषुसैन्येषुतयोर्घातात्क्षपितेष्वपिताहरकादित्वादिनच अथवा
क्षयप्राप्तान्तत्करोतितदाचष्टेइतिणिचतोनिष्ठा चंडेदैत्येनिहतेमुंडेचविनिपातितेसतितथाबहुले

मार्कं· २·रु

203

षुसैन्येषुद्रुतपितेषुद्रुयंनीतेषुसत्स्वसुरेश्वरः शुंभः ततः कोपपराधीनचेताः शुंभः प्रतापवान् उ
द्योगंसर्वसैन्यानां दैत्यानामादिदेसह कोपपराधीनमस्यवतं त्रंचचेतोयस्य शत्रोरधीनंचेतोयस्येतिवा
दैत्यानांयानिसर्वाणिसैन्यानितेषामितिपादपूरणेततोनंतरंमसुरेश्वरः शुंभोदैत्यासंबंधिनांस
र्वसैन्यानांमुत्साहमाहमज्ञापयत् कोपवशीकृतांतः करणःसप्रतापः अद्यसर्ववलैर्युक्ताः ष
उशीतिरुदायुधाः कंबूनांचतुराशीतिर्निर्यांतिस्वबलैर्युतः सर्ववलैसहितादैत्यानिर्यांतत्त्रउशी
तिः प्रधानभूताः तदायुधातद्यतास्त्राः कंबूनांकंवुनाम्निदैत्यकुलेजातानांचतुरशीतिचतुर्भि
रधिकाअशीतिः चतुराशीतिरिति पाठे आहअधिकास्य्यः कुलानीत्यत्रागिनिमपञ्जोकगताम
त्रापिसंबध्यतेसिंहावलोकिन्यायेन अथवाकंबूनांहस्तिनांदैत्याहस्तियोद्धारइत्यर्थः तदुक्तंकं
बुः स्याच्छंखगजयोः कोटिवीर्याणिपंचाशद्सुराणांकुलानिवै प्रातकुलानिधूम्राणांनिर्गंतुं २·२
तुममाज्ञया कोटिवीर्याणिकोटिवीर्यकुलोद्भवानिकुलानि निर्गच्छंतुकुलाद्दंदानिधूम्राणांधू
म्रवंशानांहेदैत्याममाज्ञयासुराणांकोटिवीर्याणिमहाबलानिपंचाशत्कुलानितथाधूम्राणां

203A

शतं कुलानि निर्गच्छंतु कुलानि जातिसंदोहः कालिका दौर्हृता मौर्याः कालिकेयास्तथासुराः युद्धाय
सज्जा निर्यांतु आज्ञया त्वरिता मम कालिकाः कालवंशजाः कालिकनामानो वा दौर्हृदाः दुर्हृदवंशजाः
दौर्मृता इति पाठे दुर्मृत्यैरपत्यानि दुर्मृतकुलसंभवाः मौर्यासुरवंश्याः कालेकेयाः कालकाया अपत्या
निस्त्रीभ्यष्टक्संज्ञाः ससामग्रीकाः सन्नद्धाश्च त्वरितास्संतः निर्यांतु आज्ञयेत्यत्र संधिर्न भवति वि
वक्षितत्वात् इत्याज्ञाप्यासुरपतिः शुंभो भैरवशासनः निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः अ
सुरपतिः शुंभो दैत्य इत्यादिविशेषणः स्वयं बहुभिर्महासैन्यसहस्रैर्वृतः महांति सैन्यानि येनास समुदायास्ते
षां सहस्रैः भैरवमुग्रं शासनमाज्ञा यस्य दारुणादेशः आयांतं चंडिका दृष्ट्वा तत्सैन्यमतिभीषणं
ज्यास्वनैः पूरयामास धरणीगगनांतरं आयांतमागच्छंतं शुंभं दृष्ट्वा किंभूतं तत्पूर्वोक्तं सैन्यं यस्य सः
तत्सैन्यस्तं तत्सैन्यं अथवा आयांतं शुंभं तत्सैन्यं च दृष्ट्वेति चकाराध्याहारेण योजनीयं आयातमिति
पाठे पाप्रापणे इत्यस्मात् नपुंसके भावे क्तः धरणीगगनयोरंतरं मध्यं गुणनिनादैः रोदसी पूरया
मास ततः सिंहो महानादमतीव कृतवान्नृपः घंटास्वनेन तं नादमंबिका चोपबृंहयत् अतीवात्त

र्थमनेकवारमित्यर्थः अंबिकावतान् सिंहस्ततान्नादानुपदं हयदवर्धयत् वृद्धिहिष्टौ छंदस्यमाङ्
मार्कं॰ योगेपीति छांदसः अत्रागमाभावः ततः सिंहोतिदुःसहसिंहनादंविदधे हे नृपांबिकाघंटास्व
२०४ नेनतंनादंवर्धयामास धनुर्ज्यासिंहघंटानांनादापूरितदिग्मुखा निनादैर्भीषणैः कालीजि
204 ग्ये विस्तारितानना धनुर्ज्येति स्वभावख्यापनमात्रंज्यापदेनैव धनुर्गुणप्रतीतेः धनुर्ज्यादीनां
निनादैरापूरितंदिशांमुखं ययासा निनादैः निजनादैः भीषणैः शत्रुभयानकैः जिग्ये जितवती
नादानित्यन्वयः आत्मनेपदं छांदसं अथवा नादापूरितदिङ्मुखापि कालीदेव्या धनुर्ज्यासिंहघं
टानांनिनादैर्जिग्ये इति कर्मन्यात्मनेपदं ततः कालीविरितानना सती भीषणैर्निनादैः जितिमि
तिज्ञगौ धनुषः सिंहस्य घंटानांच निनादैः पूरितंदिङ्मुखं ययासा तंनिनादमुपाश्रित्य दैत्यसैन्यै
श्चतुर्दिशं देवीसिंहस्तथा कालीसरोषैः परिवारिता चतसृणांदिशानांसमाहारश्चतुर्दिशं आ २०४
वंतादिशाष्टात्साधनीयमन्यत्र चतुर्दिगितिस्यात् दिक्षुविदिक्षु चेत्यर्थः सरोषैः सक्रोधैः दैत्यसै
न्यैर्देवीसिंहः पारिवारितोवेष्टितः कालीचपरिवारितेति लिंगव्यत्ययेन योज्यंपरिवारितेत्यपि

204A

त्कचित्पाठः शारोषैरितिस्थानेँघैरितित्कचित्पाठः एतस्मिन्नंतरेभूपविनाशायसुरद्विषां भवा
यामरसैन्यानामतिवीर्यवलान्विताः ब्रह्मेशगुहविष्णूनां तथेंद्रस्यचशक्तयः शरीरेभ्योविनिक्रम्य
तद्रूपैः चंडिकाययुः हे भूमे तस्मिन्नंतरे वसरे समये दैत्यानांविनाशायामरसैन्यानां भवायोदया
य अमरसिंहानां अमरश्रेष्ठानां भवायसंपदे चईशः शिवोगुहः कार्त्तिकेयः विष्णुशब्दोत्रवराह
नृसिंहावपिसंगृह्णेतेतेजः सामर्थ्यान्विताः शक्तयः स्वावितिरेकिन्यो देवताः ब्रह्मादीनामेवश
रीरेभ्यः सकाशाद्विनिक्रम्यतद्रूपैर्ब्रह्मादिसदृशाकारैरेवसाहाय्यार्थंचंडिकांभगवतींययुः ए
तदेवप्रकटयन्नाह यस्यदेवस्ययद्रूपंयथावाहनभूषणं तद्वदेवहितच्छक्तिरसुरान्योद्धुमाययौ
यथावाहनभूषणंभूषणवाहनानतिक्रमेणतद्वत्तथाविधायस्यब्रह्मादेः यादृशरूपंयद्भूषणं
यद्वाहनंतत्सर्वंप्रतिपद्यतस्यशक्तिरसुरान्योद्धुमभ्यायया वित्यर्थः यस्यदेवस्ययथायेनप्रका
रेणरूपवाहनभूषणादिः तस्यदेवस्यशक्तिस्तेनैवप्रकारेणतथाभूषणवाहनाअसुरान्योद्धुमाय
यौ तदेवव्याकुरुतेहंसयुक्तविमानस्थासाक्षसूत्रकमंडलुः आयाता ब्रह्मणःशक्तिर्ब्रह्माणी

205

साभिधीयते अग्रेउपरि अक्षसूत्रं जपमालिका ब्रह्माणं अनिति गच्छतीति ब्रह्माणी धातूनामने
कार्थत्वात् कर्मण्यण् ब्रह्माणी तत्र ब्रह्माण्याः शक्तिः हंसयुक्तविमाने स्थिता जपमालिकाक
मंडलुहस्ता सा शक्तिः ब्रह्माणी कथ्यते माहेश्वरी वृषारूढा त्रिशूलवरधारिणी महाहिव
लयाप्राप्ताचंद्रलेखाविभूषणा वरशाङ्कः क्रोष्टवचनः महाही महासर्पौ अनंततक्षकौ कंकणौ
यस्याः सा प्राप्ता प्राप्तवती महेश्वरी शक्तिः वृषभवाहना प्रधानत्रिशूलधरा महासर्पकंकणा चंद्र
कलाभरणप्राप्ता कौमारी शक्तिहस्ता च मयूरवरवाहना योद्धुमभ्याययौ दैत्यानि बिकागुह
रूपिणी कौमारी शक्तिः अंबिका विश्वमाता कार्त्तिकेयस्वरूपधरा शक्तिर्हस्ते यस्याः प्रहरणार्थे
भ्यः परनिष्ठा सप्तम्यो प्रधानमयूरारूढा दैत्यान्योद्धुमभ्याययौ तथैव वैष्णवी शक्तिः गरुडोप
रिसंस्थिता शंखचक्रगदाशार्ङ्गखड्गहस्ता भ्युपाययौ यज्ञवराहं यज्ञेनोपलक्षितं वराहं तद्रु २०५
क्रं वेदपादो यूपदंष्ट्रः क्रतुहस्तश्चितीमुखः अग्निजिह्वो दीर्घरोमा श्रीशीर्षो महातपाः इति हरेर्या
शक्तिरित्यन्वयः वाराही वराहाकारं मूर्त्तिं धारयंती शंखः पांचजन्यः चक्रं सुदर्शनं गदा कौमो

205A

दकः शार्ङ्गं शृंगविकारः यत्तु वाराहमतुलं रूपं याविभ्रता हरेः शक्तिसाप्यायये तत्रवाराही विभ्रती
तत्तु मूर्तं धनुः धनुषः साहचर्याद्बाणोप्यत्रोहनीयः खड्गो नंदकः एते हस्तेयस्याः ननु वैष्णव्याः शक्ते
ष्वनुभूतत्वात्कथं खड्गायुधधारकत्वेन षड्भुजत्वं उच्यते इति चेन्न वामनपुराणादस्याः षड्भुजत्वस्य प्र
तीतेः तथा च श्रूयते वाहुभ्यां गरुडारूढा शंखचक्रगदासिनी शार्ङ्गं वाराधरा जाता वैष्णवी रू
प शालिनी वाहुभ्यामिति पृथक् नरपतेतदास्य वाहुत्वामन्यथा षड्भुजत्वं अष्टवाहुपक्षे षड्गसा
हचर्याच्चर्माहननमपि न विरुध्यते तथाप्येकवाहुरिक्तत्वं दोष इति चेन्नामाहेश्वर्यादिवकायुधधारिक
त्वोक्तेरपरवाहुरिक्तत्वस्यादोषत्वात् अंगीकारात् अथवा शार्ङ्गं शाङ्गः शोभनवचनः खड्गो विशेषणात
यायोज्यस्तस्याश्चत्वार्येवायुधानीति चतुर्वाहुत्वेन विरुध्यते शोभने धनुर्धि शार्ङ्गो शोभनात यायो
ज्यस्तः श्वेतकेवगजे तथ्ये त्पुत्पलिनी अथवा शृंगशाङ्गे त्रदंतिदंतवाचकः तथा च तद्विकारमुष्टियु
क्तः आवरकोशो वा शार्ङ्गं स्तद्युक्तः अथवा धनुर्युक्तः खड्गा एकस्मिन्करे हरेः श्रीवासुदेवस्य वारा
हरूपं विभ्रतः सतः या शक्तिर्जज्ञे समुत्पन्ना सा शक्तिवाराही तनुं विभ्रती तत्राजगाम नारसिंही नृसिं

हस्यविभ्रतोसदृशंवपुः प्राप्तातत्रसटाक्षेपक्षिप्तनक्षत्रसंहति नारसिंहीशक्तिर्नरसिंहस्यसदृ
मार्कं शंशरीरंविभ्रतीसटानांकेसराणांस्कंददेशांवलानांवत्रसमंतात्तवः क्षेपः आक्षेपेनताडनेनवा
२·६ तेनक्षिप्ताइतस्ततः पातिताप्रेरितावानक्षत्राणांसंहतिः प्रकरोयवासा वज्रहस्तातथैवैंद्री
२०६ गजराजोपरिस्थिता प्राप्तासहस्रनयनायथाशक्रस्तथैवसा तथैंद्रीशक्तिर्वज्रायुधधारि
णीऐरावतपृष्ठेस्थितानेत्रसहस्रवतीयथादेवेंद्रस्तथैवेंद्रारूपधारिणीआगता ततःपरिवृत
स्ताभिरीशानोदेवस्यक्तिभिः हन्यताऽमसुराः शीघ्रंममप्रीत्याहचंडिकाईशानोमहादेवोदेवस्य
क्तिभिर्ब्रह्माण्यादिभिःसप्ताद्विभिःपरिवृतोवेष्टितोममप्रीत्याकृत्वाअन्यंतामितिचंडिकांकौ
शिकीमाहोकुर्वान् ततोदेवीशरीरांतुविनिक्रांतातिभीषणा चंडिकाशक्तिरत्युग्राशिवाशतनि
नादिनी ततः कौशिकीशरीरात्चंडिकाशक्तिस्तस्याश्चिंतीपामूर्त्तिः अत्युग्राचंडिकातोपिशत्रु २·६
शमनादौप्रचंडाशिवानांमृगाणांनिनादात्रस्पांसंतीति अथवाशिवस्यकल्याणस्यआसमंता
त्शातनिनादः असंख्यशाष्टोस्यामस्तीतितथा साचाहधूम्रजटलमीशानमपराजिता इतस्त्वं

206A

गच्छ भगवान् पार्श्वं शुंभनिशुंभयोः साऽपराजिता विष्णुशक्तिः ईशानं प्रत्याह धूम्रवर्णो जटा
शालिनं दूतो वार्त्ताहरस्त्वं ज्ञातो दूतत्वं तं गच्छ शुंभनिशुंभयोः तन्पार्श्वं गच्छ गच्छेति काकद्रुवन
मयसंवध्यते भगवंस्त्वं दूतो दूतत्वाया शुंभनिशुंभयोः पार्श्वं गच्छ ब्रूहि शुंभनिशुंभौ च दानवावति
गर्वितौ ये चान्ये दानवास्तत्र युद्धायसमुपस्थिता दूतस्त्वं शुंभनिशुंभौ चातिगर्वितौ दानवौ ब्रूहि
वदपे चान्ये तत्र दानवाः शुंभनिशुंभांतिके ये अन्ये तांश्च ब्रूहि त्रैलोक्यमिंद्रो लभतां देवाः संतु हवि
र्भुजाः यूयं प्रयात पातालं यदि जीवनिमिच्छथ हे दैत्याः त्रैलोक्यमिंद्रो लभतां देवा यज्ञभागभुजो भ
वंतु यूयं पातालं प्रयात अपुनरावृत्त्यै गच्छतु यदि जीवितुमिच्छवः अन्यथा जीवितुं नास्ति बलाव
लेपादथ चेद्भवंतो युद्धकांक्षिणः तदागच्छत तृप्यंतु मच्छिवाः पिशितेन वः बलगर्वाद्भवंतो द्रुका
ङ्क्षथ चेद्भवंतो युद्धकांक्षिणो वर्त्तंते अथ युद्धेन प्रयोजनं ततस्त्वागच्छत तत् स्वर्गगमनं किं न सेव्यति
यो ष्माकं पिशितेन मांसेन मच्छिवा मम सृगालिकाः शाकृयः तृप्यंतु यतो नियुक्तो दूत्येन तया दे
व्या शिवा स्वयं शिवदूतीति लोकेऽस्मिन्स्ततः साख्यातिमागता तयादेव्या शिवो महेश्वरः स्वयं दूत्ये

मार्कं॰ २०७ 207

नदूतत्वकारेणानदूतकर्मणावादूतवत्तिकूभगंवेनियप्रत्ययेनयद्यपिदूत्यमित्येवभवतितथा
पिब्राह्मणत्वादित्वानष्यञ्प्रहितः ततः सादेवीकाली अस्मिंल्लोके शिवाद्दूतीयस्मात्साशि
वदूतीवकुब्रीहिप्रश्नातोदात्तत्वादितिटीपू अथवाशिवंदूतंकरोतिइतिणिचूत्तिजंतात्कर्मण्य
णानतोटीप् केपिदेव्यावचःश्रुत्वाशिवाख्यातंमहासुराः अमर्षापूरिताजग्मुर्यत्रकात्याय
नीस्थिता तेनिशुंभादयोमहासुराः शिवेनकथितंदेव्यावचःश्रुत्वाकोपाविष्टास्तत्रजग्मुःय
त्रकात्यायिनीगौरीदेहजास्थितायतःकात्यायनीतिपादेसार्वविभक्तिकसप्तिलयत्रेत्यर्थःय
द्वाल्पजायेपंचमीयंदेशमाक्रम्यकात्यायनी(स्थितातंदेशमाजग्मुःयतोहेतोस्थितावायतोहेतोः
अमर्षेणक्रोधेनव्याप्ताः ततःप्रथममेवाग्रेशरशक्त्यृष्टिवृष्टिभिः ववर्षुरुद्धतामर्षास्तांदेवी
ममरारयः ततोमरारयोदैत्याअग्रेसंमुखेभूत्वाप्रथममादौशराणांशक्तीनांऋष्टीनामेकधा २०७
राशीनांवृष्टिभिस्तांदेवींववर्षुरितिकृद्दसोगुणाः ववृषुरित्यपिक्वचित्पाठः उद्धतामर्षाअत्यंत
क्रुद्धाः सावतान्प्रहितान्बाणान्शूलशक्तिपरश्वधान् चिच्छेदलीलयाध्मातधनुर्मुक्तैर्महे

207A

षुभिः सादेवीतैरसुरैःमुक्तान्बाणान्शूलशक्तिपरश्वधान्तंसशार्ङ्गंयद्धनुःतेनमुक्तैः टीका
रोधनुषःशार्ङ्गः आकर्णसंयुक्तचापच्युतैर्वामहेषुभिर्लीलयानिरस्तंतत् तयातस्याग्रतःकाले
शूलपातविपोथितान् खट्वाङ्गपोथितांश्चारीं कुर्वतीव्यचरत्तदा तस्याःकौशिकया अग्रतःइत्य
त्रमोभगोइत्यादिनायत्वेलोपःशाकल्येतिनथाग्रत इतिपाठस्तु काल्पनिकः पोथितान्मारिता
न्बाणाकुर्वतीसतीव्यचरत् कुर्वतीत्यत्रनुमागमश्छंदसःराकृतिगणत्वात्करणार्थःकुर्वधातुर्मै
वादिकः तस्येदंरूपमित्यन्येकुर्वतीपाठःकाल्पनिकः तस्याःकात्यायन्याअग्रतः कालिकाविच
चारअरीन्शूलपातविदारितान्खट्वाङ्गताडितांश्चकुर्वती कमंडलुजलाक्षेपहतवीर्यान्महौजसः
ब्रह्माणीचाकरोच्छत्रून्येनयेनस्मधावति कमंडलुजलाक्षेपेहतंवीर्यंतेषांतेन प्रकृत्यादिभिःतृती
याधावतिस्मेतियोगे अतीतेपिलडाब्रह्माणीयेनयेनप्रदेशेनमार्गेणवाधावततेनतेनशत्रून्तुच्छ
विधांश्चकारतेनसोकरोत्तु अतिकोपेनेतिसर्वत्रयोजनीयं ऐंद्रीकुलिशपातेनशतशोदैत्यदानवाः
पेतुर्विदारिताःपृथ्व्यांरुधिरौघप्रवर्षिणः ऐंद्रीवज्रप्रहारेणविदारिताःसहप्रसंख्यादितिजदनुजा

रुधिरस्यौघंप्रवाहं वर्षेनीत्येवंशीलाः पृथ्व्यामपतन् तुंडप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः वरा
मार्कं· हपूर्णोन्यपतंश्चक्रेणचविदारिता केचित्तुंडप्रहारेणायोत्रघातेनविध्वंसितास्ताडिताः केचिद्दंष्ट्रा
२८ ग्रेणाक्षतंविदारितंवक्षोयेषां नखैर्विदारितांश्चान्यान् नारसिंहीचचाराजौनादापूरितदिङ्मुखा
208 नारसिंहीशक्तिरभ्याच्काश्चिन्महासुरान्नखैस्पाटितान् भक्षयंतीसंग्रामेविललासनादेनापूर्णा
दिगाकाशौययानादेनापूरितंदिङ्मुखंययासा चंडाट्टहासैरसुराः शिवदूत्याविदूषिताः पेतुः
पृथिव्यांपतितांस्तांश्चखादाथसासुरान् चंडाउत्कराः सकोपावाऽऽटामहांतश्चयेहासास्तेशि
वदूत्याभिदूषिताः सर्वतोभीषितास्ततः पृथ्व्यांपेतुः पतितांस्तांश्चशिवदूतीनारसिंहीकालीचखा
दामक्षयत् इतिमातृगणंक्रुद्धंमर्द्दयंतंमहासुरान् दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैन्यकाः
इत्यनेनपूर्वोक्तेनप्रकारेणविविधैरभ्युपायैर्जलप्रक्षेपणादिभिः महासुरान्हिंसंतंमातृगणंदृष्ट्वा २८
असुरसेनायामुख्यानेशुरदर्शनंप्राप्ताः पलायताइत्यर्थः पलायनपरान्दृष्ट्वादैत्यान्मातृगणा
र्दितान् रक्तबिंदुर्यदाभूमौपतितस्यशरीरतः समुत्पततिमेदिन्यां तत्प्रमाणस्तदासुरः असम

208A

रक्तवीजस्यसमुत्पतत्युत्तिष्ठती मेदिन्यां इत्यधिकरणेसप्तमीपंचम्यंतपाठे त्व—— पेपंचमीमेदि
नीमाश्रित्योत्तिष्ठतीत्यर्थः समुत्पन्नोरक्तविंदुरेवप्रकृतित्वेनमेदिन्याः प्रकृतित्वाभावापादानत्वंस
रक्तवीजएवप्रमाणांयस्यतदातत्क्षणामेवपदास्यशरीरतोरक्तविंदुर्भूमौपततितदारक्तवीजएवप्रमा
णांयस्यतदारक्तवीजसमानोन्योसुरोमेदिन्यामुत्तिष्ठन्निरक्तवीजाकारमन्येषामुद्भवेकारणांयस्य
सः अतएवरक्तवीजः युयुधेसगदापाणिरिंद्रशक्त्यामहासुरः ततश्चैंद्रीस्ववज्रेणरक्तवीजमता
डयत् ततः समहासुरोगदापाणिः संनिंद्रशक्त्यासहयुयुधेततश्चैंद्रीस्ववज्रेणरक्तवीजमताडय
त्विव्यधे कुलिशेनाहतस्यास्यवक्त्रसुस्राव—णितं समुत्तस्थुस्ततोयोधास्तद्रूपास्तत्पराक्रमाः
कुलिशेनाहतस्यसतीवकुशोणितंसुस्रावतदातत्कालंततः स्रुतशोणितादितिवारक्तवीजसदृशा
रक्तवीजसमानवीर्यायोधाउत्थितवंतः यावंत्यः पतितास्तस्यशरीराद्रक्तविंदवः तावंतःपुरुषा
जातास्तद्वीर्यबलविक्रमाः तस्यरक्तवीजस्यशरीरस्थावत्योरक्तविंदवः पतितास्तावंतः पुरुषानवी
नाः जाताः तद्वद्रक्तवीजवद्वीर्यप्रभावः तेजोवाबलंशौर्यंशरीरं वाविक्रमः सामर्थ्यातिशयउद्यमश्च

मार्कं. येषांते तेषामपियुयुधुस्तत्र पुरुषाद्रक्तसंभवाः समं मातृभिरत्युग्रं शस्त्रपातातिभीषणं तेपिरक्तवी
२.९ जसंभवाः पुरुषाः शक्तिभिः समं सह अत्युग्रमत्युत्कटं यथास्यात्तथायथः शस्त्रपातस्तेनातिभयान
कं यथास्यात्तथायुयुधुरित्यन्वयः ॥ पुनश्च वज्रपातेन क्षतमस्य शिरो यदाः ववाह रक्तं पुरुषास्ततो जाताः स
209 हस्रशः ववाह सुस्राव संप्रसरणाभावश्छान्दसः वहगतावित्यस्य रूपं ववाह प्रयत्ने इत्यस्य धातू
नामनेकार्थत्वात् संप्रसारणं तु वहप्रापणे इत्यस्य वचादित्वात् प्राप्नोति नान्यस्य अत्र च वारक्तं व
व इत्याह्वतीव शरीराद्वेगेन निर्गच्छतो रक्तनात् वव इत्याकारः श्लिष्टो भवतीत्यर्थः ततो रक्तात्सह
स्रोसंख्याः पुनरपि वज्रप्रहारेण यदास्य शिर आहतं तदा रक्तं चकुगलतिस्म तत आहतस्य सतो योर
क्तौघो भूमौ पपात तेन शतशोऽसुरा उत्पन्नाः तैश्चासुरासृक्संभूतैरसुरैः सकलं जगत् व्याप्तमा
सीत्ततो देवाभयमाजग्मुरुत्तमं तैरक्तबीजस्य रुधिरसमुत्थैरसुरैः सकलं विश्वं व्याप्यते स्म रुधिरा २.८
त्सहस्रशः पुरुषा जाताः वैष्णवी समरे चैनं चक्रेणाभिजघान ह गदया ताडयामास ऐन्द्री तमसु
रेश्वरं समरे रणे एनमसुरेश्वरं चक्रेणाभिजघान गदया ताडयामास चक्र कथंभूतं इंद्र्याः इंद्रशक्तेः

209A

सकाशात् द्रुतं गतं अथवा तु मुलयुद्धे एकस्मिन्ननेकस्य शास्त्रसंपातः संभाव्यत इत्यैन्द्र्यपि गदया ता
डयामास अथवा गद्यते उच्यते अनपेति गदा वा कतया ताडयामास ताडयामास ऐन्द्री त्वविवक्षितत्वा
त्तु न संधिः वैष्णवी शक्तिरेनं रक्तवीजं सुदर्शनेन जघानैन्द्री तमसुरेश्वरं गदया ताडयामास वैष्णवी
चक्रभिन्नस्य ततः रुधिरस्रावसंभवैः सहस्रशः सहस्रेणेत्यर्थः संख्यैकवचनाद्वीप्सयामिति शसुस
हस्रसंख्याकैः तन्मात्रगौर्महासुरैर्विष्वं व्याप्तं शक्त्या जघान कौमारी वाराही च तथासिना माहेश्व
री त्रिशूलेन रक्तवीजं महासुरं कुमारः कार्त्तिकेयः तस्येयं कौमारी शक्तिः सा शक्त्या तं जघान तथा
राही असिना तं हंति स्म माहेश्वरी शक्तिस्तं त्रिशूलेनाहनत् स चापि गदया दैत्यः सर्वा एवाहनत्पृथ
क् मातृकोपसमाविष्टो रक्तवीजो महासुरः स रक्तवीजोपि क्रोधाकुलः सर्वा एव मातॄः पृथक् पृथगव
धीत् कीदृशो दैत्यः दितेः संभवः तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि पपात यो वै रक्तौघस्तेना
संख्यातशोसुराः तस्य रक्तवीजस्य बहुधा शक्तिशूलादिभिराहतस्य मतः यो रक्तौघो भूमौ निपातितेन
शतशोसुरा उत्पन्ना बभूवुः तैश्चासुरासृक् संभूतैरसुरैः सकलं जगत् व्याप्तमासीत् ततो देवा भयमा

जग्मुरुन्नमं तैरक्तबीजस्य रुधिरसमुत्पन्नैरसुरैः सकलं विश्वं व्याप्यते स्म ततस्तदनंतरं असुरैर्जग
मार्कं॰ द्व्यापनाद्धेतोर्वा उन्नममुत्कृष्टं निरतिशयं भयमाजग्मुः तान्विषण्णान्सुरान् दृष्ट्वा चंडिका प्राह स
२१० 210 त्वरा उवाच कालीं चामुंडे विस्तीर्णं वदनं कुरु प्रकर्षेण हन्यते हनने प्रवृत्तनागेन प्रयपौ प्राह ला
लसः इति स्कंदपुराणेपि प्राह लालसः संग्रामलालस एवोच्यते अतत वा चेत्यस्य न पुनरुक्तिः अथ
वासुरान् दृष्ट्वा तेषां प्रोत्साहनार्थं प्राह त्सत्प्रकर्षेण हृष्टा संहृतवती त्वरा त्वरावती अर्शआदिभ्यो
य अथवा त्वरा त्वरयेत्यर्थः नैरुक्तौ वर्णविनाशः क्विंवंत तृतीया वा अथवा व्याकुलान्सुरान्दृष्ट्वा
चंडिका प्राह स्वागतं ब्रूते ततः सत्वरा सती विस्तृतं वदनं कुर्विति कालेमुवाचेति योज्यं विस्तृतं वित
तं विस्तीर्णं वदनमिति त्वचित्यानासुरान्विषादं प्राप्तान्दृष्ट्वा चंडिका त्वर्थं जहास तदा प्राह सततत्
ततश्च कालीं प्रत्युवाच हे चामुंडे विस्तीर्णं वदनं कुरु मच्छस्त्रसंभूतान् रक्तबीजान्महासुरान् रक्त
विंदून्प्रतीच्छत्वं वक्त्रेनानेन वेगिता रक्तविंदून्प्रतीच्छत्वं वक्त्रेनानेन वेगिता रक्तविंदूकधरविप्रुषो २१
रक्तविंदोर्जातान्महासुरान्वक्त्रेण प्रतीच्छ गृहाणेत्यन्वयः रक्तविंदोरितिजात्यापेक्षयैकवचं

210A

नंजातानित्यपादानपंचम्याक्षिप्यते जायमानमहासुरप्रकृतित्वाद्वरक्तविंदोर्जनिकर्तुः प्रकृतिरित्य
रित्यनेनापादानत्वं अथवा रक्तविंदुभ्यो जातं नयस्य सरक्तविंदुः रक्तवीज उच्यते रक्तविंदु प्रति कारणत्वा
त्तु अनेन वा रक्तवीज एव रक्तविंदुशब्देनोच्यते कारणे कार्योपचारात् तस्य रक्तविंदून् वक्त्रेण प्रतीछ
कसंभूतान्महासुरान्कारणत्वात् अनेन भयानकया प्रसिद्धेन वेगितात्वरावती सती हे देवि त्वमने
न वक्त्रेण वेगिना वेगवता रक्तवीजान्महासुरात् मच्छस्त्रपातसंभूतान् रक्तविंदून् प्रतिगृहाण ए
वमेव द्वयं नीतः क्षीणरक्तो मां मिच्छति मद्भिमाणास्त्वया वोग्रा वोत्पत्स्यंति चापरे तदुत्पन्नान् र
क्तविंदुजातान् भक्षियंती सती रणे क्षीणरक्तः सन्नेष क्षयं गमिष्यति न चोत्पद्यंतीति परस्मैपदं छांद
सं एवं त्वया रक्ते पीते दैत्यो नीरुधिर क्षयं गमिष्यति तथा त्वया भक्ष्यमाणा अपरे नैवोत्पत्स्यंति ऋ
षिरुवाच इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तं मुखेन काली जगृहे रक्तवीजस्य शोणितं दे
वी चंडिका तां कालीमित्युक्त्वा ततः शूलेन तं रक्तवीजं अवधीत् ततः काली चामुंडा रक्तवीजस्य शोणि
तं वक्त्रेण प्रतीछति स्म जगृहे इत्युभयपदित्वादात्मनेपदं ततोसावाजघानाथ गदया तत्र चंडिकां

नचास्यावेदनां चक्रेगदापातोल्पिकामपि ततो हेतो रसौ रक्तबीजस्तत्र समये युद्धे वाधानंतरं ग
मार्कं· दयाचंडिकामाहतवान् स गदापातोस्याश्चंडिकाया अल्पिकामपि स्तोकमपि वेदनां पीडां न च
२२२ क्रेगदालग्नानाल्पापि तस्याहतस्य देहाद्बहु सुस्राव शोणितं यतस्ततस्तच्चक्रेण चामुंडासं
प्रयछति तस्य रक्तबीजस्य यतो यस्माद्देहान् देहांगात् तस्माद्देहांगात्तछोणितं चक्रेणाहृत्वासं
२११ प्रयति ददाति अर्थात् आत्मने चामुंडासंप्रतीछतीति पाठे गृह्णातीत्यर्थः अथवा यतः कार
णात् देहाछोणितं सुस्राव ततो हेतोस्तछोणितं चक्रेणासंप्रतीछतीति अपिपोऽप्यंयतो गछ
तस्तस्यांतिके चितु तस्य रक्तबीजस्याहतस्य सतः प्रचुरं रुधिरमगलत् यतस्ततो यत्र कुत्रापि प
तितेन तछोणितं चामुंडा संप्रतीछतिस्म जग्राह मुखे समुद्भता पि तस्या रक्तपातान्महासुरान् तांच
खादाथ चामुंडा पपौ तस्य च शोणितं समुद्भता जाताः ननु रक्तस्य भूमौ पाते सति असुरा जायं २२२
ते कथं तस्या मुखेऽसुरसंभवोऽस्तीति चेन्न मुखेपि पार्थिवांशस्य विद्यमानत्वेन दोषाभावात् उ
त्पद्यमानासुराभिप्रायेणैतानिति वहुवचनं रक्तपाताद्ये महासुरा अस्या मुखे समुद्गताः पाति

211A

नाः चामुंडाकालीतान्दैत्यानभक्षयत्रक्तवीजस्यशोणितंचपपौ देवीशूलेनवज्रेणवाणैरसि
भिरृष्टिभिः जघानरक्तवीजंतंचामुंडापीतशोणितं असिभिरित्यादिज्ञातौबहुवचनंऋष्टिभि
रेकधारखड्गै ---------------- देवीश्रीचंडिकाकाल्यापीतशोणितशूला
द्यैर्हंतिस्म सपपातमहीपृष्ठेशस्त्रसंघसमाहितः नीरक्तश्चमहीपालरक्तवीजोमहासुरः
हेमहीपालसुरघ्नेत्यामंत्रणंमहीपृष्ठेघसमाहतः सन्नीरक्तोभूत्वापपातदेव्याः शस्त्राणिदेवतास्व
रूपत्वात्प्राणस्वरूपाणिभवंतितेनसंघसर्थोनुजंतावरप्रयुज्यतेइतिकथमच्चेतनेसंघशब्द
प्रयोगइत्यपिनशंकनीयंसंघइववासंघः हेराजन्सरक्तवीजोप्रहरणसमूहेनव्याप्यादितोरुधि
ररहितस्सन्महीपृष्ठेपपात ततस्तेहर्षमतुलमवापुस्त्रिदशान्नृप तेषांमातृगणोजातोननर्त्तै
सृग्मदोद्धतः तेषांत्रिदशानांसंबंधितयाजातोमातृगणः अथवातेषांत्रिदशानांमध्येसृग्मदोद्ध
तोजातोननर्त्तेत्यन्वयः अथवातेषामसुराणामसृग्गवमदस्तेनोद्धतइत्यन्वयः यस्मिन्पक्षेमर्थ्य
सृक्शब्दस्यनित्यमापेक्षकत्वाततोनंतरंहेनृपतस्मिन्रक्तवीजेहतेसतिदेवानिरुपमंहर्षंप्रा

मार्कं·
२१२
212

रुधिरपानेनोद्धतो ब्रह्माणीप्रमुखो मातृगणश्चानृत्यत् इति देवीमाहात्म्ये टीकाद्वयसंग्रहे र
क्तबीजवधो नामाष्टमोऽध्यायः ८ श्रीराजासुरथ इत्युवाच विचित्रमिदमाख्यातं भगवन्
भवता मम देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितं इदं देव्याश्चरितस्य चेष्टितस्य माहात्म्य
मौदार्यं विचित्रं नानाप्रकारं आश्चर्यकरं व्याख्यातं कथितं यच्चाचरितं चेष्टितं माहात्म्यं प्रता
पातिशायितयोः समाहारो रक्तबीजवधाश्रितं भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते
चकार शुंभो यत्कर्म निशुंभश्चातिकोपवान् स्वामिन् रक्तबीजे निपातिते सति शुंभो निशुंभ
श्चातिकोपेन यत्कर्म चकार तत्पुनरपि श्रोतुमिच्छामि ऋषिरुवाच चकार कोपमतुलं रक्त
बीजे निपातिते शुंभासुरो निशुंभश्च हतेष्वन्येषु चाहवे रक्तबीजे निपातिते सति संग्रामे
न्येषु धूम्रलोचनादिषु हतेषु सत्सु शुंभे निशुंभश्चातुलं कोपं चकार हन्यमानं महासैन्यं वि २१२
लोक्यामर्षमुद्वहन् अभ्यधावन्निशुंभोऽथ मुख्ययासुरसेनया महासैन्यं हन्यमानं विलोक्य
क्रोधमुद्वहन् अभ्यधावदभिमुखं ययौ अपिशब्द इतरसमुच्चयार्थः मुख्यया प्रधानभूतया

२१२A

दैत्यसैन्यया सहस्रपलक्षितो वा सेनयास्म तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुरः संदष्टौ

ष्ठपुटाः क्रुद्धा देवीं हंतुमुपाययुः तस्य निशुंभस्याग्रे पृष्ठे च पार्श्वयोश्च महासुरा देवीं हंतुं समीप

माजग्मुः क्रुद्धाः अत्यंत सरोषाः अत एव कोपेन संदष्टौष्ठपुटोष्ठैस्ते आजगाम महासैन्यः शुंभो

पि स्वबलैर्युतः निहंतुं चंडिकां कोपात्कृत्वा युद्धं तु मातृभिः शुंभोपि स्वसैन्यैर्वृतः सन्कोपाच्चं

डिकां निहंतुमाजगाम मातृभिः सह युद्धं कृत्वा चंडिकां प्रत्यायंयो ततो युद्धमतीवासीद्देव्याः शुं

भनिशुंभयोः शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः एकत्वाद्देव्याः देव्या इत्येकवचनं शुंभ

निशुंभयोर्द्वित्वात्तयोर्द्विवचनं देव्येति तृतीयांतपाठे सहार्थे तृतीया सह शब्दयोगे पि ------

------ ततोनंतरं देव्याः शुंभनिशुंभयोश्चातीव युद्धमासीत् तत्रातीव शरवर्षमुग्रं बभूव

तत्र दृष्टांतः वर्षतोर्मेघयोरिवेति चिच्छेदास्तान् शरांस्ताभ्यां चंडिका स्वशरोत्करैः ताडयामास चां

गेषु शस्त्रौघैरसुरेश्वरौ चंडिका ताभ्यामस्तान् क्षिप्तान् देवी स्वशरसमूहैश्चिच्छेद शस्त्रौघैः शुं

भनिशुंभौ अंगेषु हस्तपादादिषु चाजघान निशुंभो निशितं खड्गं चर्म चादाय सुप्रभं अताड

मार्कं यन्मूर्द्धि सिंहं देव्यावाहनमुत्तमं निशितं दत्तप्रारणं चर्मफलकं शोभनाष्टभायस्य तद्वीदाय देव्या
वाहनोत्तमम्भूतं सिंहं मूर्ध्नि ताडयामास ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमं निशुंभस्याशु चि
२१२ च्छेद चर्म चाप्यष्टचंद्रकं वाहने सिंहे ताडिते सति वी चंडिका निशुंभस्योत्तममसिं खुरप्रेणास्त्रविशे
213 षेणार्द्धचंद्रेवाणाविशेषेण वा तथा च प्रयोगः दशाननश्चित्तः क्षुरप्रखंडितः इति तेनाष्टशशीद्धंत्र
ष्टचंद्रिकाचंद्राकाररचनाविशेषा यत्र तच्चर्म शास्त्रभरणं चाछिनत् छिन्ने चर्मणि खड्गे च शक्तिं
चिक्षेप सोसुरः तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागतां सा आर्या देवी तामपि शक्तिमभिमुखा
गतां चक्रेण द्विधाखंडां कृतवती कोपाध्मातो निशुंभोथ शूलं जग्राह दानवः आयांतं मुष्टिपा
तेन देवी तच्चाप्यचूर्णयत् अथ निशुंभः क्रोधेन प्रज्वालितः शूलं जग्राह देवी मुष्टिप्रहारेण शू
लो स्त्रीति द्विलिंगत्वेन शूलशब्दस्याभिधाने संगृहीतत्वात् आयांतं मुष्टिपातेनेति पाठः पुलिं २१२
शू गैलशब्दप्रयोगाभिप्रायेणेति ज्ञेयं शूलंमप्यायांतं चूर्णीचकार आकष्याथ गदां सोपि चिक्षे
प प्रति चंडिकां सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता आविध्य भ्राममपि त्वा आङ् विपूर्व

213A

स्य अजीवीतिवीभावेत्कृतेपीवर्णयोर्देवीवेव्योरितियेनाविभागादीकारलोपेरूपं अथवाशूलस्य
चूर्णीकृतवान् आविव्याध समंतात्पश्चितोभूत् व्यध दुःखसंचलनयोरित्यस्माल्लिट् आत्मनेपदा
भावश्छांदसः गयामपिविर्द्धेप आविध्येतिपाठेताडयित्वेत्यर्थः देव्याकर्शूलेनकारेणोनि
भिन्नाभस्मत्वमागताभस्मभूतेत्यर्थः देव्यास्त्रिशूलेनेतिषष्ठ्यंतपाठे देवीत्रिशूलेनेत्येकपदपा
ठेकर्त्तरितृतीयासोपिनिशुंभोगदमाकृष्यादायचंडिकांप्रतिस्वक्षेपगदापिदेव्यात्रिशूलेनभि
न्नासतीभस्मीबभूव ततः परशुहस्तंतमायांतंदैत्यपुंगवः आहत्यदेवीबाणौघैरपातयत
भूतले ततस्तंदैत्यपुंगवदैत्यमुख्यंपरशुर्हस्तेयस्यसः तंबाणौघैराहत्यभूतलेअपातयतपा
तयामासणिचश्चेत्यात्मनेपद तस्मिन्निपतितेभूमौनिशुंभेभीमविक्रमे भ्रातर्यतीवसंक्रु
द्धःप्रययौहंतुमंबिकां तस्मिन्भीमविक्रमेभ्रातरिनिशुंभेभूमौनिपतितेसतिशुंभोतीवक्रु
द्धःऽबिकांहंतुंप्रययौ सरथस्थास्तथात्युच्चैर्गृहीतपरमायुधैः भुजैरष्टाभिरतुल्यैर्व्याप्याशे
षंनभोबभौ ससुबलस्यापासामुद्रिकोकुटिलक्षणाप्रकारेणात्युत्कृष्टेज्ञातुपरमास्त्रैर्निरूपमै

प्रोंषमाकाशंव्याप्यप्रभातिस्मतदात्युच्चैरित्यपिक्वचित्पाठः तमायांतंसमालोक्यदेवीशंखम
मार्कं० वादयत् ज्याशब्दंधनुषश्चापिचकारातीवदुःसहं तंशुंभमायांतंसमालोक्यदेवीशंखंपूर
२१४ यामासनपुनर्द्धनुषश्चापस्यातीवदुःसहंटंकाररवंचकारधनुषइतिस्वभावत्वाख्यानंत्र
214 न्यत्रज्ञासंवंधाभावत् पूरयामासककुभोनिजघंटास्वनेनाहि समस्तदैत्यसैन्यानांतेजोवध
विधविधायिनां समस्तदैत्यसैन्यानांककुभोदिशइत्यन्वयः यासुदिक्षुदैत्यसैन्यानिस्थिता
नितादिशोनिजघंटास्वनेनपूरयामासेत्यर्थः तेजोवधविधायिनांतेजोवधकरशीलानांतेजो
वधविधायिनेतिपाठेस्वनविशेषणंतथाघंटास्वनेनसमस्तदैत्यसैन्यानांतेजोवधंविदधाती
त्येवंशीलेनककुभःपूरयामास ततःसिंहोमहानादैस्त्याजितेभमहामदैः पूरयामासगगनं
गांतथैवदिशोदश त्याजिताइभानांमदायैःगगनमाकाशंगांपृथ्वीदशदिशस्तावद्यास्ताएव २१४
उपदिशोपिदशव्याप्ताइत्यर्थः दिशामपिदशसंख्यापरिच्छेदः ननुदिशोदशैववर्त्तंतेकिंदशग्रह
णेनेतिचेत् उच्यते अपूर्वोद्भावनयेतिवत् दिशइत्युक्ताकादशेत्याकांक्षायामुपदिशइतियो

214A

ज्यंउपदिक्कसहितादिशाइतिमध्यमपदलोपेसमासोवाततोनंतरंसिंहोमहानादैः पृथिवीतथा
दशादिशः पूरयामासतत्सिंहनादंश्रुत्वादिरदाविमदाअभूवनित्यर्थः ततःकालीसमुत्पत्यग
गनंश्यामतायत् कराभ्यांतन्निनादेनप्रागासंस्तेतिरोहिता ततोनंतरकालीचामुंडासमुत्पनं
कृत्वाकराभ्यांगगनंक्ष्मांचाताडयततेनताडनशब्देनशब्दाप्रथममुत्पन्नातेसर्वेतद्धानंनीताःग
गनंसमुत्पत्योत्पत्यकराभ्यांक्ष्मांभूमिमताडयत्तन्निनादेनकरयोर्निनादेनतिरोहितापिहिताः
अट्टाट्टहासमशिवंशिवदूतीचकारह तैशब्दैरसुरास्त्रेसुःशुंभःकोपंपरंययौ अथशिवादूती
कालीअट्टाट्टहासंउच्चैर्हासंअशिवंभीषणंरौद्रंचकारतैरट्टाट्टहासशब्दैरसुरास्त्रस्तातद्भिविजिरे
शुंभोत्पर्थंकोपंययौक्रुद्धोजातः दुरात्मंतिष्ठतिष्ठेतिव्याजहारांबिकायदातदाजयेत्यभिहितं
देवैराकाशसंस्थितैः अंबिकायदादुरात्मंतिष्ठतिष्ठेतिकोपेवीप्साइत्युक्तवतीतदाकाशसंस्थि
तैर्देवीर्जयदेवीत्यूचे शुंभेनागत्ययाशक्तिर्मुक्ताज्वालातिभीषणा आयांतीवह्निकूटाभासा
निरस्तामहोल्कयाशुंभेनागत्ययांतीसतीउल्कापातेननिराकृताप्रकृतित्वादंबिकया शुं

भस्यसिंहनादेनव्याप्तं लोकत्रयांतरं निर्घातनिःस्वनो घोरो जितवानवनीपते लोकत्रयस्य भूर्भु
मार्कं. वःस्वर्लक्षणस्यांतरं मध्यं भुवोलोक इति यावत् अवनिपते हे सुरथ निर्वातनिःस्वन उत्पातध्वनि
र्जितवानर्थात्सिंहनादमातृगणस्य निर्वातध्व निर्जितवानर्थात्सिंहनादमातृगणस्य निर्घातध्व
२२५ निना शुंभस्य सिंहनादोभिभूत इत्यर्थः अथवा भावे क्तः जितं पराजयनं अभिभवोस्यास्तीति
815 जितवान् पराजयवान् परिभववान् पराभूत इत्यर्थः अथवा भावे क्तः जितं पराजयनं अभि
भवोस्यास्तीति जित्वान् पराजयवान् परिभववान् पराभूत इत्यर्थः अर्थात्सिंहनादेन कर्मणि
वाक्यांदसः कुर्वतिसिंहनादेनोत्पातध्वनिरपि जित इत्यर्थः अथवा सिंहनादेन सहित उत्पात
ध्वनिसंपूर्णलोकत्रयांतरं परिभूतवा इत्यर्थः शुंभस्य वीरध्वनिना त्रिभुवनमध्यं व्याप्तं हे सुर
थ सिंहनादेन घोरो निर्वातनिस्वनस्तिरोदधे शुंभमुक्तान् शरान् देवी शुंभस्तत्प्रहितान् शरा २२५
न् विच्छेद स्वशरैरुग्रैः शतशोथ सहस्रशः देवी श्रीचंडिका शुंभमुक्तान् शरांश्चिच्छेद शुंभोदे
व्याप्रहतान् शतसहस्रसंख्याकैर्बाणैरहिनत् ततः सा चंडिका क्रुद्धा शूलेनाभिजघान तं

सगदाभिहतोभूमौमूर्छितोनिपपातहसाचंडिकाक्रुद्धाशूलेनतंशुंभमताडयन्शुंभः तेनशू
लेनाभिहतः समूर्छांप्राप्तोपिवेगेनानिपपात ततोनिशुंभःसंप्राप्यचेतनामात्तकार्मुकः अज
घानशरैर्देवींकालीं ~~शिवदूतीं~~ केशरिणंततः ततःशुंभपतिनांतरंमूर्छानंतरंवानिशुंभश्चेतना
संप्राप्यकार्मुकमादायदेवींचंडिकांकालीशिवदूतीकेशरिणंचाहतवान् पुनश्चक्रान्यावा
हूनामयुतंदनुजेश्वरः चक्रायुतेनदितिजश्छादयामासचंडिकां पुनरपिदनुजेश्वरःशुंभःसह
स्रसंख्याकान्याहूत्वाचक्राणामयुतेनचंडिकांछादयामासयद्येवंदनुज --------
दितिजः ततोभगवतीक्रुद्धादुर्गादुर्गतिहारिणी चिच्छेदतानिचक्राणिस्वशरैःसायकांश्चता
न्दुःखेनगम्यतेज्ञायतेस्यात्सत्वमितिदुर्गाइतिशापिताआर्तिःपीडाअथवादुर्गसंकटेअद्रिसमुद्र
दौयाआर्तिस्तांनाशयतीतिदुर्गार्तिनाशिनीकर्त्तरिलुट् ततोटीपूनाशिनीतिपाठेतान्छील्पेति
निः ततोभवतीचंडिकाक्रुद्धासतीस्वशरैस्तानिचक्राणितनिष्ठ निशुंभप्रहितांश्चाच्छेत्सीत दुर्गा
विषयामार्तिपीडांहरतीत्येवंशीला ततोनिशुंभोवेगेनगदामादायचंडिकां अभ्यधावतवैहंतुं

दैत्यसैन्यसमावृतः गतोनंतरंनिशुंभोवेनगदामादायदितिजयतनापरिवृतश्चंडिकांहंतुमुपाद्रव
न्तस्यापततएवासुगदांचिच्छेदचंडिका खड्गेनशितधारेणासचशूलंसमाददे तस्याभिमुखमागा
मार्कं तएवंशीघ्रंतीक्ष्णधारेणगदांचिच्छेदततोनिशुंभः शूलंजग्राहस्तमापातंनिशुंभममरार्दनं हृदि
२१६ विव्याधशूलेनगदाविछेदनचंडिका देवनिसूदनंनिशुंभंशूलहस्तमगच्छत्तंदृष्ट्वावेगभ्रामितेन
216 शूलेनहृदिविध्यतिस्म भिन्नस्यतस्यशूलेनहृदयान्निःसृतोपरः महाबलोमहावीर्यस्तिष्ठेति
पुरुषोवदन् तिष्ठेतिवदनपरः पुरुषोहृदयान्निर्गतइत्यर्थः तस्यतिष्ठेतिप्रवदन् तस्यनिष्क्रांत
तोदेवीप्रहस्यस्वनवत्ततः शिरश्चिच्छेदखड्गेनततोसावपतद्भुवि तस्यपुरुषस्यनिर्गतः सतः श्री
चंडिकास्वनवत्सशब्दंयथास्यात्तथाप्रहस्यप्रकर्षेणहसित्वासशब्दमट्टहासंकृत्वास्वखड्गेनशिर
श्छेदततोसौपुरुषोभुविपपात ततःसिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् असुरांस्तांस्तथा २१६
कालीशिवदूतीतथापरान् ततःशिरश्छेदनांतरसिंहस्तानसुरानभक्षयवदुग्रदंष्ट्रा
भिः क्षुण्णाः समर्दिताः शिरोधराग्रीवायेतान् तथाकालीशिवदूतीचापरान्जघान कौमारी

216A

शक्तिनिर्भिन्नाः केचिन्नेशुर्महासुरा ब्रह्माणीमंत्रपूतेनतोयेनान्येनिराकृताः केचिन्महासुराः
कौमारीशक्तिनिर्भिन्नाः संतोनाशंप्राप्तवंतः केचिद्ब्रह्माणपाः शत्रोर्मंत्रपूतेनतोयेनविध्वस्ता
संतोविनष्टाः माहेश्वरीत्रिशूलेनभिन्नाः पेतुस्तथापरे वाराहातुंडघातेनकेचिच्चूर्णीकृताभुवि
ः माहेश्वर्यास्त्रिशूलेनभिन्नाश्चूर्णीकृताः सतोपरेकेचिद्वाराह्यस्तुंडघातेन चूर्णोभुविपतंतिस्म
खंडंखंडंचचक्रेणावैष्णव्यादानवाःकृताः वज्रेणऐंद्रीहस्ताग्रविमुक्तेनतथापरे वैष्णव्याशक्तिच
क्रेणदानवाःखंडशः कृताः ऐंद्रीहस्ताग्रविमुक्तेनान्येतिलशः कृताः केचिद्विनेशुः रसुराः के
चिन्नष्टामहाहवात् भक्षिताश्चापरेकालीशिवदूतीमृगादिपैः विनेशुः मृताः महाहवान्महा
संग्रामात्पातालंनष्टाः अपमृताः काल्पादिभिरपरेजीवंतएवभक्षिताः मृतभिर्मर्दिताः केचिद्दै
त्याः पातालंविविशुः केचित्संग्रामान्नेशुर्नष्टाः केचिच्चामुंडाचंडिकादिभिर्भक्षिताः इतिश्री
देवीमाहात्म्यटीकाद्वयसमुच्चयेनिशुंभवधोनामनवमोध्यायः ८२ ऋषिरुवाच निशुंभनि
हतंदृष्ट्वाभ्रातरंप्राणसंमतं हन्यमानंबलंचैवशुंभः क्रुद्धोब्रवीद्वचः प्राणानसहसम्पाद्भिर्नित

तुलितेजीवसममित्यर्थः प्राणवल्लभंतंप्रियंचभ्रातरंनिशुंभंनिहितंदृष्ट्वाशुंभः क्रुद्धः सन्वचन
मब्रवीत् बलावलेदुष्टेत्वंमादुर्गेगर्वमावह अन्यासांबलमाश्रित्ययुध्यसेचातिमानिनि
मार्कं २१७ 217 बलेनयोबलेयोगर्वस्तस्मात्‌हेदुष्टेदुर्विनीते अन्यासांबलमाश्रित्यया अतिमानिनीमहा
हंकारवतीत्वंयुध्यसेमात्वंगर्वमावहः माकुरुयतोबलाभावादित्यर्थः युध्यसेचातिमानिनी
तिपाठेतुकष्टाध्याहारविनैवयोजनाकिमुवाचेत्याह हेदुष्टेदुर्गेचंडिकेदर्पाश्रयाज्ञुर्वंमाकुरु
अन्यासांब्राह्मण्यादीनांमातृणांबलमाश्रित्याभिमानवती अहंकारिणी श्रीदेव्युवाच ए
कैवाहंजगत्यत्रद्वितीयाकाममापरा पश्यैताद्दुष्टमय्येवविशंत्योमद्विभूतयः एकासजातीय
विजातीयस्वगतभेदहीनाअत्रजगतिममापराव्यतिरिक्ताद्वितीयानकापीत्यर्थः केतिकिंशब्द
श्चाक्षेपेणनुत्वद्व्यतिरिक्ताश्चयो ब्रह्माण्याद्याः प्रत्यक्षसिद्धाइतिकथंतदपलापइत्याशंक्या २१७
नुभूयमानस्यभेदस्यकाल्पनिकत्वेनाप्युपपत्तेर्नवास्तवत्वसिद्धिरित्याशयेनाहपश्यैतिएता
ब्रह्माण्याद्याममद्विभूतयोममशक्तयः संपतयोवामय्येवंविशंत्यतः संतीतिपश्य अथवाद्विती

217A

यार्थेक्ष्वादसीप्रथमामप्येवविश्रांतीः पश्यप अतोभेदस्यप्रसक्त्यापालत्वादेकैवाहमितिसिद्धंहेदुष्टा
त्ररत्नोएकैवाहंवर्त्ते ममापराद्वितीयाकास्तिममैवशक्त्यश्रयं मय्येवविश्रांत्यस्तत्वयाद्रष्टपतां ततःस
मस्तास्तादेव्योब्राह्मणीप्रमुखालयं तस्मादेव्यास्तनौजग्मुरेकैवासीतदांबिका ततोनंतरंताः
समस्ताब्रह्माणीप्रमुखास्तनोशरीरेलयमाश्लेषं अपृथगावंजग्मुरित्यन्वयः वपुषिलीनावभू
वुरित्यर्थः तदांबिकाएकैवासीत् देव्युवाच अहंविभूत्याबहुभिरिहरूपैर्यदास्थिता तत्संह
तंमयैकैवतिष्ठाम्याजौस्थिरोभव अहमिहजगतिस्थानेवास्वविभूत्यानिजमहिम्नाबहुधीरूपै
र्यदास्थिता वस्थानंप्राप्तामपातत्सर्वसंहृतंअधुनाहमेकैवाजौतिष्ठामित्वंस्थिरोभव ततःप्रव
वृत्तेयुद्धंदेव्याशुंभस्यचोभयोः पश्यंपतिसर्वदेवानांमसुराणांचदारुणं अनादरेषष्ठीपश्यतःस
र्वदेवानसुरानसुरांश्चानादृत्येत्यर्थः ततोदेव्याःशुंभस्यचोभयोः सर्वदेवानांपश्यतांघोरंयुद्धंप्रव
र्त्ततेस्म शरवर्षैःशितैः शस्त्रैस्तथास्त्रैश्चैवदारुणैः तयोर्युद्धमभूद्भूपः सर्वलोकभयंकरं त
योरंबिकाशुंभयोर्वाणावृष्टिभिः तीक्ष्णैरायुधैस्तथादारुणैरस्त्रैराग्नेयंवारुणेनवारुणंवायव्ये

नवायव्यं सार्पेण सार्पं गारुडेन गारुडं वैष्णवेन एवमस्त्रैरस्त्राणि निघ्नतोस्तयोर्युद्धमभूद्ध्वतोयु
मार्कं॰ द्धात्त्रिलोकलोकान्संस्थिताः भूयोमहत् पुनर्वा दिव्यान्यस्त्राणि शतशोमुमुचे यान्यर्थाविका
२१८ बभंजेतानि दैत्यन्प्रतीकारकर्तृभिः यानि दिव्यान्यस्त्राणि मुमोचतेषां प्रतीघातं कुर्वतीति
तत्प्रघातकर्तृणितैरस्त्रैरिति विभक्तेर्विपरिणामेन पुनरस्त्रशब्दस्यान्वयः प्रतीघात उपसर्गस्य
218 घन्मनुष्ये बहुलमिति दीर्घः अर्थाविकायानि दिव्यानि ऽस्त्राणि मुमुचे अस्त्राणां पूर्वोक्त
विधिना प्रतीकारकैः पत्यस्त्रैस्तानि पातशोऽम्बमनक् मुक्तानि तेन चास्त्राणि दिव्यानि परमे
रो॰ह्वा श्वरी बभंज लीलयैवोग्रहुंकारणादिभिः तेनप्युंभेन दिव्यान्यस्त्राणि मुक्तानि परमेश्वरी ली
लया अनयासेन उग्रमिति भिन्नपदे क्रियाविशेषणं उत्कं उत्कटं यथास्यात्तथा बभंज उग्रहुंका
रेत्येकपदं पाठेउग्रापि हुंकारोच्चारणादयउपायास्तैरिति योज्यं ततः शरशतैर्देवीमाच्छादयत २१८
सोसुरः सापितत्कुपिता देवी क्रुद्धनुष्विछेद चेषुभु ततः शरैः शतैः सोसुरो देवीमिदधातिस्मसा
पितस्मिन्कुपितावाणेश्चापि छिन्नवती तदित्यव्ययं तस्येत्यर्थः छिन्नेधनुषि दैतेन्द्रस्तथा प्र

218A

क्तिमुपाददे चिच्छेददेवीचक्रेणतामप्यस्यकरेस्थितं तथानेनप्रकारेणधनुषिछिन्नेसतिदैत्ये
न्द्रः शक्तिंजग्राह चंडिकास्यकरस्थितांतामपिशक्तिंचक्रेणाहतंतिस्म ततः खड्गमुपादायशतचं
द्रंचभानुमत् अभ्यधावततोदेवींदैत्यानामधिपेश्वरः दैत्यानांअधिपाःशुंभादयस्तेषामपीश्व
रः अधिपश्चासावीश्वरश्चेतिवाशतचंद्रं कृत्रिमचंद्रशतान्वितंचंद्रशतविरचितंवदीप्यमानंच
र्मचोपादायभानुमत्रश्मिमत्भानूरश्मिदिवाकरावित्यमरः तेजस्विदित्यर्थोगृहीत्वादापत
दादेवींचंडिकांधावतिस्म तस्यापततएवाशुखड्गंचिच्छेदचंडिका धनुर्मुक्तैः शितैर्बाणैश्चर्मचा
र्ककरामलं चंडिकातस्यशुंभस्यागच्छतएवधनुर्मुक्तैः स्तीक्ष्णैर्बाणैः खड्गंसूर्यरश्मिवनिर्मलं
चर्मचचिच्छेद अश्वांश्चपातयामासरथंसारथिनासह हताश्वःसतदादैत्यश्छिन्नधन्वाविसा
रथिः अश्वांश्चपातयामासरथंसारथिनासहेतिपदार्थःकश्चिन्नास्तितत्रहताश्वइत्यादनंतस्मिं
नवसरेअस्यादिवधोप्यनुमीयतेकेचित्त्वश्ववधस्यानुक्तत्वात्रथाहताश्वइतिस्थानेहतासि
रितिपठंतितन्मंदंविसारथिरितिनियामकस्यविद्यमानत्वेनहताश्वइतिपाठस्यार्थत्वप्रतीतेः सा

देवीतस्यदैत्यस्याश्वान्पातयामाससारथिनासहरथमपातयत्ततः सदैत्योहततुरगः छिन्नचापः
मार्क. सारथिसहितोबभूव जग्राहमुद्गरंघोरंचंडिकानिधनोद्यतः चिच्छेदापततस्तस्यमुद्गरंनिशि
२१९ तैःशरैः ततःशुंभश्चंडिकायानिधनायोद्यमपरः सन्रौद्रंमुद्गरंअपोत्गुडंजग्राहतस्याग
219 च्छतः सतोदेवीप्रकृतत्वाउद्यम्यप्रहाराभिमुखंकृत्वाशरैःमुद्गरंछिन्नंतिस्म तथापिसोभ्यधा
वत्तांमुष्टिमुद्यम्यवेगवान् समुष्टिंपातयामासहृदयेदैत्यपुंगवः देव्यास्तंचापिसादेवीत
लेनोरस्यताडयत् मुद्गरेछिन्नेपितथापिसशुंभोमुष्टमुद्यम्यवेगेनतांचंडिकांप्रतिधावतिस्म
सदैत्यपुंगवः तंमुष्टिंदेव्याहृदयेपातयामासपुमांश्चासौगौश्चेतिगोरंतद्धितलुकीतिटिपूरुर
सितलेनकरतलेनचपेटोनाजघान सपिंडितांतांगुलिर्मुष्टिःप्रसृतिःकुंचितांगुलिःप्रसारि
तांगुलिःपाणिःकथ्यतेप्रतलस्तलहेडस्थपुटस्त्वंआहतिन तलप्रहाराभिहतोनिपपातमहीत २१९
ले सदैत्यराजःसहसापुनरेवतथोत्थितः सदैत्यतलप्रहाराभिहतःसन्महीतलेमस्यांतलंवा
धःस्वरूपयोरितिनामानुशासनात्पतितःसन्पुनस्तत्क्षणादेवोत्थितः उत्पत्यचप्रगृह्योच्चैर्दे

219A

वीगगनमाश्रितः तत्रापिसानिराधारायुयुधेतेनचंडिका सशुंभः उच्चैरत्यर्थंततस्तयोर्ध्वंगत्वादे
वीप्रगृह्योच्चैस्तारंचगगनमास्थितोधिरूढः सादेवीतत्रापिगगनेपिनिराश्रया------
---- चक्रतुःप्रथमंयुद्धंमुनिविस्मयकारणं तदादैत्यश्चंडिकाचनियुद्धंबाहुयुद्धंखेव्योम्निच
क्रतुरितिकर्मव्यतिहारेसत्यपिनात्मनेपदंपरस्परशब्दयोगेनिषेधात्कीदृशंप्रथमंअभूतपूर्वं
अतएवसिद्धमुनिविस्मयकारकंसिद्धादेवयोनिविशेषाः मुनयोमननशीलामरीच्यादयः सिद्ध
पदस्थानेयुद्धमितिक्वचित्पाठः सप्रामादिकः प्रामाणिकैरव्याख्यातत्वात् तस्मिन्कालेदैत्य
श्चंडिकाचबाहुयुद्धंखेव्योम्निचक्रतुरितिकर्मव्यतिहारेसत्यपिनात्मनेपदंतत्प्रथमंपरमंयुद्धंमु
निविस्मयकारणंबभूव ततोनियुद्धंसुचिरंकृत्वातेनांबिकासह उत्पाट्यभ्रामयामासचिक्षेप
धरणीतले ततोंबिकातेनसहसुचिरंनियुद्धंकृत्वा उत्पाट्य ऊर्ध्वंनीत्वा उत्पाट्येतिपाठेतोलयित्वेत्य
र्थः भ्रामयामासेत्यत्रसंज्ञापूर्वकोविधिरनित्यइतिमित्त्वाभावेनह्रस्वभावः तदनुभ्रामयित्वा
धरणीतलेधरण्यांअधः स्वरूपयोस्तलंचिक्षेपचेतिविनापिचकारंचकारार्थोवगंतव्यः सहि

सोधरणीं प्राप्यमुष्टमुद्यम्यवेगितः अभ्यधावतदुष्टात्माचंडिकानिधनोद्यतः सशुंभः छिन्नः
मार्कं. सन्पृथ्वींप्राप्यमुष्टिमुद्यम्यवेगितोवेगयुक्तः सन्वेगिशब्दात्तत्करोतीत्यर्थेणिजंतात्क्तः
२२. सदुष्टात्मावेगतश्चंडिकायावधकांक्षयाभ्यधावत् तमायांतंततोदेवीसर्वदैत्यजनेश्वरं ज
220 गत्यांपातयामासभित्वाशूलेनवक्षसि ततस्तंसर्वजनेश्वरंआगच्छंतंशूलेनवक्षसिभित्वा
भूमौपातयामास सगतासुः पपातोर्व्यांदेवीशूलाग्रविक्षतः चालयन्सकलांपृथ्वींसाब्धि
द्वीपांसपर्वतां सशुंभोगता असवः प्राणायस्यसगतासुर्मृतः सन्पृथ्व्यांपपातदेव्याःशूल
स्याग्रभागेनशूलमुखेनावाविक्षतः विशेषेणचूर्णितः क्षणुहिंसायामित्यस्मात्क्तप्रत्ययेअ
नुदात्तोपदेशात्यादिनानुनासिकलोपेचरूपंवीक्षितइतिपाठेअन्येषामपिदृश्यतेइतिदीर्घत्वं
चालयन्कंपयन्यद्यपिकंपनंअस्थावाचलनंचालः तंकरोतीतिणिजंतात्शत्रप्रत्ययः सशुं
भोदेवीशूलाग्रविक्षतः सन्समुद्रद्वीपपर्वतसहितांपृथ्वींचालयन्पृथ्व्यांपपात ततःप्रसन्नमखि २२.
लंहतेतस्मिन्दुरात्मनि जगत्स्वास्थ्यमतीवापनिर्मलंचाभवन्नभः तस्मिन्शुंभेदुरात्मनिहतेस

220A

तिअशेषंजगत्प्रसन्नप्रकाशमभूतंसत्त्वस्थंपापविघ्नंप्रयत्नेनभूत्वास्थम्प्रापआकाशंचनि
र्मलंबभूव उत्पातमेघासोल्कायेप्रागासंस्तेशमंययुःसरितोमार्गवाहिन्यःस्तथाशुंभेनि
पातिते उत्पातपूर्वकामेघाउल्कासहितायेशुंभवधात्पूर्वमासन् तेशमंउपशांतिययुःतत्र
शुंभमारितेसतिनद्यःस्ववर्त्मगामिन्योभूवन्येपूर्वमुत्पातनिमित्तामेघाअद्यतनावभूवुःरि
ष्टानिसर्वाणिकष्टानिचानशन्तुनद्यश्चमार्गवाहिन्योभूवन् ततोदेवगणासर्वेहर्षनिर्भर
मानुषः वभूवुःनिहतेतस्मिन्गंधर्वाललितंजगुः तस्मिन्शुंभेनिहतेसतिसर्वेदेवगणाहर्षे
णनिर्भयंपूर्णंचेतनूंगंधर्वाश्चललितंमनोहरंयथास्यात्तथागानंकृतवंतः अवादयंस्तथै
वान्येननृतुश्चाप्सरोगणाः ववुःपुण्यास्तथावाताःसुप्रभोभूद्दिवाकरः अन्येकेचनवाद्यान्यावा
दयन्तित्पत्रकअभिप्रायेणपरस्मैपदंअप्सरोगणानृत्यंतिस्मतथापुण्याःशीतांमंदाःसुरभयोनु
कूलारजश्शून्यावावाताववुःदिवाकरश्चविमलतेजस्कोभूत्जज्वलुःचाग्नयःशांताःशांता
दिग्जननस्वनः शांताःशुंभवधात्प्रागेवउपशांताअग्नयआसन् तेजज्वलुःयद्वाशांताःसो

म्यासंतोजज्वलुः दिक्षु जनितः स्वनो दिग्जनितस्वनः शांतो दिग्जनितस्वनो यैः शांतिकमंत्रैः हुं
मार्कं॰ २२१ 221 तैरग्निभिः हुत्वा दिक्षु जनितस्वानस्तूर्यजो निर्वातशब्दः शांत इत्यर्थः यद्वा शांतामुदिक्षु जनि
तः स्वनो यैः शांतिकमंत्रैः हुतैरग्निभिः हुत्वादि अंगारिणी दिग्विरोणा प्रमुक्तायस्यां रविस्ति
ष्ठति सा प्रदीप्ता प्रधूमिता यास्य तिर्यां दिने पूः पूर्यापश्च शांता शुभदा प्रोक्ता सुरिति वराहमिह
रोक्ताः शांता दिक्षु ज्ञेयाः अग्नयः शांताः सुशिखाः प्रदक्षिणावर्तिनो निर्धूमाश्च लं तिस्मा दि
ग्जनितास्वनाउपशमायमायाताः एतावता सर्वारिष्टोपशांतिर्बभूवेत्यर्थः इति श्रीदेवीमा
हात्म्यटीकासमुच्चये शुंभवधो नाम दशमोऽध्यायः ८४ ऋषिरुवाच देव्या हते तत्र महासु
रेंद्रे सेंद्राः सुरा वह्निपुरोगमास्तां कात्यायनीं तुष्टुवुरिष्टलाभाद्विकाशवक्त्राब्जविकासि
ताशाः तत्र तस्मिन्महत्यसुरेंद्रे इंद्रसहिता वह्निपुरोगमो येषां ते सुरास्तां कात्यायिनीं गौरी २२१
देहसमुद्भवां तुष्टुवुः इष्टस्याभिमतस्यार्थस्य लाभात्प्राप्तेः इष्टलंभादिति पाठे उपसर्गाद्बल
घञोरिति पृथग्योगकरणान्नुपूर्विकप्रानं विकाशः सोऽस्त्येषां तानि विकाशीनि तेषां व

क्रणांरश्मिभिर्विकाशिता दीपिता आशा दिशो यैः विकाशिवक्त्राब्जवविकासिताशा इतिपा
ठे विकासिना व्क्रिक स्वरेण वक्त्राब्जेन प्रकटीकृता आशा प्रत्याशा यैरिति योज्यं तामेव स्तुतिमाह
देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी दे
वि चराचरस्य हे देवि प्रपन्ना भक्तास्तेषामार्तिं दुःखं हरतीति तस्याः संबोधनं हरते रनुद्यमने वर्तत
ष्टप् प्रसीद प्रसन्ना भव संभ्रमे प्रसीदेति त्रिरुक्तिः ईश्वरी स्वतंत्रा चराचरस्येति निर्धारणे षष्ठी
व तष्टप् प्रसीद प्रसन्ना भव संभ्रम चराचरमध्ये त्वमेव स्वतंत्रेत्यर्थः अथवा अखिलस्य जगतस्त्वमेवे
श्वरी स्वामिनी अतो विश्वं पाहि इति योज्यं हे जगन्मातः हे विश्वेश्वरि प्रसादं कुरु ननु कथं चराचरस्य
स्वामिनीत्याशंक्याह आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि अपां स्वरूप
स्थितया त्वयैतदाप्यायते कृत्स्नमलंघ्यवीर्ये हे देवि त्वमेका विश्वस्य जगत आधारभूता त्वा
मेवाधारमाश्रित्य जगद्वर्त्तते तव कथमाधारत्वं यतः पृथ्वीरूपेणाधारभूता वर्त्तसे सर्वेषामपि
धरैवाधारभूता हे अनतिक्रमणी पवले उदकरूपमाश्रितया त्वयैव जीव्यते अंबसैव सर्वे प्राणि

तितदपितवैवरूपंजलस्वरूपयात्वयैतत्समग्रंजगदाप्यायेत आप्यायीवृद्धौकर्मणिलट्धातू
मार्कं॰ नामनेकार्थत्वात्स्थिरीक्रीयतेइत्यर्थः अपांस्वरूपस्थितयेतिषष्ठीराहोःशिरइतिवदर्थेप्र
२२२ न्यजलस्वरूपयेत्यर्थः नान्येनलंघ्यंअनतिक्रमणीयंवीर्यंप्रभावोयस्याः संबोधनं अतस्त्वमेव
222 चराचरस्वामिनीतिसिद्धं त्वंवैष्णवीशक्तिरनंतवीर्याविश्वस्यबीजंपरमासिमाया संमोहितं
देवित्वयासमस्तंत्वंवैप्रसन्नाभुविमुक्तिहेतुः हेदेवित्वंवैष्णवीशक्तिःविष्णोर्व्यापनशीलस्ये
श्वरस्येयंवैष्णवीअथवाविष्णुरेववैष्णवीस्वार्थेअण्सर्वव्यापकेत्यर्थः अन्यथाविष्णुसंबंधित्व
मात्रोक्त्यास्वतःसर्वव्यापकत्वानुक्तेःस्तुतिर्नप्रतीयेत अनंतेनानाविधिसंसारपादकंवीर्यंसा
मर्थ्यंयस्याःसाविश्वस्यबीजंमूलकारणंबीजभूतायास्त्वत्तएवविश्वमुत्पद्यतेपरमानिरतिशया
अघटितघटनापटीयसीत्यर्थः एवंभूतामायास्त्वत्तएवविश्वमुत्पद्यतेपरमानिरतिशया अविद्याश
क्तिरसिभवसिएतत्समस्तंजगत्त्वयासम्मूढं मोहेविषयीकृतंममतामायादिनासर्वमेवमोहेपा २२२
तितंत्वयेतिशेषः वैनिश्चितंप्रसन्नासतीएषाब्रह्मविद्यास्वरूपेणामुक्तेःकारणभूतासंसा

222A

रसागरे त्वमेव पातयसि मुक्तिमयि त्वमेव ददासीत्यर्थः विद्यासमस्तास्तव देवि भेदाः स्त्रियाः सम
स्ताः सकला जगत्सु त्वयैकया पूरितमंबयैतत्का ते स्तुतिस्तव्य परापरोक्तिः विद्याः वेदवि
द्यांगादि लक्षणाः समस्ता अष्टादश संख्याकाः ऋग्वेदो यजुर्वेदः सामवेदो थर्ववेद इति चत्वा
रो वेदः शिक्षाकल्पो व्याकरणं निरुक्तं ज्योतिषं छंदश्चेति षडंगानि पुराणन्याय मीमांसा धर्म
शास्त्र रूपाणि चत्वार्युपांगानि आयुर्वेदो धनुर्वेदो गांधर्वमर्थशास्त्रं चेति चत्वार एवं अष्टादश सं
ख्या विद्यासु निष्पद्यते उक्तं च अंगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः धर्मशास्त्रं पुराणं च वि
द्या ह्येताश्चतुर्दश आयुर्वेदो धनुर्वेदो गांधर्वश्चेति ते त्रयः अर्थशास्त्रं पुराणं च विद्या ह्यष्टा
दशैव ताः इति हे देवि एता समस्ता विस्तव भेदा विशेषा सामान्यरूपा सर्वात्मिका त्वं अवांतरविशे
षास्तवैता इत्यर्थः एवं समस्ताः स्त्रियोपि तवैय भेदाः समष्टिरूपा त्वं अन्याः समस्ताः स्त्रियस्तवै
व व्यष्टयो वांतरविशेषरूपाः कथंभूताः सकलाः चतुःषष्टिकलाभिः सह वर्त्तमानाः आलिंग
नाद्याश्चतुःषष्टकलाः कामशास्त्रतोधिगंतव्याः एतज्जगत्त्वयैकया पूरितं अतिशयेन व्याप्तः

मार्कं॰
२२३
कथंभूतया अंब्याजननीरूपया जननी अथवा उदरे विद्यमानं गर्भं व्याप्नोति तथा तवोदरे विद्यमा
नं जगत्त्वया व्याप्यते इत्याशयः एवं च सति तेन वस्तुतः सा गौणमुख्यव्यवहारस्य परस्परसाहे
223 पत्वेन भेदघटितत्वात् सर्वात्मिकायां त्वयि भेदाभावात् भेदघटितगौणमुख्यत्वकीर्त्तिनरू
पास्तुत्यसंभवेपि मुख्यगुणमात्रकीर्त्तनमेव स्तुतिर्भविष्यतीति चेत्तत्रतस्यानुवादमात्रत्वे
न स्तुतित्वाभावात् अथवा स्तव्यपरा स्तव्यविषयिणी या परोक्तिः स्तव्यापेक्षया भिन्नस्योक्ति
सा स्तुतिरिति लोके व्यवह्रियते न च सा भेदघटिता त्वयि संभवति सर्वात्मिकायास्तव द्रष्टो भिन्नस्य
स्तुतिकर्त्तुर्निरूपणानर्हत्वात् एकस्य कर्मकर्तृत्वासंभवश्चेति व्याख्येयं अथवा कं का कीदृ
शी अनिर्वचनीया स्तुतिरित्यर्थः अथवा स्तव्यपरा स्तव्यविषयिणी परोक्तिः श्रेष्ठोक्तिः स्तु २२३
तिरिति व्याख्येयं अथवा स्तुतिमेवेत्याह स्तव्यपरा परोक्तिः स्तव्या पश्चासौ परोक्तिश्चेति स्त
व्यपरापरोक्तिश्चेति प्राणमयी वाक् अपरोक्तिः पश्यंत्यादिरूपा वाक् सा उभयविधापि त्व
मेव चेति प्रत्यवमर्षार्थापरा वा स्तुरसोदिता सैव सा रतया स्त्रोकाहृदयं मर मेष्ठिनः इति परा

223A

वाक्स्वरूपंप्रतिपादितंतत्रयासूक्ष्माकुंडलीमध्येज्योतिर्मात्रात्मणीयसीअश्रोत्राविषयातस्मादु
द्गच्छन्मूर्ध्वगामिनीस्वयंप्रकाशापश्यंतीसुषुमणासाश्रिताभवेत्सैवहृत्पंकजंप्राप्यमध्यमा
नादरूपिणीसैवोरःकंठतालुस्थाशिरोघ्राणाद्विजोपमाजिह्वामूलोष्ठनिःश्वासकृतवर्णप
रिग्रहास्पष्टाप्रपंचजननीश्रोत्रग्राह्यातुवैखरीतिचक्रतापिपरापश्यंतीमध्यमावैखरीभेदेन
चतुर्विधावाक्श्रूयतेचत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणाःपरिमितापरिमितानिग
णितानिपद्यंतेज्ञायतेपरंतत्वमेभिरितिपदानिरूपाणिचत्वारितानिचत्वार्यपियेमनीषिणस्तां
तत्वदृष्टयस्तेविदुर्जानंतिनान्येयतोगु हायांदेहमध्येत्रीणिनिहितानिनेंगयंतिस्वरूपंनप्रकाश
पतेततःकेवलंवाचस्तुरीयंचतुर्थंभागंवैखरीरूपंमनुष्याःप्राणिनोवदंतितदपिवदंत्येवनतुतत्व
तोजानंतीतितथाचैवंविधपरापरशब्दरूपत्वात्कृतिरूपात्वमेवेतिभावःहेदेविसमस्ताश्चतस्रः
आन्वीक्षिकाद्याःअथवापुराणाद्याविद्यास्थानान्यष्टादशात्तवरूपसमस्ताःक्रियाःश्रौताःस्मा
र्त्ताःआगमिकास्तवरूपंसकलावाचःसंस्कृतप्राकृताद्याभाषास्तवरूपंसंस्कृतप्राकृतेकिंवहु

नाहे अंबत्वयैकया नानारूपत्वेन सर्वं पूरितं तेन तव परोक्तेः पराख्यायाः परेत्युक्तिर्यस्याः सा तस्याः स्तु
मार्कं. तिका कीदृक् स्तूयते स्तव्यपरा सत्यसक्ता अविद्यमानं गुणकीर्तनं स्तुतिः तव यत्किंचिदुच्यते तत्सर्वंस
२२४ त्यमेव स्तुतिः किंभूता उक्तेः परावचनातीतो तव स्वरूपं न ज्ञातुं समर्थावयं सर्वभूता यदा देवि स्व
224 र्गमुक्तिप्रदायिनी त्वं स्तुता स्तुतये का वा भवंतु परमोक्तयः सर्वभूतं प्राप्तं य यासा सकलस्था
वरजंगमात्मिका वा स्वर्गः सुखविशेषः मुक्तिरविद्यानिवृत्तिः परमानंदावाप्तिर्वा ते प्रदातुं शीलं
यस्याः सा स्वर्गमुक्तिप्रदायिनी एवंरूपा यदासि सा भिस्त्वं स्तुता आसि तदा तव स्तुतये परमोक्तयः
श्रेष्ठोक्तयो का वा भवंतु न का अपीत्यर्थः हे देवि त्वं सर्वभूता सर्वरूपेण स्थिता यत्र सर्वमुक्तिप्र
दायिनी त्वं स्तुता का वा अन्या परमोक्तयः स्तुत्यर्थे भवंतु सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थि
ते स्वर्गापवर्गदे देवि नारायणि नमोस्तु ते तथाप्युपमाप्यभूय स्तुदेवाह सर्वस्य जनस्य हृदि बु
द्धिरूपेण संस्थिते संस्थिता प्राप्तस्य संबोधने रूपं स्वर्गापवर्गदे इत्यपि संबोधनं अपवर्गो मोक्षः न २२४
राद्विष्णोरुद्भूता नराः आपः अयनं निलयो यस्य नारायणो जीवसमूहं अयते गच्छति अंतर्यामिरूपेण

224A

व्याप्नोमीतीतिवानारायणास्तस्येयंशक्तिः तद्रूपावानारायणी तस्याः संवोधनं हेनारायणि तेतुभ्यंन
मोस्तु त्रिशूलवंद्राहि धरेमहावृषभवाहिनि माहेश्वरीरूपेणनारायणिनमोस्तुते हेदेविनारा
यणिविसुशक्तेमाहेश्वरीशक्तिरूपेणसंस्थितेत्रिशूलंवंद्रमहिधारयंतीतिमहावृषभंथास्यसी
तिसंवोधनं कलाकाष्टादिरूपेणपरिणामप्रदायिनी विश्वस्योपरितौदेविनारायणिनमोस्तुते
हेदेविकलात्रिंशत्काष्टात्मकःकालः काष्टा अष्टादशनिमेषात्मकः आदिशब्देननिमेषमुहूर्त्तादि
पक्षमासऋतुवर्षयुगव्यवस्थाभिः विश्वस्यपरिणामस्तान्विकोन्यथाभावस्तंप्रदातुशीलंयस्याः
सातस्याः संवोधनंउपरतौविश्वस्यविनाशेशक्तेसमर्थेसंक्तिशब्दस्यसंवुद्धौरूपंसक्तेइतिपाठेश
क्तिरासक्तिःप्रवृत्तिर्वाकलादियुगंतव्यवस्थाभिः रूष्ट्यंतसमये विश्वस्यपरिणामंप्रददात्येवंशी
लेहेदेवितुभ्यंनमः सर्वमंगलमंगल्येशिवेसर्वार्थसाधिके शरण्येत्र्यंबकेगौरीनारायणिनमो
स्तुते सर्वेषुमंगलेषुवेदवेदांगादिषुमंगल्यामंगलानियस्यांसासर्वमंगलासाचासोमंगल्याचेत
स्याः संवोधनं अथवासर्वेषांमंगलानांमंगल्यमंगलभावस्तद्रूपामंगलेत्वमेवेतिभावः अतएव

श्शिवेकल्याणकारिणिशरण्येरक्षणांतत्रसाध्वीशरणापात्रअथवाशरणार्हा आश्रयणीयातस्याः संबो
मार्कं० धनंशरणागतानामतीतानांगतवर्त्तमानंजनसमीहितेरक्षणार्थं अग्निसोमसूर्यात्मिकानित्रीणिअं
२२५ बकानेनेत्राणियस्याः सात्र्यंबकातस्याः संबोधनंस्त्रियांदृष्टिंदृशोदेवदीपोलोचनमंबकमित्य
225 भिधानात्हेगौरिगौरिवर्णोकान्तिप्रभुल्केवासर्वदामंगलस्यमांगल्येनिधेशिवेकल्याणकारि
णिसर्वेषामर्थसाधयित्रिशरणागतरक्षिकेत्रिनयनेगौरिनमोस्तुते सृष्टिस्थितिविनाशानां
शक्तिरूपेसनातने गुणाश्रयेगुणामयेनारायणिनमोस्तुते सृष्ट्यादीनांकारणभूताः क्रमे
णरजःसत्वतमोगुणाप्रधानब्रह्महरिहराणांप्राकृतयः स्तं रूपाशक्तयः संबोधनंसनातनेहेनि
त्येगुणानांमहदादीनामाश्रयभूतेसत्वरजस्तमसांसाम्यावस्थास्वरूपत्वत्रिगुणमयेगुणात्रय
स्वरूपोमयडुडंतास्यद्यपिटीपुप्राप्नोतितथापिवाकुलकात्रजापमयिगताविन्यस्मात्वागुण २२५
मयंतेत्रायंतेस्पामिनिगुणामयेतिक्षुत्पादनीयंअथवासत्परजःतमसांसाम्यावस्थारूपत्वादवि
द्यमानेगुणामयोगुणाविकारोयस्यांसाआगुणामयेत्यकारप्रश्लेषणव्याख्येयंआकाशादिरू

225A

पेण शष्ट्यादिगुणाश्रया शष्ट्यादिरूपत्वेन च गुणामस्यां सा त्रिगुणामयेत्येवेति व्याख्येयं शरणाग
तदीनार्त्तपरित्राणपरायणे विश्वस्यार्त्तिहरे देवि नारायणि नमोस्तु ते दीनाः सार्वदिकदुःखा
भाज आर्त्तास्तस्करादिपीडिताः शरणागतायै दीनार्त्तास्तेषां परित्राणं सर्वभावेन रक्षणं पराय
णामभीष्टं यस्याः तस्याः संबोधनं परायणामभीष्टेस्यादितिनामशासनात् सर्वादिव्याधिनाशि
नि देवि तुभ्यं नमः हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि साक्षसूत्रधरे देवि नारायणि नमो
स्तु ते देवानां यथारूपं शक्ती नाम पितथैवाहि ब्रह्माणपारूपं धरतीति तस्याः संबोधनं रूपधारि
णीत्यसंबोधनरूपो दीर्घपाठेयः सक्षाविल्कवा ------ साक्षरूपत्वाद्य नास्माकं संमतः एव
मग्रेपि युक्ता हंसा यत्र राजदंतादित्वाद्युक्तशब्दस्य परनिपातः हंसैर्युक्तं वायच्छिमानं तत्रतिष्ठ
तीति तस्याः संबोधनं कुशं जलं तस्याश्रयः कोशः कमंडलुस्तस्याः भः कौशांभः कौशं मशः क्षु
रिका कौशांभः क्षरिकाशेषिक विवक्षायामेव षष्ठी तेन कर्त्तरि चेति षष्ठीसमासनिषेधेन कु
शांभः क्षेरैतिपाठे कुशस्येदि कौशं दृष्ट्वा भाद्धांदसः कुशयुक्तं वा त्रिभः हंसवाहने ब्रह्माणि न

पमालाकमंडलुधारिणि त्रिशूलचंद्राहिधरे महावृषभवाहिनि माहेश्वरीस्वरूपेण नारायणि
मार्कं· नमोस्तुते त्रिशूलं चंद्रश्चंद्रैकदेशः अहिः सर्पश्च तेषां धरे इति विग्रहः तान् धरतीति विग्रहे कर्मण्य
२२६ ण्घान्वृषभं वाहयितुं शीलं यस्याः मयूरकुक्कुटवृते महाशक्तिधरेऽनघे कौमारीरूपसंस्था
226 नेनारायणि नमोस्तुते कौमारीरूपं संस्थानमवयवसन्निवेशो यस्याः सा कौमारीरूपसंस्थाना
तस्याः संबोधनं मयूरैः कुक्कुटैश्च वृता वेष्टिता मयूरकुक्कुटशब्दाभ्यां मयूरकुक्कुटपिच्छानि ल
क्ष्यंते तैरलंकारत्वाद्वृते धृते इति क्वचित्पाठः अघं पापं दुःखं च तद्धीनाऽनघा मयूरकुक्कुटवा
हने महाशक्तिधरे निष्पापे कौमारि तुभ्यं नमः शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे प्रसीद वै
ष्णवीरूपेण नारायणि नमोस्तुते शंखादीनि गृहीतानि परमायुधानि यया सा प्रहरणार्थं यस्याः
धरे निश्वासतस्या वा इति गृहीतशार्ङ्गस्य परिनिपातः गृहीतविविधायुधे इति क्वचित्पाठः हे वैष्ण २२६
वीरूपधारिणि तुभ्यं नमस्ये गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे वराहरूपिणि शिवे नाराय
णि नमोस्तुते गृहीतमुग्रं महाचक्रं सृष्टिचक्रं यया अतो दंष्ट्रयोद्धृता वसुंधरा यया सा करा

226A

हंसरूपिणि अस्यास्तीति शिवयोगाच्छिवेकल्याणकारिणि नमोस्तुते नृसिंहरूपेणोग्रेण हंतुं दै
त्यान्कृतोद्यमे त्रैलोक्यत्राणसहिते नारायणि नमोस्तुते उग्रेणनृसिंहरूपेण हिरण्यकशि
पुप्रभृतीन् हंतुमुद्यमपरे त्रैलोक्यस्यत्राणंरक्षणं तेनसहिता त्रैलोक्यत्राणेसंहिता वासमोवाहि
ततयोरितिमकारलोपः देवितुभ्यंनमः किरीटिनिमहावज्रेसहस्रनयनोज्ज्वले वृत्रप्राणहरे
चैन्द्रिनारायणि नमोस्तुते ऐन्द्रिइंद्ररूपधरे किरीटोमुकुटोस्यास्तीति शिवदूतीस्वरूपेण
हतदैत्यमहाबले घोररूपेमहारावे नारायणि नमोस्तुते शिवदूतीस्वरूपेण हतंदैत्यानांबलं
ययासयानरूपेमहामुक्तरावेदेवितुभ्यंनमः दंष्ट्राकरालवदनेशिरोमालाविभूषणे चामुं
डेमथनेनारायणि नमोस्तुते दंष्ट्रयाकरालंवदनंयस्याः शिरसिमुंडानामालाविभूषणंयस्याः
मुंडस्यमथनीतिमथनाचंडस्यमुंडस्यचशिरोग्रहणाच्चामुंडोच्यतेतावचैवमुंडमथनत्वमपिज्ञा
तव्यद्यपितथापिस्तुतित्वात्तपौनरुक्त्यंदोषायवहं लक्ष्मिलज्जेमहाविद्येश्रद्धेपुष्टिस्वधेध्रुवे
महारात्रिमहामायेनारायणि नमोस्तुते लक्ष्मीशब्दस्यपूर्वश्लोकेव्याख्यानदीतिनदीसंज्ञत्वाद्ध्रस्व

त्वंसंवुद्धौसर्वंसंमतंकेचित्तु औणादिकप्रत्ययांतत्वेननदीसंज्ञाभावात्सुलोपंकृस्वत्वंचनेछंतिते
मार्कं· उपेक्षणीयामंदवुद्धित्वात् लज्जे महतो ब्रह्मणः प्राप्तिहेतुत्वाद्विषयीकर
२२७ णाद्वामहाविद्याब्रह्मणोपितन्निविषयत्वमिष्यतएवतेनविषयीकरणापक्षोदुष्टोनमंत
227 व्यः उपनिषद्रूपेनेत्यर्थः श्रद्धे पुष्टिरूपचयः संवुद्धौगुणाभावश्छांदसः सु
लोपस्तुभवप्रलयरूपायाकृस्वांतत्वात् अथवापुष्टियुक्तास्वधेतिमध्यमपदलोपेसमासो
ज्ञेयः स्वधापितृहविर्दानमंत्रः ध्रुवेस्थिरेमहतीचासौरात्रिश्चपरार्द्धद्वयावसानतयाप्रलयरू
पयारात्रेर्महत्त्वंरात्रिशब्दात्कृदकारादक्तिनइतिङीषिकृतेसंवुद्धौकृस्वत्वंछांदसंसोवागुणा
भावामहतीअविद्यामहाविद्यासात्वनित्याशुचिदुःखानात्मसुनित्यशुचिसुखात्मख्यातिरू
पामहत्त्वंचास्याः सर्वजीवान्प्रतिब्रह्मस्वरूपावरणेसामर्थ्यस्यविद्यमानत्वात् मेधेसरस्वति
वरेभूतिदेभव्यतानिःशि नीयतेत्वंसीदेविनारायणिनमोस्तुते मेधावसुग्रंथावधारणशक्ते २२७
सरस्वतिवाग्देवतेश्रुतिस्मृतीतिहासादिरूपेवावरेश्रेष्ठे भूतेः सत्वंगुणः कारणेकार्योपचा

णायोगा इति सात्विकी संवुद्धौ गुणाभावश्छांदसः अथवा भूतिरुत्तरोत्तरसंपत् आणिमा
ाष्टरूपा व अष्टाष्टनरजोगुणा उच्यते इत्यर्थः वाभ्रवी वभ्रुवंशे कदाचिदुत्पन्नाव श्रौ विष्णो
वी विपुलेन कुलेन विष्णोर्वश्रोस्यास्तिं गलेत्रिषु इति धरणिः तामसी निद्रारूपेति व्याख्ये
नेय नरूपे प्राचीनकर्म्मरूपे अवश्यंभावे रूपे वा ईश्वस्वामिनि कालांनरादिविस्मरणरूपा
रती रूपे भूतिः संपदंददासीति संसारंविनाश्यपमुक्तिं ददासीति सनातने सर्वेश्वरि प्रसीदतु
र्वतः पाणिपादांते सर्वतोक्षिशिरोमुखे सर्वतः श्रवणः घ्राणे नारायणि नमोस्तुते
ग दिक्षु सर्वभावेनाभिव्याप्य वापाणीपादौ वांते यस्याः सर्वतोक्षीणि शिरांसि मुखा
र नेश्रवणघ्राणाद्यवयवैः सर्वमेवव्याप्नोमित्यवगंतव्यं अयं श्लोको गौडेन पठ्यते सर्व
सर्वशक्तिसमन्विते भयेभ्यस्त्राहि नो देवि नारायणि नमोस्तुते सर्वविश्वस्वरूपेय
वा प्रेस्वामिनि सर्वेषां शक्तिभिः सर्वासांमूर्त्तीनां वाशक्तिभिः सर्वाभिर्वाशक्तिभिः
ति स्मान् त्राहि पालय हे दुर्गे देवीति पदद्वयं प्रसादने अथवा दीव्यतीति देवी देवस्येयं

त्वंसंबुद्धौसर्वसं
उपेक्षणीयामं
मार्कं· णाद्वामहावि
२२७ 227 घ्यः उपनिष
लोपरक्तभव
ज्ञेयःस्वधा
पयारात्रेम
भावामह
पामहत्वं
वरेभूतिदे
सरस्वति

नपदद्वयंमारवेयं एतत्तेवदनंसौम्यंलोचनत्रयभूषितं पातुनःसर्वभीतेभ्यका
क्तते एतमुखमनोज्ञंनेत्रपालंहृतंसर्वभीतिभ्योस्मान्पातुकात्यायनाश्रमोज्ञ
तुभ्यंनमः ज्वालाकरालमत्युग्रमशेषासुरसूदनं त्रिशूलंपातुनोभीतेभद्रिका
भद्राचासौकालीचक्रुद्धाचज्वालयाकरालंभीषणंउद्भटंवासकलैर्दैत्यविध्वंस
स्माज्ञयात्पातु श्रीभद्रकालीगौरीहेसमुद्भवेतुभ्यंनमः हिनस्तिदैत्यतेजांसिस्वने
त् साघंटायातुनोदेविपापेभ्योनसुतानिव साघंटानोस्मान्पापेभ्यः प्रतिकूलेभ्यो
निव अनःप्राणीसुतापत्यानिव अनप्राप्तिनोइत्यस्मादविरूपं अननीत्यनःप्राणी
त्पिनायद्वानोस्माकंपापेभ्योनोस्मान्रक्षतुयद्वा अनंसकटंसुतान्बालिकान्पापे
श्राकरेपिद्विवाबालिकास्थाप्यंतेयतः अथवातःसुतान्दुष्टसुतानिवनसकौटिल्य २२८
कत्रीरिक्तिपूअथवासानःसुतानिवपातुइतियोजनीयंसुष्टुशोभनानिसुतानिकानि
कृयांसांघंटासचशूलःतच्चवदनतानित्यादादीनिसर्वैर्नित्यमित्येकप्रोषघंटास्मान्पा

228A

ऽरक्षतु घंटास्वनेन जगत्त्रितयमापूर्य दैत्यतेजांसि हिनस्ति दैत्यानतीव भीषयति अनो मातापा
षु सुतान्पाति अनो मातरिष्टा कष्टेच्चेति हिनस्तीत्यर्थ हिंसि हिंसायां रुधादिकः असुरासृग्वसा
न्पं चर्चितस्ते करोज्ज्वलः शुभाय खड्गो भवतु चंडिके त्वानतावयं हे देवि तव खड्गः शुभाय भवतु अ
ममरुधिरमेदः पंकेन चर्चितो विलिप्तः करं हस्तमुज्ज्वलयतीति करोज्ज्वलः करैः किरणैर्वा तेज्ज्व
लः के त्वां प्रपन्नतास्मः रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकलानभीष्टान् त्वामा
श्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयांति रुजंति व्यथयंतीति रोगा उपद्रवाः ता
गापहंसि नाशयसि रुष्टा कुपिता पुनः कामान्मनोरथानभीष्टान्प्रियान्सकलानपहंसीत्यनु
षंगः विपत् इष्टवियोगलक्षणा विपत्तिः हीति विशेषार्थं हि हेतौ स्याद्विशेषार्थे पादपूरणे इत्यभि
धानं विशेषतो ये त्वामाश्रितास्ते त्वन्येषामाश्रयतां प्रयांतीत्यन्वयः आश्रया भवंतीत्यर्थः
वाग्निपक्षे कदनं त्वयाद्य धर्मद्विषां देवि महासुराणां रूपैरनेकैर्बहुधात्ममूर्त्तिं कृत्वांबिके त
तिविषं कान्या हे देवि यत्त्वया एकामात्ममूर्त्तिमनेकै रूपैर्बहुलान्यादिलक्षणैर्बहुधा बहुप्रका

221

त्वंसंवुद्धौसर्वत्राकुल्यंकृत्वेत्यर्थः रूपैरितिप्रकृत्यादित्वात्तृतीयाधर्मद्विषांपापिष्ठानांमहासु

मार्कं. उपेक्षणीयमनमाराणांकृतंएतदेवंकर्मतत्क्व दनंत्वदितिराकाप्रकर्तुंमर्पतिनकापीत्यर्थः विद्या

२२७ णाद्याम्षुविवेकदीपेद्वाद्येषुवाद्येषुचकात्वदन्या ममत्वगर्त्तेतिमहांधिकारेविभ्रामयस्ये

227 व्यः उद्धविपर्श्चविद्यासुइंद्रजालादिलक्षणासुलोकस्ययोगक्षेमविधायिनिषुवाआन्वीक्षिकी

लोपस्कृत्र्यौदंडिनीतिषुशास्त्रेषुवेदेतरविद्यास्थानेषुविवेकस्तत्त्वसाक्षात्काररूपंदीपयंतित

ज्ञेयः स्थ्वयंतीतिविवेकदीपावेदांतास्तेषुआद्येषुवाक्येषुकर्मकांडेषुतेषामुपनिषद्भ्यः प्रा

पयाराः अथवाआद्येषुवाक्येषुवेदेषुकिंभूतेषुकदाब्रह्मप्रतिपादकेषुत्वदन्याकात्वमेव

भावाफरेद्यादिषुनानारूपेणाभासोत्यर्थः नकेवलंविद्यासुप्रतिभासिअपितुएतन्मत्पक्षतयात्र

पामहानेविपश्चममत्वंगर्त्तेइत्वगर्त्तेममत्वाश्रयः संसारस्तस्मिन्नतिमहांधकारेमहतामपिसंसार २२६

वरेमलेकब्रह्मज्ञानिप्रतिबंधकेविश्रामयसिपुनःपुनः प्रवर्त्तयसिसंज्ञांपूर्वास्यविधेरनित्यत्वा

सरस्वविपिकृस्वत्वाभावाअथवाममत्वगर्त्तेयेविद्यादयः स्तेषुएतद्विषंत्वदन्याकाविभ्रामयति

अपितुत्वमेवविभ्रामयसीतियोऽयंविद्यास्वाध्यात्मिकादिषुपृथुसारस्वतागमवेदांतसिद्धांतादि
षुशास्त्रेषुआद्येषुवाक्येषुश्रुतिस्मृतिपुराणादिषुविवेकदीपतुल्यैः शास्त्रैर्विवेकस्तुदर्शनंज्ञ
न्यतेकात्वदन्याजागर्त्तितरांतत्रत्वंवागर्थरूपा अथतेषुत्वमेवगीयसे तथामहांधकारेमोहरूपे
ममत्वगर्त्ते अयमहंबहुगुणपूर्णोइत्यंधताएतेसुतदारविभवक्षेत्रपश्वादयोममेतिममतासैवग
र्त्तस्तत्रैतद्धिविश्वंविविधप्रकारेणभ्रमयसिएतस्मिन्संसारेजन्मजरामरणादिभ्रमणंकरोषियदुक्तं
श्रीभागवतेहित्वात्मपातंगृहमंधकूपंपरेस्थितोयद्वनमाश्रयेण पत्ररक्षांसियत्रोग्रविषाश्चना
गापत्रारयोदस्युबलानियत्र दावानलोयत्रतथाब्धिमध्येतत्रस्थितात्वंपरिपासिविश्वं हेदेविपत्र
रक्षांसिराक्षसाः पत्रोत्कटविषाः सर्पाः यत्रशात्रवः यत्रतस्करसमूहः यत्रारण्येदावानलः परिपी
ड्यतितत्रस्थितात्वंपरिपासितथाब्धिमध्येयउपद्रवस्तत्रापित्वमेवेतियोऽयंकेचिद्दावानलपदंवड
वाग्निपरतयाव्याकृतेकवाक्यतयाप्योजयंति विश्वेश्वरीत्वंपरिपासिविश्वंविश्वात्मिकाधारयसी
तिविश्वं विश्वेशवंद्याभवतीभवंतिविश्वाश्रयायेत्वयिभक्तिनम्राः हेदेवित्वंसर्वस्येश्वरीअत

एवंप्रभुत्वात्त्वं विश्वं परिपासि हे देवि त्वं विश्वात्मिका विश्वस्वरूपा विश्वं त्वमेवेति कारणाद्विश्वं धार
यसि इतीदं प्रकाशमानं वा इंद्रादीनां विद्यात्वं विश्वेश्वस्य ब्रह्मणो वंद्यास्त्वया नमस्या वा ये त्वयि भ
क्त्या प्रणतिपरास्ते विश्वेषामाधारभूता भवंति देवि प्रसीद परिपालय नो रिभीतिर्नित्यं यथासुर
वधादधुनापि सद्यः पापानि सर्वजगतां प्रशमं नयासु उत्पातपाकजनितांश्च महोपसर्गान् हे
देवि चंडिके प्रसीद प्रसन्ना भव प्रसादं कुरु अस्मान् शत्रुभयात्परिपालय अरिभयं मा भवतु नित्यं
यथा शुंभादिघातेनाधुनैव तु त्रूणां त्राता तथा नित्यं परिपालयेति शेषः तथा सर्वजगतां पाप
मुपशमं शीघ्रं प्रापय जगंति निष्पापानि विधेहि यथा काष्ठं कदाचन मोत्पद्यते उत्पाते त्पक्ष्वा विव
क्षत त्वान्न संधिः उत्पाता अरिष्टा अनिष्टसूचका उल्कापाताद्यस्तेषां पाकः परिणति पर्यवसा
पिता तज्जनिता ये महोपसर्गाः पुत्र वित्त शरीरादि नाश हेतवस्तान् त्रिवितपात परिणाम संभवानुत्या २२
ताको वधितत्रोपसर्गान्विघ्नान् शमय वाराहीसंहितायामुक्तं अस्ति अयमुत्पातो मुकमंडलेजा
तो स्मि न्समपे फलति उत्पातेषु देवि त्वं समर्पते तत उपसर्गाः क्षयं यांति प्रणतानां प्रसीद त्वं देवि

230A

विश्वार्त्तिहारिणि त्रैलोक्यवासीनामीड्ये लोकानांवरदाभवदेवित्वंनतिमतांप्रसीदविश्वस्यार्त्ति
हरेस्त्रैलोक्यवासिन्यानांलोकानामीड्येत्वमस्माकंवरमभिलषितंदेहि ॥३५॥ देव्युवाच
वरदाहंसुरगणावरंयन्मनसीच्छथ तं तंवृणुध्वंप्रयच्छामिजगतामुपकारकं हेसुरगणावरोमी
च्छितोर्थः पदित्यव्ययंयंवरमित्यर्थः यमितिवापाठः ममसीच्छितंवरंयाचध्वंजगतामुपकारभूतंयथा
हंप्रयच्छामि देवाऊचुः सर्वबाधाप्रशमनंत्रैलोक्यस्याखिलेश्वरि एवमेवत्वयाकार्यमस्मद्वैरि
विनाशनं हेत्रैलोक्येश्वरि त्रैलोक्यस्ययाः सर्वा आध्यात्मिकाधिदैविकाधिभौतिकाबाधापी
डादुर्भिक्षनरकादिकाबातासांप्रशमनमेवमेवानेनैवप्रकारेण कार्यंयथाद्यास्मद्वैरिविनाश
कृतं देव्युवाच वैवस्वतेंतरे प्राप्ते अष्टाविंशतिमे युगे शुंभो निशुंभश्चैवान्यावुत्पद्येतेमहासुरौ
वैवस्वतेंतरेवैवस्वतमनोरधिकारोपलक्षितेकालेसप्तमेमन्वंतरेइत्यर्थः अष्टाविंशतितमे अष्टा
विंशतिसंख्याके अष्टाविंशतिशब्दात्तमडागमश्छांदसः अष्टाविंशत्यामीयतेइति अष्टावि
शतिमः इतिवासंधेयंप्राप्ते अष्टाविंशतिमेइत्यत्राविवक्षितत्वान्नसंधिः योगेचतुर्युगेशुंभनिशुं

भारव्यावसुरौपुनरन्यौत्पत्स्यते नंदगोपगृहे जातायशोदागर्भसंभवा ततस्तौनाशयिष्यामिविंध्या
मार्कं· निवासिनीमारयामि पुनरप्यतिरौद्रेणरूपेणपृथिवीतले अवतीर्यहनिष्यामिवैप्रचित्तान्महासुरा
२२२ न् पुनरपिपृथ्वीतले अवतीर्यहनिष्यामिवैप्रचित्तान्महासुरान् नपिपृथ्वीहनिष्यामिभक्षयंता
231 नुग्रान्वैप्रचित्तान्दानवान्रक्तदंताभविष्यंति दाडिमीकुसुमोपमाः भक्षयंत्याप्रहृतत्वान्म
मदाडिमीकुसुमंउपमायेषांतेतत्सदृशावारक्तालोहितदंताभविष्यंति ततोमांदेवताःस्वर्गेमर्त्य
लोकेचमानुषाः स्तुवंतोव्याहरिष्यंतिसततंरक्तदंतिकां स्वर्गेदेवाःमर्त्यलोकेचमानवाः स्तुवं
तोमांरक्तदंतायस्याःसातत्रामकीर्तयिष्यंति भूयश्चशतवार्षिक्यामनावृष्ट्यामनंभसि मुनिभिः
संस्तुताभूमौसंभविष्याम्ययोनिजा पुनरपिशतवर्षाणिप्रमाणंयस्याःसाशतवार्षिकीशतव
र्षभावाकालात्वजृंउत्तरपक्षवृष्टिःनविद्यतेआसमंतात्अंभोयस्यांवातादितलपक्षन्यायांभूमौ २२२
अनंभसीतद्धचित्पाठः निरुदकायामयोनिजास्वयंभूतंभविष्यामि ततःशतेननेत्राणांनिरी
क्षिष्यामियन्मुनीन् कीर्तयिष्यंतिमनुजाःशताक्षीमितिमांततः ततःपश्चान्नेत्राणांशतेनय

न्मुनीन्निरीक्ष्यामि इतिपरस्मैपदंसंईक्ष्यतेरात्मनेपदित्वात्यद्वानिःशेषात्आदृते इतिनिरीक्षापदा
घचूतांकरोतीतिणिचूततोधातुसंज्ञायांल्यप्णिचोलोपः छांदसः इतिकेचित्ततः कारणान्मां
मनुजाः शताक्षीकीर्त्तयिष्यंति ततोहमखिललोकमात्मदेहसमुद्भवं भरिष्यामिसुराः शाकैराद्वृष्टेः प्रा
णधारकैः हेसुरास्ततोनंतरंस्वशक्तिनिष्पादितैःशाकैर्वालुककडुत्वमुलादिभिरखिललोकंभरि
ष्यामिप्राणधारणार्थंयावद्वर्षागमंधारयिष्यामि शाकंभरीतिविख्यातिंतदायास्याम्यहंभुवि त
त्रैवचवधिष्यामि दुर्गमाख्यंमहासुरं शाकंबिभर्तीतिशाकंबरीविख्यातेतदाभूमावाहंयास्यामित
त्रैवदुर्गमनामेनंमहासुरंवधिष्यामिवधवंधनेकार्थत्वाद्धातूनामत्रमारणेवधिः अथवाहनोवधा
देशोवधइवाचरतीत्यर्थेसर्वमातिपदकेभ्यः क्विप्धातुसंज्ञायांल्यप् दुर्गादेवीतिविख्यातिंतदायास्या
म्यहंभुवि तदादुर्गादेवीतिप्रथिमानंप्राप्स्यामि पुनश्चाहंयदाभीमंरूपंकृत्वाहिमाचले रक्षांसिक्ष
यिष्यामिमुनीनांत्राणकारणात् पुनश्चाहंयदाभयानकंरूपंकृत्वामुनीनांत्राणकारणाद्रक्षाहेतोः र
क्षांसिराक्षसानाशयिष्यामि यदारुणाख्यस्त्रैलोक्येमहांबाधांकरिष्यति तदाहंभ्रामरंरूपंकृत्वासं

ख्यायषट्पदं त्रैलोक्यस्य हितार्थाय हनिष्यामि महासुरं भ्रामरीतिच मांलोकास्तदास्तोष्यंतिस
मार्कं २३२ र्वतः यदा अरुणाख्यो ऽरुणनामा महासुरः महावाधां महापीडां मतिकदनं विधास्यति तदातस्मि
२३२ न्काले भ्रमरस्येदं भ्रामरं भ्रमरसमूहात्मकं वा असंख्येया अगणनीयाः षट्पदा त्रयतत्संख्येयावा
षट्पदाः पादायस्मिन्रूपे दश द्वीपयाद्वाची पुंलिंगेव कुष्णुस्थलेषुद्वपपते नपुंसके तु सर्वसंमतः
त्रिभुवनोपकारतयतं महासुरं हनिष्यामि तदा मां लोका भ्रामरी नाम्ना स्तोष्यंति सर्वतः सर्वत्र सर्वेलो
कावायुगं इत्थं यदा यदा वाधा दानवोत्था भविष्यति तदा तदावतीर्याहं करिष्याम्यरिसंख्ययं
हे देवा इत्थमेवं प्रकारेणायस्मिन्यस्मिन्काले दानवेभ्यः उत्पन्ना उत्थिता पीडा भविष्यति तदा तदा
हमवतीर्याविर्भूय शत्रुक्षयं करिष्यामि इति श्री देवीमाहात्म्ये टीकाद्वयसंग्रहे एकादशोऽध्या
यः ११ श्रीदेव्युवाच एभिस्तवैश्च मां नित्यं स्तोष्यते यः समाहितः तस्याहं सकलां वाधां नाशा २३२
यिष्याम्यसंशयं हे देवा एभिः स्तोत्रैर्य आदरः सन्मां स्तोष्यते तस्य स्तोतुरहं निःसंशयं निःसंदिग्धं
पीडां शाकेटभनाशं महिषासुरघ्नं भनिशुंभवधं वकीर्तयिष्यंति तेषां दुष्कृतं किंचिन्न भविष्यती

त्यग्निमेतासंबंधः अष्टम्यांचचतुर्दश्यांनवम्यांचैकचेतसः श्रोष्यंतिचैवयेभक्त्यामममाहा
त्म्यमुत्तमं अष्टम्यादिषुमन्त्रायतिथिपर्वसुयेएकाग्रचित्ताःमत्प्रभावकीर्तनंश्रोष्यंतिच नते
षांदुष्कृतंकिंचिद्दुष्कृतोत्थानचापदः भविष्यतिनदारिद्र्यंनचैवेष्टवियोजनं तेषांसमस्तनृणां
किंचिद्दुष्कृतंपापंनभविष्यतितथादोषकृतोत्थासमूहादुत्पन्नाआपदोविपत्तयेनविष्यंतीतिविभ
क्तिपरिणामेनयोज्यंदुष्कृतोत्थाव्याधयस्तावत्पापादेवभवंतितस्यगृहेदारिद्र्यंनइष्टवियोगश्चनभ
विष्यति शत्रुतोनभयंतस्यदस्युतोनराजतः नशस्त्रानलतोयौघात् कदाचित्संभविष्यति तस्यश्रो
तुःश्रोतुश्चशत्रुतस्कराजशस्त्राग्न्यगाधजलभयोभयंनभवति तस्मान्ममैवंमाहात्म्यंपठितव्यं
समाहितैः श्रोतव्यंचसदाभक्त्यापरंस्वस्त्ययनंयतः यदेवंफलमस्तितस्मान्मत्प्रभावकीर्तनंमच्च
रितंसमाहितैःश्रद्धाभक्तिसमन्वितैःसावधानैर्वापठितव्यंसदाश्रोतव्यंचयस्मात्परमुत्कृष्टंस्वस्त्य
यनंश्रेयःसंपादकंमहत् एतत्तुल्यंश्रेयःसंपादकमन्यत्रास्तीत्यर्थः उपसर्गानशेषांस्तुमहामारीस
मुद्भवान् तथात्रिविधमुत्पातंमाहात्म्यंशमयेन्मम महामारीएकजनक्षयरूपातत्संभवानुपस

गीनुत्पातान्त्रिविधं आध्यात्मिकं रोगादि आधिदैवकं निर्घातवज्रपातादि आधिभौतिकं भूतप्रे
मार्कं॰ तपिशाचादिकृतं कष्टं मममाहात्म्यं कर्तृ प्रशमयेन्नाशयेत् महामारी आगमान्तरे विजयामतिभे
२२२ दभिन्ना समग्रानुपसर्गान् तथाभिदिव्यान्तरिक्षभूमिजं त्रिविधिमुत्पातं मम चरितं प्रशमयति य
233 त्रैतत्पठ्यते सम्यक् नित्यमायतने मम सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितं यत्रैतत्सम्य
गतिपठ्यते अत्र च ममैतत्स्तोत्रं यत्ना यतने नित्यं पठ्यते तदायतनं न विमोक्ष्यामि न त्यक्ष्यामि
अत एव तत्रायतने मे मम सान्निध्यं सर्वदा सर्वस्मिन्काले स्थितं अहं सर्वदैव तत्रास्थास्यामीत्य
र्थः बलिप्रदाने पूजायामग्निकार्ये महोत्सवे सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च बलिप्रदा
ने पश्वाद्युपहारसमर्पणे पूजायां गंधादिदाने अग्निदाने कार्ये अग्निहवने महोत्सवे पुत्रोत्पत्ति
विवाहादौ उच्चार्यं पाठनीयं बलिः छिन्नापूपिकाकुलमाषाद्युपहारः तद्दाने पूजायां क्रियमाणा
यामग्निकार्ये वह्नौ मंत्रकृतसंस्कारे हव्यहवनेकर्मणि महोत्सवे अशेषं पठनीयं श्रोतव्यं च २२२
जानता जानता वापि बलिपूजां तथा कृतां प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथा कृतं जा

233A

नतेन स्तोत्रपाठविधिज्ञेन अजानता संधाय पाठानभिज्ञेन प्रकारेण प्रतीच्छिष्यामि प्रतीच्छामि इदं
वलिसहितायाः पूजायाः करिष्यामीत्यर्थः परस्मैपदं छांदसं ईदृतेरात्मनेपदत्वात् प्रतीच्छिष्यामि
तिक्वचित्पाठः तत्रेच्छां प्रतीगतः प्रतीच्छः गोस्त्रियोरिति ह्रस्वत्वं आचारे क्विप् धातुसंज्ञायां ल्यट् स्म
प्रत्ययः इमागमः इतोलोपः षट्त्वं चेति साधनिका वलिसहितां पूजां प्रतिग्रहिष्यामीत्यर्थः आ
गमोक्तमत्पूजाविधानं जानता वापि हृगमहमंगीकरिष्यामि शरत्काले महापूजा क्रियते या च वा
र्षिकी तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः सर्वाबाधाविनिर्मुक्तो धनधान्यसमन्वितः म
नुष्यो मत्प्रसादेन भविष्यति न संशयः हे देवाः शारदि ऋतौ महापूजा दुर्गोत्सवलक्षणा वार्षिकी प्रति
वर्षं भवा क्रियते तस्यां क्रियमाणायां भक्तियुक्तः सर्वं ममैतन्माहात्म्यं मम सान्निध्यकारणं पशुपु
ष्पार्घदीपैश्च गंधधूपैस्तथोत्तमैः ममैवं माहात्म्यं सर्वमखंडितं मम सान्निध्यहेतु तत्रैवाहं तिष्ठा
मीत्याशयः पशुदानेन दीपैरुत्तमैः कर्पूरागुरुधूपैश्च या प्रीतिरित्यग्निमेनात्वयः अर्घ्यमष्टांगं
आपः क्षीरं कुशाग्राणि घृतं वदधितंदुलाः यवाः सिद्धार्थकाश्चैवमर्घ्यमष्टांगमुच्यते विप्राणां

भोजनैर्होमैः प्रेक्षणीयैरहर्निशं अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेणया प्रीतिर्मे क्रियते
मार्कं· सास्मिन्सकृदुच्चरिते श्रुते प्रेक्षणीयैर्महाभिषेकैः स्नानीयैर्वा अथवा मंत्रपूर्वकप्रोक्षणसं
२३४ स्कारविशिष्टैर्मद्रिषच्छागादिपशुभिः प्रेक्षणीयैरिति पाठे नटवत्कुरूपादिकृतैः कुतूहलैः ए
234 तैर्वत्सरेणयाममप्रीतिः क्रियते साप्रीतिरस्मिन्मच्चरिते सकृदेकवारं श्रुते भवति विप्राणा
मिष्टभोजनदानैस्तथा नानाहव्यहवनैः प्रेक्षणीयैर्नृत्यगीतवादित्राद्यैः अन्यैश्च मदुद्देशेन
प्रकृष्टदानैः एवं पूर्वोक्तविधिभिर्या मे प्रीतिर्वत्सरेण क्रियते साप्रीतिरेकवेलं मम चरिते श्रुते
सति भवति सकृदुच्चरिते श्रुते इति पाठे ततोच्चरिते वेति योज्यं श्रुतं हरति पापानि तथारोग्यं
प्रयच्छति रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम जन्मिनामुत्पत्तीनां कीर्तनं कथनं श्रुतं
मत्तनीरोगतां भूतेभ्यः सकाशात् मम कीर्तनं चरितं श्रुतं मत्पापानि हरति तथा जन्मिनां मनुष्या २३४
णां मारोग्यं ददाति भूतेभ्यो रक्षां करोति युद्धेषु चरितं जन्मे दुष्टदैत्यनिवर्हणं तस्मिन् श्रुते वै
रिभयं भयं पुंसां न जायते मेममपश्चरितं दुष्टदैत्यानां निवर्हणं मारणं यस्मिं चरिते तस्मिन् श्रु

2349

नेस्मति शत्रुभिः कृतं भयं न जायते युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ब्रह्मणाश्च
कृतास्ता स्त्वयं ये पठंति शृणुयां मति हे देवा युष्माभिर्याः स्तुतयः कृता या ब्रह्मर्षिभिर्ब्रह्मणा च वृता
स्ताः शुभाः कल्याणा पुष्कामममियच्छंति अरण्ये प्रांतरे वापि दावाग्निपरिवारितः दस्युभिर्वा वृतः
शून्ये गृहीतो वापि शत्रुभिः अरण्येति गहने वने प्रांतरे ग्रामयोरंतरं परिकीर्तितं प्रांतरे अतिशूरेज
न शून्ये ध्वनि वा अथवा प्रांतरे निविडे अरण्ये वा शुष्केग्निमायेक्षयावनवह्निनावेष्टितो वा शू
न्ये शून्यस्थाने दस्युभिश्चौरैरन्यैर्दुष्टजनैर्वा वृत्तः शून्यस्थाने एव शत्रुभिः गृहीतो धृतः सिंहव्या
घ्रानुयातो वा वने वा वनहस्तिभिः राज्ञा क्रुद्धेन वाज्ञप्तो वध्यो वधगतोपि वा वने सिंहप्राप्ते व्याघ्रो
नुगतः अरण्यगजैः रनुयातः वध्यो मार्याः पूर्वं वधं प्राप्तः पश्चात्क्रुद्धेन राज्ञा वध्योयमित्याज्ञप्त
इत्यर्थः अथवा निगडादिबंधगतो इति भिन्नमेव योज्यं क्रुद्धेन राज्ञा आक्षिप्तो वधूतः अथ कोप
नादिष्टो वधयोग्यो वधाय हन्तो थकेनापि वध्यो वा आघूर्णितो वा वातेन स्थितः पोते महार्णवे पत
त्सु वापि शस्त्रेषु संग्रामे अपि दारुणे महार्णवे पोते समुद्रस्य नौकाविशेषे स्थितः सन् वातेन

स्मरणंप्रापितोव्याकुलतयात्यतिशायदुःसहेषुसंग्रामिपततसुसत्सु सर्ववाधासुघोरासुवेदनाभ्यर्दि
मार्कं· तोपिवा स्मरन्ममैतच्चरितंनरोमुच्येतसंकटात् रौद्राखिलोपद्रवेषुव्याधिपीडितोममैतच्चरितंस्म
२३५ रन्दुःखान्मुच्यतेतिसर्वत्रयोज्यंमुच्येतेकर्मकर्तृतयात्मनेपदं ममप्रभावात्सिंहाद्याद्दस्यवोवै
235 रिणस्तथा दूरादेवपलायंतेस्मरंतश्चरितंमम ममचरितंस्मरतः चिंतयतः पुरुषात्सकाशान्म
मप्रभावात्सामर्थ्यात्प्रायासिंहाद्याद्दूरादेवपलायंतेस्मरंतःपुरुषस्येतिवा ऋषिरुवाच इत्यु
क्त्वासातदादेवीचंडिकाचंडविक्रमा पश्यतांसर्वदेवानांतत्रैवांतरधीयत चंडोविक्रमोयस्याः
साइतिपूर्वोक्तातत्रैवांतरधीयतपश्यतामित्यनादरेषष्ठी अंतर्धौष्ठाद्धातेःकर्मकर्तर्यात्मनेप
दं तेपिदेवानिरातंकाःस्वाधिकारान्यथापुराः यज्ञभागभुजःसर्वेःचक्रुर्विनिहतारयः तेदेवा
अपिनिरातंकानिर्भयासंतोयथापुरापूर्वंयथास्वाधिकारान्चक्रुः तवंतस्तथाएतदनंतरमपिचक्रुः २३५
विपक्षेणनिहताअरयोयेषांअर्थाद्देवा दैत्याश्च देव्यानिहतेशुंभेसर्वरिपौयुधि यगाद्विध्वंसि
केतस्मिन्महोग्रेतुलविक्रमे जगतिविध्वंसयितुंशीलमस्येतिजगद्विध्वंसिके महोग्रेअति प्राये

235A

नोग्रे अ्सारारणा विक्रमेष्टो बाहुननेवरिता दैत्याः पातालमाययुः गताइत्यन्वयः एवंभगव
तीदेवी सानित्यापिपुनःपुनः संभयः कुरुते भूप जगतः परिपालनं एवंसाभगवती षड्गुणयुक्ता
देव्यंवकापिपुनः पुनः संभूया वतीर्यहे भूमविश्वरक्षांविधत्ते तयैतमोह्यते। विश्वंसैव विश्वंप्र
सूयते सायाचिताचविज्ञानंतुष्टावृद्धिंप्रयच्छति संभूयशरीरमादायप्रसूयते उत्पादयति षट्प्रा
णाप्रसवे दैवादिकः नैयायकादिमतेविश्वपदंसत्वगुणकादिकार्यपरंसत्कार्यवदिप्रसवोभिव्य
क्तः तयैतन्मोह्यते विश्वं सैव विश्वंप्रसूयते सायाचिताच विज्ञानंतुष्टिरिद्धिंप्रयच्छति याचि
ताप्रार्थितासती विशिष्टंज्ञानं विज्ञानं तत्वज्ञानंऋद्धिमैश्वर्यंप्रयच्छति ददातितुष्टाऋद्धि मित्य
रूत्पक इतिप्रकृतिभावः संधिताया अनिनत्वाछंदसत्वाद्वासंधभावः अथवातुष्टा आसीनाऋ
दिप्रयच्छति आसउपवेसनेक्तिपूर्व्याप्तंतयैतत्सकलंब्रह्मांडंमनुजेश्वरः महाकाल्यामहाकाली
महामारीस्वरूपयासैवकालेमहामारीसैवसृष्टिर्भवत्यजानयारूपत्रयमाश्रितयाहेमनुजेश्वरम
हतोब्रह्मादीनपिकालयतिस्वाधिकारेप्रवर्त्तयतीतिमहाकालीतयामहाकाल्याएतद्ब्रह्मांडंव्या

मार्कं. २३६
236

ष्यिष्यितिसंबंधः किंभूतयामहामायासौकालश्चसर्वप्राणापभावान्निर्मितसमयः प्रलयकालोम
हाकालस्तत्रमहामारीस्वरूपया अधिकमारणशीलयासैवभगवतीकालीप्रलयसमयद्विप
रार्द्धलक्षणोमहतोब्रह्मादीनपिमारयतीति अथवामहतीमायाजनक्षयरूपासंक्षितक्रियाभ
वतिसृष्टकालेसैवअजाउत्पहीनाब्रह्माणीसृष्टिः संज्ञानक्रियाः स्थितिंकरोतिभूतानांसैव
कालीसनातनीतयासंक्रियतेसर्वजगदेतच्चराचरंपालनसमयेसैवैवैष्णवीसनातनी अवि
नाशिनीप्राणिनांस्थितिंकरोतितयापूर्वोक्तयामहामारीस्वरूपाविपद्यस्यते भावकाले
नृणांसैवलक्ष्मीवृद्धिः प्रदागृहेसैवभावेतथालक्ष्मीविनाशायोपिजायते भावकालेउदपसम
येनृणांगृहेलक्ष्मीवृद्धिंप्रददातिसैवाभावेनाशकालेलक्ष्मीविनाशायजायतेतदुहालक्ष्मीमि
त्यर्थः संपत्समयेसंपत्तिदापनीलक्ष्मीर्भवतिपश्चपरितोषितासतीवित्तंपुत्रांश्चददातितथा २३६
धर्मेधर्मश्चरणेप्रभुभलक्षणांविमलांगतिंवाविष्णुलोकगामिनीददातीति इतिश्रीदेवीमा
हात्म्यटीकायांसंग्रहेद्वादशोध्यायः ८६ एतत्तेकथितंभूतदेवीमाहात्म्यमुत्तमं एवंप्रभावसा

236A

देवीययेदंधार्यतेजगत् हेभूपसुरथमयातुभ्यमुत्तमंचतुर्वर्गदातृत्वोदेवीमाहात्म्यंवर्णितंए
वंपूर्णोपपादितिरूपः प्रभावः सामर्थ्यंयस्मात्साप्येदंजगन्मोहमापद्यतेरक्ष्यतेच विद्यात्वेये व
क्रियतेभगवद्विष्णुमायया तयात्वमेषवैश्यपश्चान्तथैवान्येविवेकिनः विद्या आत्मज्ञानंमोक्षो
पयोगित्वैववतेनप्रकारेणोवयया संसारप्राप्तिः क्रियतेतथासंसारनिवृत्तक ज्ञानमपिक्रियतेइ
त्यर्थः त्वंसुरथः एषवैश्यः समाधिः अन्येचविवेकिनस्तत्वज्ञानिनोपितथैवमोह्यंतेइत्यन्वयः त
थैवभगवतोविष्णोर्माययावद्याब्रह्मज्ञानंक्रियतेतथाचश्रुतिः विद्यांचाविद्यांचयस्तद्वेदोभ
यंसह। अविद्ययामृत्युंतीर्त्वाविद्ययाऽमृतमश्नुतेअविद्याकर्ममार्गः विद्यामुक्तिमार्गः त
पाप्रसिद्धयात्वमेषवैश्यपश्चान्येज्ञानिनश्चमोहिताः मोह्यंतेमोहमेष्यंतिचापरे तामुपैहिमहा
राजशरणांपरमेश्वरीं मोह्यंतेसंप्रतिमोहिताः प्राक् अग्रेमोहमेष्यंतिचतत्वज्ञानिनस्तयाकथंमो
ह्यंतेइतिशंकानिराकरणार्थंएवकारः तथैहीत्यत्रवृद्धिरसिपिन्वविकल्पात्गुणाः अन्यथातपइह
इतिस्थितेअगुणइत्यनेनगुणेकृतेउपेहीतिस्यात् आङ्पूर्वस्यतुआमाटोश्चेत्यनेनपररूपत्व

मेवस्मात्तूनएतेधत्य---- तिवृद्धिः हेमहाराजतां परमेश्वरी विष्णुमायामुपैहि शरणंव्रज आ
मार्कं. राधितासैवनृणांभोगस्वर्गापवर्गदा श्रीमार्कंडेयउवाच अपवर्गोमोक्षः देवीदेवैः सर्गधवैरि
२२१ तिक्वाचित्कंदेवादिभिराधितान्नृणांभोगस्वर्गापवर्गदेतिपूर्वोत्तरार्द्धयोरसंबंधश्च सैवब्रह्म
स्वरूपा आराधितासतीमोहहन्त्रीतथा भोगस्वर्गापवर्गदा ऐहिकपारलौकिकफलदायनी ए
237 कमेवयदाब्रह्मसत्यमन्यद्विकल्पिकल्पितं कोशावोः स्वस्तदामोहः एकत्वमनुपश्यतः इति हेतो
रितितस्यवचः श्रुत्वासुरथः सनराधिपः प्रणिपत्यमहाभागंतमृषिं संशितव्रतं तस्यमेधसोमु
नेः शंसितव्रत आचरतिनियमंवासोतन्नूकरणो इत्यस्यप्रतेगम्यमाने आकारस्येकारः इत्युक्त
प्रकारेणतस्यसुमेधसोमुनेर्वचः श्रुत्वासुरथः तमृषिं शंसितव्रतंसर्वोज्वलकर्माणंप्रतिप
त्य निर्विण्णोतिममत्वेनराज्यापहरणेनच जगामसद्यस्तपसेसचवैश्योमहामुने ऋषिंन २२६
मस्कृत्यराज्यावेश्यपश्च अतिममत्वेनपुत्राद्यात्मत्वेनपरमस्नेहवुध्याराज्यामहरणेनचनि
र्विण्णोविरक्तः मनूसद्यः स्तत्कालमेवतपसेतपः करणार्थंजगाममहामुनेइतिजैमिने

237A

संबोधनं संदर्शनार्थं संवायानदीपुलिनसंस्थितः सचवैश्यस्तपस्तेपेदेवीसूक्तंपरंजपन् न
द्याःपुलिनेतत्कालजलमुक्तेतटेसंस्थितःसनृपराजावैश्यश्चतत्पन्वयः देवीप्रतिपादकऋक्स
मूहःसूक्तशब्देनोच्यतेपरंउत्कृष्टंसवैश्योविकापाः संदर्शनार्थंदेव्यादर्शनमिच्छन्नदीपुलिनमा
श्रितःदेवीसूक्तंपरमुत्कृष्टंमाहात्म्यंसप्तशतिकाजपेनतपस्तेपेमहत्तपोतप्यते तौतस्मिन्पुलि
नेदेव्याःकृत्वामूर्त्तिंमहीमयीं अर्हणांचक्रतुस्तस्याःपुष्पधूपाग्नितर्पणैः महीमयींप्रशस्तमृ
त्तिकाप्रकृतिकां अर्हणांपूजांपूजा अग्नितर्पणंहोमं तौसुरथश्चवैश्यश्चतस्मिन्पुलिनेतस्यादेव्या
महीमयींमृत्तिकारूपांमूर्त्तिंकृत्वापुष्पैर्धूपैर्होमैः अर्हणांपूजांचक्रतुः निराहारौजितात्मा
नौतन्मनस्कौसमाहितौ ददतुस्तौबलिंचैवनिजगात्रासृगुक्षितं निराहारौत्यक्ताहारौयताहा
रौकदाचित् अल्पाहारौतन्मनस्कौतद्गतचित्तौसमाहितौसावधानौस्वदेहशोणितंतंबलिमुपहा
रंचददतुः एवंसमाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः परितुष्टाजगद्धात्रीप्रत्यक्षंप्राहचण्डिका ए
वंतयोर्यतात्मनोर्यत्नचित्तयोर्देव्याःसपर्यांकुर्वतोःत्रिभिर्वर्षैःसाजगज्जननीपरितुष्टासतीप्रत

ढंयथाभवतितथाप्राह देव्युवाच यत्प्रार्थितेत्वयाभूप त्वयाचकुलनंदन मत्तस्तत्प्राप्यतां सर्वं
मार्कं परितुष्टाददामिवां हे कुलनंदनहेवैश्यपमत्तोमत्सकाशात्तत्सर्वंप्राप्यतां स्वीकृतां अर्थात्युवाभ्यां
२३८ परितुष्टासती तत्सर्वंददामिप्रार्थितामेवपाठेनप्राप्यतामिति अग्रेप्राप्यतइत्यभिधानात्
238 अन्यथापुनरुक्तिःस्यादितिकेचिद्वदंतितन्मंदंपुनरुक्तेःप्राप्तिदार्ढ्यार्थत्वात्तयापिसमर्थयि
तुंप्रानेरुक्तिस्यादितिकेचिद्वदंतितन्मंदं त्वेनपुनरुक्तिभियासंप्रदायागतपाठान्यथाकरणस्या
नुचितत्वात् हेनृपत्वयायत्प्रार्थितेवैश्यत्वयाचंपदमिलद्यतेमत्तःसकाशात्तत्सर्वंप्राप्यतांक
थंतत्प्राप्तिःस्या---- परितुष्टाहंवत्तेवांयुवाभ्यांतत्सर्वंददामि मार्कंडेयउवाच ततोव
व्रेनृपोराज्यमविभ्रष्टंपन्यजन्मनि अत्रैववत्रनिजंराज्यंहतशत्रुबलंबलात् अविभ्रंशिजन्मां २३८
तरेपिविच्युतिहीनं अत्रैवास्मिन्जन्मनिपृथिव्यांबावलात्स्वसामर्थ्यात् हतंशत्रूणांबलंसैन्यंय
त्रैवंभूतंनिजंराजंववे सोपिवैश्यः ततोज्ञानंववे निर्विण्णमानसः ममेत्यहमितिप्राज्ञः संग
विच्युतिकारकं सवैश्योपिसुरथापेक्षयाजात्याहीनोपिततःसुरथवरप्रार्थनानंतरंज्ञानंग

238A

न्यापेक्षयाऽत्कृष्टं तत्वज्ञानं वक्ष्ये उत्कृष्टवरप्रार्थनयाग्यतासंपादकहेतुगर्भविशेषणं निर्विण्ण
मानस इति विषयव्यावृत्तचित्त इत्यर्थः वैराग्येपि हेतुगर्भविशेषणं प्राज्ञ इति प्रकृष्टा ज्ञानशास्त्रो
त्था बुद्धिर्विद्यते यस्यासौ प्राज्ञः कथंभूतं ज्ञानं ममेति अस्वीये स्वीयाभिधानं अहमिति अनात्म
न्यात्माभिमान इति प्राग्द्वावुपदर्शिनार्थो ईदृशोपः संगत्यविच्युतिकारणं ज्ञानमिति विशेषण त
याके चिद्दोजयंति तन्मदं ममेत्यहमित्याकारज्ञानस्य संगविच्युतिकरकत्वाभावात् देव्युवाच स्व
ल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् हत्वारि त्वारिपून स्खलितं तव राज्यं भविष्यति हे नृपते अ
स्खलितं अप्रच्युतं स्थिरं रिपून्हत्वा स्थितस्य तव तत्र स्थाने राज्यं भविष्यति तेन मितकर्तृकः क
र्थंका प्रत्यय इति न शंकनीयं अथवा हत्वा रिपून् भवान् राज्यं लप्स्यते तत्र राज्ये अस्खलितं वतव
भविष्यति इति योज्यं अस्खलिते ऐश्वर्यं प्राप्तमेवाह मृतश्च भूयः संप्राप्य जन्म देवाद्विवस्वतः
सावर्णिको नाम मनुर्भवान् भुवि भविष्यति मृतश्च सन् विवस्वतः सूर्यात् भूयो पुनर्जन्मोत्पत्तिं सं
प्राप्य सावर्णिको मनुः नामेति प्रसिद्धौ प्रसिद्धो मनुर्भवान् पृथिव्यां भविष्यति वैश्यवर्यत्वया यच्च

बोस्मत्तोभिवांछितः तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति वैश्यप वर्य वैश्यश्रेष्ठः वर्यपदे
मार्कं॰ न सुरथाद्वैलक्षण्यं प्रदर्शितं प्रयच्छामि प्रकर्षेण ददामि संसिद्ध्यै समीचीना स्वर्गादि विल
२२९ क्षणा सिद्धिर्मुक्तिस्तदर्थं तव ज्ञानं भविष्यति श्रीमार्कण्डेय उवाच इति दत्वा तयोर्देव्या यथा
231 भिलषितं वरं बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ताभ्यामभिष्टुता सती सद्यस्तत्
क्षणमेवान्तर्हिता बभूव एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः सूर्याज्जन्म समासाद्य साव
र्णिर्भविता मनुः एवमनेन प्रकारेण देव्याः सकाशात् वरमभिलषितार्थं प्राप्य क्षत्रियश्रेष्ठः
सूर्याज्जन्म समासाद्य सावर्णिरभवदिति शेषः स च मनुः मन्वंतराधिपो भविता भविष्यतीत्यन्व
यः यद्यपि सप्तसतिकाव्यां किं चित्का चित्कादिकमधिकं पठ्यते तथापि तत्पाठेन दोषः न्यू
नपाठे दोषात् इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये टीकासंग्रहे २२९
सुरथवैश्ययोर्वरप्रदानं नाम त्रयोदशोध्यायः ८१

श्रीमार्कंडेयउवाच सावर्णिकमिदंप्रोक्तंसप्तममन्वंतरंतव तथैवदेव्यामहात्म्यंमहिषासुरनाश
नं उत्पन्नयस्तयादेव्यामात्रीणांचमहाहवे तथैवसंस्तवोदेव्याचामुंडयास्तथाहवः प्रोक्तवदूत्या
स्तमाहात्म्यंवधस्तुंभयोः रक्तवीजवधस्त्वैवसर्वमेतन्नवोदितं श्रूयतांमुनिसार्दूलसावर्णिकम
थापरं दक्षपुत्रस्तसावर्णोभावीयोनवमोमनुः कथयामितस्ययेदेवामुनयोनृपाः पारामरी
चिगर्भास्तसुधर्मणस्तथासुराः भेतेतस्ताभविस्यंतिसर्वेद्वादशकागणाः तेषामिंद्रोभविष्य
तिसहस्राक्षोमहाबलः अद्भुतोनामकुलिशिमाजेद्रवरवाहनः सांप्रतंकार्त्तिकेयोसौवह्नि
पुत्रःखडाननः अद्भुतोनाममधावीतस्यमन्वंतरेमनोः मेधातिथिर्वसुःसत्योज्योतिष्मान्वपु
षास्तथा सप्तर्षिरन्यः सवनस्तथान्योहव्यवाहनः दृष्टकेतुर्धृष्टकेतुःपंचहस्तोनिरामयः पृ
थुश्रवास्तथार्चिष्मान्भूरिद्युम्नोबृहद्भयः एतेनवसुतास्तस्यदक्षपुत्रस्यतेनृपाः मनोस्तुद
शमशान्त्योब्रह्मणोमन्वंतरेद्विज मन्वंतरेतुदशमेब्रह्मनृपुत्रस्यधीमतः सुखासनोविरुद्धास्तद्वि
प्रकाराःसुराःस्मृताःशतसंख्याहितेदेवाभविष्यास्तत्रवैमुनेयुगाणांशतंभावितद्देवानांतदाशतं

शांतिरिंद्रस्तथाभावीसर्वैरिंद्रगुणैर्युतः सप्तर्षींश्चनिबोधत्वंयोभविष्यंतिवैतदा आपोमूर्त्ति
मार्कं॰ हविष्मांश्चसुकृतीसत्यएवच नाभागःप्रतिमश्चैववशिष्टश्चैवसप्तमः सुक्षेत्रश्चोत्तमौजा
२४० श्चभूरिषेणश्चवीर्यवान् शतनीकोवृषभोप्यनमित्रोयजद्रथः भूरिद्युम्नःस्वपार्श्वश्चतस्य
240 तेतनयामनोः भाविनोधर्मपुत्रस्यसावर्णस्यांतरंश्रृणु विहंगमाःकामगाश्चनिर्म्माणरतय
स्तथा त्रिःप्रकाराभविष्यंतिएकैकत्रिंशकोगणाः मासर्तुदिसाह्वस्तुनिर्माणरतयस्तुते वि
हंगमारात्रयोथमुहूर्त्ताकामगोगणाः इंद्रोवृषाख्योभवितातेषांप्रख्यातविक्रमः हवि — श्च
स्तथाविप्ररूपिरणपस्तथारुणिः विश्वरश्चनघश्चैववष्टिष्टश्चान्योमहामुनिः सप्तर्षयोत्र
रेतस्मिन्नग्नितेजाश्चसप्तमः सर्वानुगःसुशर्माचदेवानीकःपुलस्त्यजः हेमधन्वादृढायु
श्चविराधस्तत्सुतानृपाः द्वादशोरुद्रपुत्रस्यप्राप्तेमन्वंतरेमनोः सावर्णाख्यस्ययेदेवामुन २४०
यश्चश्रृणुष्वतान् सुसर्माणःसुमनसोहरितोलोहितास्तथा सुपाराश्चसुरास्तत्रपंचैतेदश
कागणाः तेषामिंद्रस्तुविज्ञेयाः ऋतधामामहाबलः सर्वैरिंद्रगुणैर्युक्तः सप्तर्षीनपिमेश्रृ

240A

रुणःद्युतिस्तपस्वीसुतपास्तपोमूर्त्तिस्तपोधनः तपोरतिस्तथैवान्यःसप्तमस्तुतपोधृतिः देव
वानुपदेवश्चदेवश्रेष्ठोविदूरथः मित्रवान्मित्रवृंदश्चभाविनस्तुसुतान्नृपाः त्रयोदशास्तुपर्याये
रौच्याख्यस्यमनोन्तरान् सप्तर्षींश्चनृपांश्चैववदतोमेनिशामय सुधामानःसुरास्तत्रयत्क
र्माणोस्तथापरे सुशर्माणःसुराश्चैतेसमस्तामुनिसत्तम महाबलोमहावीर्यःस्तेषामिंद्रो
दिवस्पतिः भविष्यत्पश्यसप्तर्षीन्नृगतेमेनिशामय धृतमानव्ययश्चैवतत्वदर्शीनिरुत्सुकः
निर्मोहःसुतपाश्चान्योनिःप्रकंपश्चसप्तमः चित्रसेनोविचित्रश्चनयवृत्तिर्भयोदृढः सुनेत्रः
क्षत्रवुद्धिःश्चसुरथश्चैवतत्सुताः इतिश्रीमार्कंडेयपुराणेरौच्यमन्वतरे ९८ मार्कंडेयउ
वाच रुचिःप्रजापतिःपूर्वंनिर्ममोनिरहंकृतः यत्रास्तमितसायीचचचारपृथिवीमिमां अनग्नि
रनिकेतत्वमेकाभारनिराश्रयं विमुक्तिसंगतंदृष्ट्वाप्रोचुःस्वपितरोमुनिं पितरऊचुः वत्स
कस्मात्वयापुण्योनकृतोदारसंग्रहः स्वर्गापवर्गहेतुत्वाद्बंधस्तेनानिशंविना गृही समस्त
देवानांपितॄणांचतथार्हणां ऋषीणामतिथीनांचकुर्वल्लोकानुपाश्नुते स्वाहोच्चारणातो

देवान्स्वधोच्चारणात्तः पितॄन् विभयंत्वमन्नदानेन भूताद्यानतिथीनपि सत्वंदैवादृणाद्बंधंबंध
मार्कं॰ मस्मदृणादपि आवाप्नोतिमनुष्यर्षिभूतेभ्यश्चदिनेदिने अनुत्पाद्यसुतादेवानसंतर्प्यपितॄंस्त
२४१ था भूतादींश्चकथंमौढ्यात्सुगतिंगंतुमर्हसि क्लेशएवहिकंपुत्रमन्यायोत्रभवेत्तव मृतस्यन
241 रकंतद्वत्क्लेशमेवान्यजन्मानि रुचिरुवाच परिग्रहेसिदुःखायपापायाधोगतेस्तथा भवत्य
तोमयापूर्वंनकृतोदारसंग्रहः आत्मानःसंक्रमोयोयंक्षयतेक्षयनियंत्रणान् समुक्तिहेतुर्न
भवत्यसावपिपरिग्रहात् प्रक्षाल्यतेतुदिवसंयदात्मानिपरिग्रहैः ममत्वपंकदिग्धोपिवि
त्रांभोभिर्वरंहितत् अनेकभवसंभूतकर्मपंकांकिलोबुधैः आत्मासद्वासनातोयैःप्रक्षा
ल्योनियतेंद्रियैः पितरऊचुः युक्तंप्रक्षालनंकर्तुमात्मनोनियतेंद्रियैः किंतुन्यायमा
र्गोयंपुत्रत्वंयत्रवर्त्तसे पंचवर्णादानैरशुभैरुधतेनभिसंधितैः फलैस्तद्योपभोगैश्चपूर्वक
र्म्मपशुभाशुभैः एवंबंधोनभवतिकुर्वतःकारणात्मकं नचबंधायतत्कर्मभवत्यनभिसं २४१
धितं पूर्वकर्म्मकृतंभोगैःक्षीयतेहर्निशंतथा सुखदुःखात्मकैर्वत्सपुण्यापुण्यात्मकैः

241A

नृणां एवंप्रक्षाल्यते प्राज्ञैरात्मावंधाचरद्भिः नत्वेवमविवेकेनपापपंकेनलिप्यते रुचिरुवा
च अविद्यापद्यते वेदेकर्ममार्गः पितामहतत्कथंकर्मणोमार्गेभवन्तो योजयंतिमां पितरऊ
चुः अविद्यासत्यमेवैतत्कर्मणोतन्मृषावचः किंतुविद्यापरिप्राप्तौहेतुःकर्मनसंशयः विहि
तात्करणात्पुंभिरसद्भिःक्रियतेतुयः संयमोमुक्तयेनासौप्रत्युताधोगतिप्रदः प्रक्षालयामी
तिभवान्वत्सात्मानंतुमन्यते विहिताकरणोद्भूतैःपापैस्त्वंतुविलिप्यसे अविद्याप्युपका
रायविषवज्जायतेनृणां अनुष्ठताभ्युपायेनवंधायाज्ञानतोहिसा तस्माद्वत्सकुरुष्वत्वंविधि
वद्दारसंग्रहः माजन्मविफलंतत्तुसंप्राप्तेन्यलौकिकं रुचिरुवाच वृद्धोहंसांप्रतंकोमेपितरः
संप्रदास्यति कन्यांतथादरिद्रायदुष्करोदारसंग्रहः पितरऊचुः अस्माकंपतनंवत्सभवतश्चा
प्यधोगतिः नूनंभाविभवित्रीचानाभिनंदसिनोवचः मार्कंडेयउवाच इत्युक्तापितरस्तस्यप
श्यतोमुनिसत्तम बभूवुःसहसादृश्यादीपावातहताइव सतेनपितृवाक्येनभृशमुद्विग्नमा
नसः कंन्याभिलाषीविप्रर्षिःपरिबभ्राममेदिनीं कन्यामलभमानोसौपितृवाक्याग्निदीपि

तः चिंतामवापमहतींचोद्विग्नमानसः किंकरोमिक्वगछामिकथमेदारसंग्रहः क्षिप्रंभवेति
मार्कं॰ तृणांयोममाभ्युदयकारकः इतिचिंतयतस्तस्यमतिर्जातामहात्मनः तपसाराधयाम्येनं
२४२ ब्रह्माणांकमलोद्भवं ततोवर्षशतंदिव्यंतपस्तेपेसवेधस आराधनायविप्रर्षिरुचिर्निय
242 ममास्थितः ततःसंदर्शयामासब्रह्मालोकपितामहः उवाचचप्रसन्नोस्मिब्रूहियत्तेभि
वांछितं ततोसौप्रणिपत्याहब्रह्माणांजगतोगतिं पितृणांवचनात्तेनयत्कर्तुममभिवांछि
तं ब्रह्माप्राहरुचिर्विप्रक्ष्वातस्याभिवांछितं प्रजापतिस्त्वंभविता स्रष्टव्याभवता स्र
ष्ट्वाप्रजासुतान्विप्रसमुत्पाद्यक्रियास्तथा कृत्वाकृताधिकारस्त्वंततःसिद्धिमवाप्स्यसि
सत्वंयथोक्तंपितृभिःकुरुदारपरिग्रहं कामंचेममभिध्यायक्रियतांपितृपूजनं तएव
तुष्टाःपितरःप्रदास्यंतितवेप्सितां पत्नींसुतांश्चसंतुष्टाकिंनदद्युःपितामहाः मार्कंडे
यउवाच इत्यृषेर्वचनंश्रुत्वाब्रह्मणोव्यक्तजन्मनः नद्याविविक्तेपुलिनेचकारपितृतर्प २४२
णं तुष्टावचपितॄन्विप्रस्तैरेभिरथादृतः एकाग्रःप्रयतोभूत्वाभक्तिनम्रात्मकोरुचि रु

242A

रुचिरुवाच नमस्येहंपितॄन्भक्त्यायेवसंत्यधिदैवतं देवैरपिहितर्प्यंतेयेश्राद्धेषुस्वधोत्तरैः न
मस्येहंपितॄन्श्राद्धेयेतर्प्यंतेमहर्षिभिः श्राद्धैर्मनोरमैभक्त्याभुक्तिमुक्तिमभीप्सुभिः नमस्येहं
पितॄन्स्वर्गेसिद्धाःसंतर्प्पयंतियान् श्राद्धेषुदिव्यैसकलैरुपहारैरनुत्तमैः नमस्येहंपितॄन्
भक्त्यायेर्च्यंतेगुह्यकैर्द्दिवि तन्मयत्वेनवांछद्भिःऋद्धिमात्यंतकींपरां नमस्येहंपितॄन्मर्त्यै
रर्च्यंतेभुवियेसदा श्राद्धेषुश्रद्धयाभीष्टेलोकपुष्टप्रदायनः नमस्येहंपितॄन्विप्रैरर्च्यंतेयेस
दाभुविवांछिताभीष्टलाभायप्रजापत्यप्रदायिनः नमस्येहंपितॄन्येवैतर्प्यंतेरण्यवासिभिः
वन्यैश्राद्धैर्यताहारैस्तपोनिर्द्धूतकल्मषैः नमस्येहंपितॄन्विप्रैर्नैष्ठिकव्रतचारिभिः येसं
यतात्मभिर्नित्यंसंतर्प्यंतेसमाधिभिः नमस्येहंपितॄन्श्राद्धैराजन्यास्तर्प्पयंतियान् क
व्यैरशेषैर्विधिवल्लोकद्वयफलप्रदान् नमस्येहंपितॄन्वैश्यैरर्च्यंतेभुवियेसदा स्वकर्माभिर
तैर्नित्यंपुष्पधूपान्नवारिभिः नमस्येपितॄन्श्राद्धायेशूद्रैरपिभक्तितः संतर्प्यंतेजगत्यत्रना
म्नाख्याताःसुकालिनः नमस्येहंपितॄन्श्राद्धेपातालेयेमहासुरैः संतर्प्यंतेसुधाहारास्त्यक्त

दंभमदैःसदा नमस्येहंपितॄन्श्राद्धैस्तर्प्यंतेयेरसातले भोगैरशेषैर्विविधैर्नागैःकामानभीप्सुभिः
मार्कं॰ नमस्येहंपितॄन्श्राद्धेसर्पैः संतर्पितान्सदा तत्रैवविधिवन्मंत्रैर्भोगसंपत्समन्वितैः पितॄन्न
२४३ मस्येनिवसंतिसाक्षाद्येदेवलोकेथमहीतलेवा तथांतरिक्षेचसुरादिपूज्यास्तेसंप्रतीच्छंतुमयो
243 पनीतं पितॄन्नमस्येपरमार्थभूतायेवैविमानेनिवसंत्यमूर्त्ताः यजंतिजलस्तमलैर्मनोभिर्यो
गीश्वराःक्लेशविमुक्तिहेतून् पितॄन्नमस्येदिवियेचमूर्त्ताःस्वधाभुजःकाम्यफलाभिसंधौ
प्रदानशक्ताःसकलेप्सितानांविमुक्तिदायेनभिसंधितेषु तृप्यंतुतेस्मिन्पितरःसमस्ताइ
च्छावतांयेप्रदिशंतिकामान् सुरत्वमिंद्रत्वमतोधिकंवावस्यात्मजंद्रोमवलंगृहाणि सूर्यस्ययेर
श्मिषुचंद्रविंबेशुक्लेविमानेचसदावसंति तृप्यंतुतेस्मिन्पितरोन्नतोयैर्गंधादिनापुष्टिमितोव्र
जंतु येषांकृतेग्नौहविषाचतृप्तिंयेभुंजतेविप्रशरीरसंस्थाः येपिंडदानेनमुदंप्रयांतितृप्यं २४३
तुतेस्मिन्पितरोन्नतोयैः येखड्गमांसेनसुरैरभीष्टैःकृष्णैस्तिलैर्दैव्यमहोरगैश्च कालेनशाकेनचम
हर्षिवर्यैःसंप्रीणितास्तेमुदमत्रयांतु कव्यान्यशेषाणिचयान्यभीष्टान्यतीवतेषाममरार्चि

243A

तानां तेषांतुप्रणानिध्यमिहात्सुपुष्पगंधांवुभोज्येषुमयाह्वतेषु दिनेदिनेयेप्रतिगृह्णतेर्घ्यामा
संतपूज्याभुविज्येष्टकासु येवत्सरांतेभ्युदयेचपूज्याःप्रयांतुतेमेपितरोत्रतृप्तिः पूज्याद्विजाना
कुमुदेंदुभासोयेक्षत्रियाणांचनवार्कवर्णाः तथाविशांकनकावदातानीलीनिभाःशूद्रज
नाश्चयेच तेस्मिन्समंतामममगंधधूपपुष्पान्नतोपादिनिवेदनेन तथाग्निहोमेनचयांतुतृप्तिं
सदापितृभ्यःप्रणतोस्मितेभ्यः येदैवपूर्वाण्यभितृप्तिहेतोरश्वंतिकव्यानिशुभाहृतानि ते
माश्चतृप्ताभूतसृजोभवंति तृप्यंतुतेस्मिन्प्रणतोस्मितेभ्यः रक्षांसिभूतान्यसुरांस्तथोग्रान्निर्णाश
यंत्वशिवंप्रजानां आद्याःसुराणांऽमरेशपूज्याःतृप्यंतुतेस्मिन्प्रणतोस्मितेभ्यः अग्नि
ष्वात्ताबर्हिषदःआज्यपासोमपास्तथा व्रजंतुतृप्तिंश्राद्धेस्मिन्पितरस्तर्पितामया अग्निष्वात्ताः
पितृगणाःप्राचींरक्षंतुमेदिशं तथाबर्हिषदःपातुयाम्यांमेपितरःस्थिता प्रतीचीमाज्यपा
स्तद्वदुदीचीमपिसोमपाः ऊर्द्धंतुअर्यमारक्षेत्कव्यवालानलोप्यधः रक्षोभूतपिशाचेभ्यो
तथैवासुरदोषतः सर्वतश्चाधिपस्तेषांयमोरक्षांकरोतुमे विश्वेविश्वभुजाराध्योधर्मोध

244

र्म्मसनातनः भूतिदोभूतिकृद्भूतिपितृणांयोगणोगणानच कल्याणः कल्पदः कर्त्ताकल्पः क
ल्पकल्पांतराश्रयः कल्पताहेतुरनघः षडितेतेगणास्मृताः वरोवरेण्योवरदोपुष्टिदस्तु
ष्टिदस्तथा विश्वपातातथाधातासप्तैतेचगणास्मृताः महान्महात्मामहितोमहिमा
वान्महाबलः गणापंचतथैवेतेपितृणांपापनाशनं सुखदोधनदश्चान्योधर्म्मदोऽन्यश्चभू
तिदः पितृणांकथ्यतेचैतत्तथागणचतुष्टयं एकत्रिंशत्पितृगणायैर्व्याप्ताखिलंजगत् तेमेत्रतृ
प्तास्तुष्यंतुयच्छंतुचसदाहितं मार्कंडेयउवाच एवंतुस्तुवतस्तस्यतेजसोराशिरुच्छ्रितः प्रादुर्बभू
वसहसागगनव्याप्तिकारकः तंदृष्ट्वासुमहत्तेजःसमाछाद्यस्थितंजगत् जानुभ्यामवनीगत्वारु
चिःस्तोत्रमिदंजगौ रुचिरुवाच अमूर्त्तानांसमूर्त्तानांपितृणांदीप्ततेजसां नमस्यामिसदातेषांध्या
निनांयोगचक्षुषां इंद्रादीनांजनेतारोदक्षमारीचयोस्तथा सप्तर्षीणांतथान्येषांतन्नामस्यामिका 244
मदान् मन्वादीनांजनेतारःसूर्याचंद्रयोस्तथा तान्नमस्याम्यहंसर्वान्पितॄंश्चोषधीषुच नक्षत्रा
णांग्रहाणांचवाय्वग्न्योर्नभसस्तथा द्यावापृथिव्योश्चतथानमस्यामिकृतांजलिः प्रजापतेःकश्यपा

244A

यसोमायवरुणायच योगेश्वरेभ्यश्चतथानमस्यामिकृतांजलिः नमोगणेभ्यः सप्तभ्योतथालोकेषुसप्तसु
स्वयंभुवेनमस्यामिब्रह्मणेयोगचक्षुषे सोमाधाराःपितृगणायोगमूर्त्तिधराश्चये नमस्यामितथासोमंपि
तरंजगतामहं अग्निरूपांस्तथैवान्यान्नमस्यामिपितॄनहं अग्नीषोममयंविश्वंयतएतदशेषतः जे
तुतेजसियेचैवसोमसूर्याग्निमूर्त्तयः जगत्स्वरूपिणश्चैवयेचब्रह्मस्वरूपिणः तेभ्योखिलेभ्योयोगिभ्य
पितृभ्योयतमानसः नमोनमोनमस्तेमेप्रसीदंतुस्वधाभुजः मार्कंडेयउवाच एवंस्तुतास्ततस्ते
नतेजसोमुनिसत्तम निश्चक्रमुस्तेपितरोभासयंतोदशोदिश निवेदितंचयत्तेनपुष्पगंधानुलेपनं त
द्भूषितानथसंतान्ददृशेपुरतस्थितान् प्रणिपत्यमुनिर्भक्त्यापुनरेवकृतांजलिः नमस्तुभ्यंनमस्तुभ्यं
मित्याहपृथगादृतः ततःप्रसन्नापितरःस्तमूचुर्मुनिसत्तमं वरंवृणीष्वेतिसतानुवाचनतकंधरः
रुचिरुवाच सांप्रतंसर्गकर्तृत्वमादिष्टंब्रह्मणामम सोहंपत्नीमभीप्सामिधन्यांदिव्यांप्रजावतीं पि
तरऊचुः अत्रैवसद्यःपत्नीतेभविष्यतिमनोरमा तस्यांचपुत्रोभवितामवतोमुनिसत्तम मन्वंतराधिपो
धीमान्त्वन्नाम्नोचोपलक्षितः त्वंचप्रजापतिर्भूत्वाप्रजाःसृष्ट्वाचतुर्विधां क्षीणाधिकारोधर्मज्ञततः

मार्कं॰ ।सिद्धिमवाप्स्यसि स्तोत्रेनानेनच नरोयोस्मान्स्तोष्यंतिभक्तितः तस्यातुष्टावयंभोगानवदास्यामोद्ध्यानमु
२४५ त्तमं शरीरारोग्यमर्थंचपुत्रपौत्रादिकंतथा वांछद्भिःसततंस्तव्याः स्तोत्रेणानेनयत्नतः श्राद्धेचयइमं
245 भक्त्याह्यस्मत्प्रीतिकरंस्तव पठिष्यंतिद्विजाग्र्याणांभुंजानानांपुरस्थितः स्तोत्रश्रवणसंप्रीत्यासन्निधाने
परेकृते अस्माभिरक्षयंश्राद्धंतद्भविष्यत्यसंशयं यद्यप्यश्रोत्रियंश्राद्धंयद्यप्युपहतंभवेत् अन्यायोपात्त
वित्तेनयदिवाकृतमन्यथा अश्राद्धैर्हैरुपहृतैरुपहारैस्तथाकृतं अकालेप्यथवादेशेविधिहीनमथापि
वा स्त्रीभिर्वापुरुषैर्वाविधैर्दंभमाश्रित्यवाकृतं अस्माकंतृप्तयेश्राद्धंतथाप्येतदुदीरणात् यत्रैतत्पठ्यतेश्रा
द्धेस्तोत्रमस्मत्सुखावहं अस्माकंजायतेतृप्तिस्तत्रद्वादशवार्षिकी हेमंतेद्वादशाब्दानितृप्तिमेतत्प्रयच्छ
ति शिशिरेद्विगुणाब्दानितृप्तिस्तोत्रमिदंश्रुतेः वसंतेषोडशसमास्तृप्तयेश्राद्धकर्मणि ग्रीष्मेषोडशचै
तत्पठितंतृप्तिकारकं विकालेपिकृतेश्राद्धेस्तोत्रेनानेनसाधिते वर्षासुतृप्तिरस्माकमक्षय्याजायतेरुचे।
शरत्कालेपिपठितंश्राद्धकालेप्रयच्छति अस्माकमेतत्पुरुषैःतृप्तिंपंचदशाब्दिकं यस्मिन्गृहेपिलिखि २४५
तमेततिष्ठतिनित्यदाः सन्निधानेकृतेतृप्तिंतत्रास्माकंभविष्यति तस्मादेतत्त्वयाश्राद्धेविप्राणांभुंजतां

245A

पुनः श्रोवणीयमहाभाग अस्माकं मार्कंडेय उवाच ततस्तस्मान्नदीमध्यादुत्तस्थौ सा मनोरमा प्र
म्लोचा नाम तन्वंगी तत्समीपे मनोरमा साचोवाच महात्मानं रुचिं समधुराक्षरं प्रणयाचनताशु
श्रुप्रम्लोचाप्सरा अतीवरूपिणि कंन्यामत्सुता द्विपदांवरः जातावरुणपुत्रेण पुष्करेण महात्मना
तां गृहाण मयादत्तां भार्यार्थे वरवर्णिनी मनुर्महामतिस्तस्यां समुत्पत्स्यति ते सुतः मार्कंडेय उवा
च तथेति तेन सा प्रोक्ता तस्मात्तोयाद्वपुष्मती उज्जहार ततः कंन्यां मालिनीनाममनामतः नद्याश्च
पुलिने तस्मिन्स मुनिर्मुनिसत्तमः जग्राह पाणिं विधिवत्समानाय्य महामुनीन् तस्यां तस्य सुतोय
ज्ञो महावीर्यो महामतिः रौच्यो भवति पितुर्नाम्ना ख्यातो त्र वसुधातले तस्य मन्वंतरे देवास्तथा सप्तर्ष
यश्च ये तनयाश्च नृपाश्चैव स्ते सम्यक् कथितास्तव धर्मवृद्धिस्तथारोग्यं धनधान्यसुतोद्भव नृ
णां भवत्यसंदिग्धमस्मिन्मन्वंतरे श्रुते पितृस्तवं तथा श्रुत्वा पितृणां च तथा गणान् सर्वान्कामानवा
प्नोति तत्प्रसादान्नरो मुने इति श्री मार्कंडेयपुराणे रौच्यमन्वंतरे पितृस्तव समाप्तः मार्कंडेय उवाच
अतः परं च भौतस्य त्वमुत्पत्तिं निशामय देवानृषींस्तथा पुत्रांस्तथैव च वसुधाधिपान् बभूवाङ्गिरसः

मार्कं॰
२४६
246

शिष्योभूतिर्नामातिकोपनः चंडशापप्रदोल्पेपिमुनिरागस्यसौम्यवाक् तत्राश्रमेमातरिश्वानववा
तिचनिष्ठुरं नातितापंरविस्तीव्रंपर्जन्योनातिकर्दमं नातिशीतंचशीतांशुःपरिपूर्णोपिरश्मिभिः
चकारभीत्यावैतस्यक्रोधनस्यातितेजसः ऋतवश्चक्रमंहित्वादृष्टेर्याश्रमजन्मसु तस्यपुष्पफ
लंचक्रुराज्ञयासार्वकालिकं नस्युरापश्चछंदेनतस्माश्रमसमीपगाः कमंडलुगताश्चैवतस्यभी
त्यामहात्मनः नातिक्लेशसहोविप्रशोभक्तोपजनोभृशं अपुत्रश्चमहाभागःसतपस्यकरोन्म
नः पुत्रकामोयताहारःशीतवातानलाहतः तस्याभीतिविनिष्क्रम्यतपस्येवमनोदधे तस्येंदु
नातितापायभास्करः अभवन्मातरिश्वाचववौनातिमहामुने अपीड्यमानोद्वंद्वैश्चसभूतिर्मु
निसत्तमः अनवाप्याभिलाषंततपसोनन्यवर्त्तत तस्यभ्रातासुवर्चाभूद्यज्ञेतेननिमंत्रितः क्रि
यासुशांतिनामानंशिष्यमाहमहामतिः प्रशांतमक्रोधनतमंविनीतंशुभकर्मणि सदायुक्तंशुभा
चारमुदारंमुनिसत्तमं भूतिरुवाच अहंयज्ञंगमिष्यामिभ्रातुःशांतेसुवर्चसः तेनाहूतस्त्वयाचेहय २४६
त्कर्त्तव्यंशृणुष्वतत् प्रतिसिंधकरागंवन्हेस्त्वयाकार्यममाश्रमे तथातथाप्रमत्तेनयथाग्निर्नशाम्यत्र

जेत् इत्याज्ञाप्यतथेत्युक्तः भूतिशिष्येणशांतिना जगामयज्ञंतंभ्रातुराहूतःसन्यवीयसा सचशांतिर्वना
यावत्समित्पुष्पफलादिकं उपानयतिहत्सपर्थंगुरोस्तस्यमहात्मनः अन्यच्चकुरुतेकर्मागुरुकर्मन्तु
सानुगः प्रशांतस्तावदनलोयोसौभूतिपरिग्रहः तंदृष्ट्वाशोनलंशांतंशांतिरत्यर्थदुःखितः भीत
श्चभूतेर्वहुधाचिंतयत्समहामतिः किंकरोमिकथंवाचमर्हत्यागमनेगुरोः मयाद्यप्रतिपंत्तव्यं
किंकृत्वासुकृतंभवेत् प्रशांताग्निमिमंधिष्ण्यंयदिपश्यंतिमेगुरुः ततोमामविश्लेषव्यसनेस
न्निजोक्ष्यति यद्यग्निमाश्रमेनात्रमग्निस्थानिकरोमितत् सर्बप्रत्यक्षदृग्भस्मसोवश्यंमाक
रिष्यति सोहंपापोगुरोस्तस्यनिमित्तंकोपपापयोः तथात्मानंनशोचामियथापापंकृतंगुरोः
दृष्ट्वात्रशांतमनलंनूनंसप्स्यतिमेगुरुः यथावापावकःकुद्धस्तथावीर्योहिसद्विजः मार्कंडेय
उवाच वहुधैवंविचिंत्यासौभीतस्तस्यमहागुरोः ययौमतिमतांश्रेष्ठशरणंजातवेदसं सचका
रस्तदास्तोत्रंसप्तार्चैयतमानसः सत्वेकचितोमेदिन्यांन्यस्तजानुःकृतांजलिः शांतिरुवाच ॐ
नमःसर्बभूतानामाधारायमहात्मने एकत्रिपंचधिष्ण्यापराजसूयेषडात्मने नमःसमस्तदेवानां

ष्टत्तिदायसुवर्चसे शुक्ररूपायजगतामशेषाणांस्थितिःप्रदः त्वंमुखंसर्बदेवानांत्वयात्तंभगवन्ह
विः प्रीणयत्यखिलांदेवांस्त्वत्प्राणाःसर्बदेवताः हुतंहविस्त्वय्यनलमेधत्वमुपगच्छति ततश्चजल
रूपेणपरिणाममुपैतितत् तेनाखिलौषधीजन्मभवत्यनिलसारथे औषधीभिरशेषाभिसुखंजीव
तिजंतवः वितन्वंतिनरायज्ञांस्त्वत्सृष्टास्वौषधीषुच यज्ञैर्देवास्तथादैत्यास्तद्वद्रक्षांसिपावकः
आप्यायतेचतेयज्ञास्त्वदाधाराहुताशन अतःसर्बस्ययोनित्वंवह्ने सर्बमयस्तथा देवतादानवा
यक्षादैत्यागंधर्वराक्षसाः मनुष्यापशवोवृक्षामृगपक्षिसरीसृपाः आप्यायंतेत्वयासर्बेसंवर्द्ध
तेचपावक त्वत्तएवोद्भवंयांतित्वय्यंतेचतथालयं आपस्त्वंजसिदेवत्वंत्वमत्सिपुनरेवताः प
चमानास्वपाताश्चप्राणिनांपुष्टिकारणं देवेषुतेजोरूपेणकांत्यासिद्धेष्ववस्थितः विषरूपेण
नागेषुवायुरूपेणपत्रिषु मानुषेषुभवक्रोधोमोहःपशुमृगादिषु अवष्टंभोसितरुषुकाठिन्यंत्वंमही
ष्टतिः जलेद्रवत्वेनभवान्जवरूपीतथानले व्यापित्वेनतथैवाग्नेसर्वस्यात्मन्यवस्थितः त्वम २४७
ग्नेसर्बभूतानामंतश्चरसिपावकः त्वमेकमाहुःकवयस्त्वामाहुस्त्रिविधंपुनः त्वामष्टधाकल्पयि

247A

त्वायज्ञवाहमकल्पयन् त्वयासृष्टमिदंविश्वंवदंतिपरमर्षयः त्वामृतेहिजगत्सर्वंसद्योनस्याद्धुताश
नतुभ्यंकृत्वाद्विजापूजांस्वकर्मविहितांगतिं प्रयांतिहव्यकव्याद्यैःस्वधास्वाहाद्युदीरणात् परि
णामात्मवीर्याणिप्राणिनांममरार्च्चित दहंतिसर्वभूतानित्वत्तोनिःक्रम्यहायना जातवेदस्त्वयासृष्टं
विश्वंचेदंमहाद्युते तथैववैदिकंकर्मसर्वभूतात्मकंजगत् नमस्तेनलपिंगाक्षनमस्तेस्तुहुताश
न पावकाद्ययनमस्तेस्तुनमस्तेहव्यवाहन त्वमेवभुक्तपीतानांपालनाद्विश्वपालकः सस्यानांपा
वककर्तृत्वात्स्रष्टात्वंजगतांतथा त्वमेवमेघस्त्वंवायुस्त्वंवीजंसस्यहेतुकं योप्यायसर्वभूतानांभू
तभव्यतथास्यसि त्वंज्योतिसर्वभूतेषुत्वमादित्योविभावसु त्वमहस्त्वंतथारात्रिरुभेसंध्येतथाभवा
न् हिरण्यरेतस्त्वंवह्नेहिरण्योद्भवकारणां हिरण्यगर्भश्चभवान्हिरण्यसदृशप्रभ त्वंमुहूर्त्तंक्षणा
श्चत्वंत्वंत्रुटिस्त्वंतथावलेः कलाकाष्ठानिमेषादिरूपेणासिजगत्प्रभो त्वमेवतदखिलंकालःपरि
णामात्मकोभवान् याजिह्वाभवतःकालोकालनिष्ठाकरीप्रभो तयानःपाहिपापेभ्योऐहिकाच्चमहा
भयात् धूम्रवर्णाचयाजिह्वाप्राणिनांगददायिनी तयानःपाहिपापेभ्योऐहिकाच्चमहाभयात् मनोभ

वायव्यपाजिह्वालांघमागुलालक्षणातपानः पाहिपापेभ्योऐहिकाद्भयमहाभयात् स्फुलिंगिनीचयाजिह्वा
मार्कं· जतःशक्लस्पपिंगलः ताहिनःपाहिपापेभ्योऐहिकाद्भयमयाभयात् यातेविश्वसृजाजिह्वाप्राणिनांसर्व
२४८ दायिनीतापिनः पाहिपापेभ्योऐहिकाद्भयमहाभयात् पिंगाक्षलोहितग्रीवाकृष्णवर्त्माहुताशनः पाहिमां
248 सर्वदोषेभ्यःसंसाराद्दुद्धरेहिमां प्रसीदवह्निःसप्तार्चिःकृशानोहव्यवाहनः अग्नेपावकशुक्रादिनमो
नामाष्टनिर्युतः अग्नेग्नेसर्वभूतानांसमद्भूतविभावसो प्रसीदेहाससंघसप्तजिह्वाराभिष्टुतममाध्यय
त्वमक्षयःकोप्यविचिंत्यरूपःसमृद्धिमानदुःप्रसहोतितीव्रः भवाव्ययंभीममशेषलोकसंवर्धकंभात्यथ
वापिवीर्यं त्वमुत्तमंतत्वमशेषसत्वहृत्पुंडरीकस्थमनंतवीर्यं त्वयाततंविश्वमिदंचराचरंहुताशनैकोवहुधा
त्वमत्र त्वमक्षयासगिरिःचवसुंधरात्वमंबरंसरविनिशाकरादिकं महोदधेजठरगतश्चवाडवोभवीन्विभुः
पिवतिपयांसिपावक हुताशनत्वमितिचपूज्यसेसदामहाक्रतोनियमपरैर्महात्मभिः अभिष्टुतःपिव
सिचसोममध्वरेवषट्कृतान्यपिचहवींषिभूतये त्वंविप्रैःसततमिहेज्यसेफलार्थंदाहेषुनलाखिलेषुगी
यसेच त्वद्धेतोर्यजनपरायणाद्विजेंद्रवेदांगान्यवगमयंतिपर्वकाले त्वंब्रह्मायजनपरस्तथैवविष्णुर्भूतेशः ३४८

248A

सुरपतिरूर्ज्जमाञ्जलेशः सूर्येंदुः सकलसुराश्च विशिष्टैः संतोष्याभिमतफलान्यवाप्नुवंति त्वं अर्च्चिभिः परम
महोपघातं दुष्टं संस्पृष्टं तव शुचि जायते समस्तं स्नानानां परममतीव भस्मना यत्संध्यायां मुनिभिरतीव से
व्यते च प्रसीद वह्ने शुचिनामधेय प्रसीद वायोरनलापि दीप्तो प्रसीद मे पावक वैद्युताद्य प्रसीद हव्याशन
पाहि मां त्वं यते वह्ने शिवं रूपं यच्च ते सप्त हेतवः तैः पाहि नः स्तुतो देव पिता पुत्रमिवात्मजं मार्कंडेय उवाच
एवं स्तुतस्ततस्तेन भगवान् हव्यवाहनः ज्वालामालावृततनुस्तस्यासीदग्रतो मुनेः देवो विभावसुः
प्रीतः स्तोत्रेणानेन वै द्विजः तं प्राह प्रणतं मेघगंभीरवागथ परितुष्टोस्मि ते विप्र भक्त्या या ते स्तु
तिः कृता वरं ददामि भवतः प्रार्थ्यतां यत्तवेप्सितं प्रीतिरुवाच भगवन् कृतकृत्योस्मि यं त्वा पश्या
मि स्वरूपिणं तथापि भक्तिनम्रस्य भगवन् श्रूयतां मम भ्रातृयज्ञं गतो देव ममाचार्यो निजाश्रमात्
आगतः स्वाश्रमे शिष्यं च त्वत्स नाथं स पश्यतु ममापराधात् संत्यक्तं यं तेधिस्त विभावसो तत्त्वयाधिष्ठितं सो
घ पूर्ववत्पश्यतां द्विजः तथान्यदपि मे देव प्रसादं कुरु शोभयदि पुत्रो विशिष्टो भवतु निरपत्यस्य मे गुरुः
। यथा च मैत्री तनये स करिष्यति मे गुरुः तथा समस्तसत्वेषु भवत्वस्य मनो मृदु यश्च त्वां स्तोष्यते नेन

मार्कं॰ प्रीतियातोस्मियेनमे स्तोत्रेणतस्यवरदोभवेतामप्रसादितः श्रीमार्कंडेयउवाच एतत्श्रुत्वावचस्त
२४९ स्यतमाहद्विजसत्तमं स्तोत्रेणाराधितोनेनगुरुर्मत्पाचपावक श्रीअग्निरुवाच गुरोरर्थेयतोब्रह्मन्प्रा
र्थितंतेवरद्वयं नात्मार्थेतेनमेप्रीतिस्त्वयंतीवमहामुने भविष्यतेतदखिलंगुरोर्यत्प्रार्थितंत्वया मैत्री
249 समस्तभूतेषुपुत्रस्यास्यभविष्यति मन्वंतराधिपश्चायंभौत्योनामभविष्यति महाबलोमहावीर्योम
हाप्रज्ञोगुरोस्तव अनेनयश्चस्तोत्रेणस्तोष्यतेमांसमाहितः तस्याभिलषितंसर्वंपुण्यंचाग्नंभविष्य
ति यज्ञेषुसर्वकालेषुतीर्थेवाहोमकर्मसु धर्म्मायपवनामेतत्ममतुष्टिकरंपरं अहोरात्रकृतेपा
पंक्षतमेतत्सकृद्विज नाशयास्यत्यसंदिग्धंममतुष्टकरंपरं अहोमकालदेशादावयोगेपरथवाहुतेः
येदोषास्तानिदंसद्यःशमयिष्यतिसंस्कृतं पौर्णमास्याममावस्यांसर्वेष्वन्येषुवैद्विज ममैषाविष्णुतो
मर्त्यैर्भवितापापनाशनः मार्कंडेयउवाच इत्युक्तोभगवानग्निःपश्यतस्तस्यवैमुनेः वभूवादर्शनः
सद्यःप्रदोयोग्निरिवानिले सचशांतिर्गतेवह्नौपरितुष्टेनचेतसा जातशांतिर्महातेजाःप्रविवेशा २४९
श्रमंगुरोः जाज्वल्यमानंददृशेगुरुधिष्ण्येनहुताशनं ददर्शपूर्ववत्प्रायततःसपरमांमुदं एतस्मि

न्वंतरेसोपिगुरुस्तस्यमहात्मनः भ्रातुर्यवीयसोयज्ञादाजगामस्वमाश्रमं तस्यागतस्यशिष्योसौचक्रे
पादाभिवंदनं गृहीतासनपूजाश्चतमाहसतदागुरुः वत्सातिहार्दंत्वयिमेतथान्येषुचजंतुषु न
विद्मिकिमिदंत्वंचेद्वत्स्यैतत्कथयाशुमे ततःसशांतिस्तत्सर्वमाचार्यायमहात्मने अग्निनाशा
दिकंविप्रसमाचष्टेयथातथं तत्श्रुत्वातंपरिष्वज्यस्नेहार्द्रनयनोगुरुः शिष्यायप्रददौवेदान्ससा
गोपांगान्महामुने भौत्योनाम्नामनुस्तस्यपुत्रोभूतेरजायत तस्यमन्वंतरेदेवान्ऋषीन्भूपांश्चमे
शृणु भविष्यस्यभविष्यांश्चगदतोमयिविस्तरात् देवेंद्रोयश्चभवितातस्यविख्यातिकर्मणः चा
क्षुषाश्चकनिष्ठाश्चपवित्राभ्राजिरास्तथा वाधावृकाश्चइत्येतेपंचदेवगणाःस्मृताः शुचिरिंद्र
स्तथातेषांत्रिदशानांभविष्यति महाबलोमहावीर्यःसर्वैरिंद्रगुणैर्युतः अग्नीध्रश्चाग्निवाहुश्च
शुचिर्युक्तोथमाधवः शुक्रोजितश्चसप्तैतेसदासप्तर्षयस्स्मृताः गुरुर्गभीरोवुध्नश्चतरश्चीनिग्नए
वच प्रीतिमांश्चप्रवीरश्चविष्णुसंक्रंदनस्तथा तेजस्वीचवलश्चैवभौत्यस्यैतेमनोःसुता चतुर्द
शमयैतंतेमन्वंतरमुदाहृतं श्रुत्वामन्वंतरानीत्थंक्रमेणमुनिसत्तम पुण्यमाप्नोतिचतथाक्षीणपाप

श्रसंततिं श्रुत्वामन्वंतरं पूर्वंधर्ममाप्नोतिमानवः स्वारोचिषस्यश्रवणात्सर्वान्कामानवाप्नुयात्
।औत्तमेधनमाप्नोतिज्ञानमाप्नोतितामसे रैवतेचश्रुतेद्दद्धिंस्वरूपांविंदतेस्त्रियं आरोग्यंपश्चा
क्षुषेपुंसांश्रुतेवैवस्वतेवलं गुणवान्पुत्रपौत्राद्यंसूर्यसावर्णिकेश्रुते माहात्म्यंब्रह्मसावर्णेधर्म
सावर्णिकेशुभां मतिमाप्नोतिमनुजोरुद्रसावर्णिकेजयं ज्ञातिश्रेष्टोगणश्रेष्टोदक्षसावर्णि
केश्रुते विशातयतिपाखिलंरौच्यंश्रुत्वानरोत्तमं देवप्रसादमाप्नोतिभौत्येमन्वंतरेश्रुते तथा
ग्निदाप्तिंपुत्रांश्चगुणयुक्तानवाप्नुयात् सर्वाण्यनुक्रमाद्यस्तुशृणोतिमुनिसत्तम मन्वंतराणि
तस्यापिशृणुयत्तांमुनिसत्तम तत्रदेवान्नृषीन्विप्रान्मनूंस्तत्तनयान्नृपान् इंद्रांश्चश्रुत्वासर्वेभ्यः
पापेभ्योविप्रमुच्यते देवेंद्रर्षिनृपांश्चान्येयेचमन्वंतराधिपाः तेप्रीयंतेतथाप्रीताःप्रयच्छंति
शुभांमतिं ततःशुभांमतिंप्राप्यकृत्वाकर्मतथाशुभां शुभांगतिमवाप्नोतियावदिंद्राश्चतुर्द्द
श सर्वेभ्यऋतवःक्षेम्याःसर्वेसौम्यास्तथाग्रहाः भवंत्यसंशयंश्रुत्वाक्रमान्मन्वंतरस्थितिः क्रमा २५०
द्विस्तर इतिश्रीमार्कंडेयपुराणेमन्वंतराणिसमाप्तं क्रौष्टुकिरुवाच भगवन्कथितासम्यकू

250A

मम मन्वंतरस्थितिः क्रमाद्विस्तरतस्त्वत्तो मया चैवावधारिता ब्रह्माद्यमखिलं वंशं भूभुजां
द्विजसत्तम श्रोतुं ममेच्छा त्वं सम्यक् भगवन् प्रब्रवीहि मे मार्कंडेय उवाच शृणु वत्स नृपाणां त्वं
अशेषाणां समुद्भवं चरितं च जगन्मूलमादौ कृत्वा प्रजापतिं अयं वंशो हि भूपालैरनेकक्रतुकृद्भि
भिः संग्रामजिद्भिर्द्धर्मज्ञैः शतसंख्यैरलंकृतः श्रुत्वा चैषां नरेंद्राणां चरितानि महात्मनां समु
त्पत्तीश्च पुरुषः सर्वपापैः प्रमुच्यते मनुर्यत्र महेक्ष्वाकुरनरण्यो भगीरथः अन्ये च शतशो भूपाः
सम्यक् पालितभूमयः धर्मज्ञा यज्विनः शूराः सम्यक् परमवेदिनः श्रुत्वा चैनं पुमान् वंशं पापौघाद्वि
प्रमुच्यते तदयं श्रूयतां वंशो यतो वंशाः सहस्रशः भिद्यते मनुजेंद्राणां अवरोहा यथा वटात् ब्रह्मा
प्रजापतिः पूर्वं सिसृक्षुर्विविधाः प्रजाः अंगुष्ठाद्दक्षिणाद्दक्षमसृजद्द्विजसत्तम वामांगुष्ठाच्च त
त्पत्नीं जगत्सूतिकरीं प्रभुः ससर्ज भगवान् ब्रह्मा जगतां कारणं परं अदितिस्तस्य दक्षस्य कन्या
जाजतशोभना तस्यां च कश्यपो धीमान् मार्त्तंडं समजीजनत् ब्रह्मस्वरूपं जगतामशेषाणां पराय
णं आदिमध्यान्तभूतं च सर्गस्थित्यंतकर्मसु यतोखिलमिदं यस्मिन्नशेषं च स्थितं द्विज यस्त्व

रूपंजगत्त्वेदंसदेवासुरमानुषं यःसर्वभूतःसर्वात्मापरमात्मासनातनः आदित्योभगवान्भास्वान्
पूर्वमाराधितस्तथा क्रोष्टुकिरुवाच भगवन्श्रोतुमिच्छामियत्स्वरूपंविवस्वतः यत्कारणाच्चादि
देवःसोभवत्कश्यपात्मजः कथंचाराधितोदेव्यासोदित्याकश्यपेनच आराधितेनचोक्तंयत्तते
नदेवेनभास्वता प्रभावंचावतीर्णस्ययथावन्मुनिसत्तम भविताकथितंसम्यक्श्रोतुमिच्छाम्य
शेषतः श्रीमार्कंडेयउवाच विस्पष्टायरमाविद्याज्योतिर्भायास्वतीस्फुटा कैवल्यंज्ञानमावि
र्भूः प्राकाश्यंसंविदेवतु बोधकश्चगतिश्चैवस्मृतिर्विज्ञानमेवच एवमादीनिरूपाणितस्या
रूपस्यभास्वत श्रूयतांचमहाभागगदतोममविस्तरात् यदिष्टष्टवानसिरवेरविर्भावोयथा
भवत् निःप्रभेस्मिन्निरालोकेसर्वतस्तमसावृते बृहदंडमभूदेकमक्षरंकारणंपरं तद्भिभेद
तदंतस्थोभगवान्प्रपितामहः पद्मयोनिःस्वयंब्रह्मायःस्रष्टाजगतांप्रभुः तन्मुखादोमिति
महानभूच्छब्दोमहामुने अभवद्भूर्भुवस्तस्मास्ततश्चस्वरनंतरं एताव्याहृतयस्तिस्रःस्वरूपंतद्वि २५२
वस्वतः ओमित्यस्मात्स्वरूपात्तुसूक्ष्मरूपंरवेःकृतं ततोमहानितिस्थूलंजनःस्थूलतरंततः

251A

ततः तपःसत्यामितिमूर्त्तानितानिसत्तधा ।नित्यंतस्यस्वरूपाणिभवंतिनभवंतिच अभावंभावयत्भावो
यतोगच्छत्यसंश्रयं आद्यंयत्परमंसूक्ष्मंअरूपंरूपसंज्ञयं ओमित्युक्तंमया।विप्रतत्परंब्रह्मतद्वपुः इ
तिमार्कंडेयपुराणे ९१ मार्कंडेयउवाच तस्मादेडाद्विभिन्नात्तुब्रह्मणोव्यक्तजन्मनः ऋचोबभूवुः
प्रथमंप्रथमाद्वदनान्मुने जपापुष्पनिभाःसद्यस्तेजोरूपास्यसंधृताः पृथक्पृथक्विभिन्नाप्य
रजोरूपामहात्मनः यजूंषिदक्षिणाद्वक्त्रादनिबद्धानिकांचनं यादृग्वर्णंतथावर्णान्यसंहति
धराणिवै पश्चिमंयद्विभोर्वक्त्रंब्रह्मणःपरमेष्ठिनः आविर्भूतानिसामानिततःकुंदसितान्यथा
।अथर्वाणमशेषेणभिन्नांजनसमप्रभं घोराघोरस्वरूपंतदाभिचारेकप्रांतिनं उत्तरात्प्रकटीभूतं
वदनात्तस्यवेधसः मुखंसत्वतमःप्रायंसौम्यासौम्यस्वरूपवत् तत्रोरजोगुणःसत्वंयजुषांचगुणो
मुने तमोगुणानिसामानितमःसत्वमथर्वसु एतानिज्वलमानानितेजसाप्रतिमानवै पृथक्पृथ
गवस्थानभाञ्जिपूर्वमिवाभवत् ततस्तदाद्यंयत्तेजओमित्युक्ताभिप्रास्यते तस्यानुभावाद्यंतेजस्तत्स
माहृत्पसंस्थितं तथायजुर्मयंतेजोयच्चसाम्नांमहामुने एकत्वमुपयातानिपरंतेजसिसंश्रयं प्रां

मार्कं· तिकंपौष्टिकंचैवतथाचैवाभिचारिकं ऋगादिषुत्रयंब्रह्मन्त्रितयंत्रिषयोगमत् ततोविश्वमिदंसघत
२५२ मोपायात्सुनिर्म्मलो ।विनावनीयांविश्वेषेतिर्यगूर्ध्वमधस्तथा ततस्तन्मंडलीभूतंछांदसंतेजउत्तमं
परेणतेजसाब्रह्मन्नेकत्वमुपगम्यतत् आदित्यसंज्ञामगमदाद्यावेवयतोभवत् ।विश्वस्यास्यमहा
252 भागकारणांचाव्ययात्मकं प्रातर्मध्यंदिनेचैवतथाचैवापराह्णिके त्रयीतपतिसाकालेऋग्यजुःसाम
संज्ञिता ऋचस्तपंतिपूर्वाह्णेचयजूंषिच सामानिचापराह्णेतुतपंतिमुनिसत्तम शांतिकंऋग्जुपूर्वा
ह्णेयजुःस्वंतपश्चपौष्टिकं अपराह्णेस्थितंनित्यंसामस्त्वेवाभिचारिकं सृष्टेचऋग्मयोब्रह्मास्थितोवि
ष्णुयजुर्मयः रुद्रःसाममयोतेचतस्मात्तस्याशुचिर्ध्वनिः तदेवंभगवान्भास्वान्वेदात्मावेदसंस्थितः
वेदविद्यात्मकश्चैवपरःपुरुषउच्यते सर्गस्थित्यंतहेतुःसरजःसत्वादिकान्गुणान् आश्रित्यब्रह्मवि
ष्ण्वादिसंज्ञामभ्येतिशाश्वतः देवैःसवेद्यःसतुवेदमूर्त्तिरमूर्त्तिराद्योखिलमूर्त्तिमूर्त्तिः विश्वाश्रयंज्योति
रवेद्यधर्माधर्मावदातःपरमःपरेभ्यः इतिश्रीमार्कंडेयपुराणेवेदोत्पत्तिः ९२ मार्कंडेयउवाच तस्य २५२
संतप्यमानस्यतेजसोर्ध्वमधस्तथा ।सिसृक्षुश्चिंतयामासपद्मयोनिःपितामहः सृष्टिःकृतापिमेनाशं

252A

अयास्मत्यतितेजसा भास्वतः सृष्टिसंहारस्थितिहेतो महात्मनः अपारगाः प्राप्तिनः सर्वे आपः पृष्यंतिते
जसा नचांभसाविनासृष्टिर्विश्वस्यास्य भविष्यति इति संचिंत्य भगवान् स्तोत्रं भगवतो रवेः चकार तन्म
यो भूत्वा ब्रह्मा लोकपितामहः ब्रह्मोवाच नमामियन्मयंसर्वमेतत्सर्वमयश्च यः विश्वमूर्त्तिःपरंज्योतिर्यं
तु ध्यायंति योगिनः यस्त्वृङ्मयो यो यो यजुषांनिधानंसाम्नांच यो यो निरचिंत्यशक्तिः त्रयीमयःस्थूलतया
र्द्धमात्रा परस्वरूपो गुणतया योग्यः तं सर्वहेतुं परमं च वेद्यं आद्यं परंज्योतिरवाच्यरूपं स्थूलं च वेदात्मत
या नमस्ये भास्वंतमाद्यं परमं परेभ्यः सृष्टिं करोमि यदहं तव शक्तिराद्या तत्प्रेरितो जलमहीपवनाग्निरूपा
देहादिकं सकलदेहवतामशेषमात्मेच्छया स्थितलयावपितद्विदेव वह्नित्वमेव जलशोषणतः पृथिव्यां
सृष्टिं करोषि जगतां च तथा विपाकं व्यापित्वमेव गगनं पवनस्वरूपस्त्वं पंचधा जगदिदं परिपासि सृष्टिं यज्ञै
र्यजंति परमार्थविदो भवंतं विष्णुस्वरूपमखिलेष्टिमयं विवस्वन् ध्यायंति चापि यतयो नियतात्मचित्ताः
सर्वेश्वरं परममात्मविभूतिकामः नमस्ते वेदरूपाय यज्ञरूपाय ते नमः परब्रह्मस्वरूपाय चिंत्यमानाय
योगिभिः उपसंहर तेजस्त्वं तेजसः संहतिस्तव सृष्टेर्विघाताय विभो सृष्टौ चाहं समुद्यतः श्रीमार्कंडे

य उवाच इत्येवं संस्तुतो भास्वान् ब्रह्मणा सर्गकारणं उपसंहृतवांस्तेजः परं स्वल्पमधारयन् चकार च ततः सृ
ष्टिं जगतः पद्मसंभवः यथान्येषु महाभाग पूर्वकल्पांतरेषु वै देवासुरादिमर्त्यांश्च पश्वादीन् वृक्षवीरु
धिः ससर्ज्ज पूर्ववद्ब्रह्मा नरकांश्च महामुने श्रीमार्कंडेयपुराणे सूर्य्यस्तवः ९२ श्रीमार्कंडेय उवाच
सृष्ट्वा जगदिदं ब्रह्मा प्रविभागमथाकरोत् वर्णाश्रमसमुद्रादिद्वीपानां पूर्ववद्यथा देवदैत्योरगादीनां
रूपस्थानानि पूर्ववत् वेदेभ्य एव भगवान् अकरोत्कमलोद्भवः ब्रह्मणस्तनयो योभून्मरीचिरिति वि
श्रुतः कश्यपस्तस्य पुत्रोभूत्कश्यपो नाम काश्यपात् दक्षस्य तनया ब्रह्मंस्तस्य भार्यास्त्रयोदश बह्व
स्तत्सुताश्चासन् देवदैत्योरगादयः अदितिर्जनयामास देवांस्त्रिभुवनेश्वरान् दैत्यान् दितिर्दनुश्चोग्रान् दा
नवान् भूरिविक्रमान् गरुडारुणौ च विनताय यक्षरक्षांसि चैव सा कंद्रूः सुषुवे नागान् गंधर्वान् सुषुवे
मुनिः क्रोधायाजज्ञिरे कन्या रिष्टायाचाप्सरोगणाः ऐरावतगणाः । द्वितीया वै समुत्पन्नाः कश्यपस्येति संतति
ः तस्याश्च पुत्रदौहित्रपौत्रदौहित्रकादिभिः व्याप्तमेतज्जगत्सूत्या तेषां तासां च वै मुने तेषां कश्यपपुत्राणां प्र २५२
धाना देवतागणाः सात्विका राजसास्त्वन्ये तामसाश्च मुनेगणाः देवान् यज्ञभुजश्चक्रे तथा त्रिभुवनेश्वरान्

ब्रह्माब्रह्मविदांश्रेष्टपरमेष्टीप्रजापतिः ततस्तेमहिताःसर्बेसपत्नादैत्यदानवाः यासांप्रसूतिरखगामा
श्रेपेनभासफ्तुकादयः रराया:पादपाःपाताःप्रवेपाश्वसरोग— जपिनश्चानवनूविप्रवलिनोदैत्यदानवाः
ततोनिराकृतान्युत्रान्भुजभ्वक्रेतथात्रिभुवने पुत्रान्दैत्येयैर्दानवैस्तथा हृतंत्रिभुवनंदृष्ट्वाऽदितिर्मुन
सत्तम आच्छिन्नान्यज्ञभागांश्चक्षुधासंपीडितान्भृशं आराधनायसवितुःपरंयत्नंप्रचक्रमे एकाग्रा
नियताहारापरंनियममास्थिता तुष्टावतेजसांराशिंगगनस्थंदिवाकरं अदितिरुवाच नमस्तुभ्यं
परंसूक्ष्मंसौघुम्नंविभ्रतेऽतुलं धामधामवतामीशधाम्नामाधारशाश्वतः जगतामुपकारायतथा
पस्तवगोपतेः आददानस्ययद्रूपंतीव्रंतस्मैनमाम्यहं गृहीतमष्टमासेनकालेनेंडुमयंरसं वि
भ्रतस्तवयद्रूपमतितीव्रंनतास्मितेः तमेवमुंचितःसर्बरसंवैवर्षणायच रूपमाप्यायकंभास्वन्त
स्मैमेघात्मयनेनमः वायूत्सर्गाविनिष्पन्नमशेषंचौषधीगणां पचतस्त्वथयद्रूपंभास्करंतंनमाम्य
हं यच्चरूपंतवातीवहिमोत्सर्गादिशीतलं तत्कालेसस्यकालेयोपायतरोगतन्नमाम्यहं नातितीव्रं
चयद्रूपंनातिशीतंचयत्तव वसंतर्तौचिहेमंतेतस्मैदेवनमोस्तुते आप्यायकमशेषाणांदेवानाममला

त्मकं पितॄणांचनमस्तस्मैसम्यकूयज्ञैकहेतवे यद्रूपंधारणायैकंवीरुधाममृतात्मकं पीयतेदेवपितृभि
स्तस्मैसोमात्मनेनमः आप्यायदर्करूपाभ्यांरूपंविश्वमिदंतव समेतमग्नीषोमाभ्यांनमस्तस्मैगुणात्म
ने यद्रूपमृग्यजुःसाम्नामैक्येनतपतेतव विश्वमेतत्त्रयीसंज्ञंनमस्तस्मैविभावसो यंतुतस्मात्परंरूपंओ
मित्युक्ताभिशब्दितं अस्थूलंस्थूलमात्रंचनमस्तस्मैसनातनः मार्कंडेयउवाच एवंसानियतादेवीचक्रे
स्तोत्रमहर्निशं। निराधाराविवस्वंतमाराधायषुर्मुने ततःकालेमहताभगवान्तपनोमुने प्रत्यक्षता
मगीस्तस्यादाक्षायिण्याद्विजोत्तम सादर्दशमहाकूटंतेजसोंवरसंस्थितं भूमौचसंस्थितंभास्वनूज्वा
लामालातिदुर्दृशं तंचदृष्ट्वाततोदेवीसंत्रासंपरमागता जगदाद्यप्रसीदेतिनत्वांपश्यामिगोपते यथा
दृष्टवतीपूर्वंमंवरस्थंसुदुर्दृशं संघातंतेजसस्ताहृकूरह्पश्यामिभूतले प्रसादंकुरुपश्येयंयद्रूपं
तेप्रभाकर भक्तानुकंपकविभोभक्ताहंपाहिमेसुतान् त्वंधाताविसृजसिविश्वमेतदेकस्त्वंपातास्थि
तिकरणायसंप्रवृत्तः त्वय्यंतेलयमखिलंप्रयातिचैतत्त्वत्तोअन्योनहितपनास्तिसर्वभूतान् त्वंब्रह्मा २५४
हरिहरसंज्ञितस्त्वमिंद्रोवित्तेशःपितृपतिरंबुपःसमीरः त्वंसोमोग्निगतमहीधरःस्वरूपःकिंस्तव्यंतव

254A

सकलात्मरूपधाम्नः यज्ञैस्त्वामनुदिनमात्मकर्मसक्तास्त्वत्तौ विविधपदैर्द्विजायजंति ध्यायंतोविनिय
तचेतसोनवंतंयोगस्थाः परमपदंप्रयांतिमर्त्याः तपसिपचसिविश्वंपासिभस्मीनृकरोषि प्रकटयसिम
यूखैर्ह्लादयस्यंतुगर्भैः सृजसिकमलजन्मापालयस्यच्युताख्यः रूपयसिचयुगांतेरुद्ररूपीत्वमेकः इ
तिश्रीमार्कंडेयपुराणेअदितिजतस्तव ए४ श्रीमार्कंडेयउवाच ततःसतेजसस्तस्मात्आविर्भूतोविभा
वसुः अदृश्यततदादित्यस्तप्तताम्रोपमप्रभुः अथतांप्रणतांदेवींतस्यसंदर्शनात्मने प्राहभास्वान्वृणु
ष्वेष्टंवरंमत्तोयमिच्छति प्रणताशिरसासाचजानुपीडितमेदिनी प्रत्युवाचविवस्वंतंवरदंसमुपस्थितं
देवप्रसीदपुत्राणांहृतंत्रिभुवनंमम यज्ञभागाश्चदैतेयैर्दानवैश्चबलाधिकैः तंनिमित्तंप्रसादंत्वंकु
रुष्वममगोपते अंशेनतेषांभ्रातृत्वंगत्वानाशयतद्रिपून् यथामेतनयाभूयोयज्ञभागानुजः प्रभो भव
युरधिपाश्चैवत्रैलोक्यस्यदिवाकरः तथानुकंपांपुत्राणांसुप्रसन्नोरवेमम कुरुप्रपन्नार्त्तिहरस्थितिक
र्त्तात्वमुच्यसे श्रीमार्कंडेयउवाच ततस्तामाहभगवान्भास्करोवारितस्करः प्रणतामदितिंविप्रप्रसाद
सुमुखोविभुः सहस्रांशेनतेगर्भेसंभूयाहमशेषतः त्वत्पुत्रशत्रून्दितेनाशयाम्याशुनिर्वृतः इत्युक्त्वाभ

मार्कं·
२५५
255

गवान्भास्वान्स्त्रतर्द्धानमुपागमत् ।निष्पन्नासापितपसासंप्राप्ताखिलवांछिता ततोरस्मिसहस्रांशुसु
षुम्नाख्योरवेकरः विप्रावतारंसंचक्रेदेवमातुरथोदरे कृछ्रचांद्रायणादीनिसाचक्रेतुसमाहिता शुचिः
संधारयाम्येनंदिव्यंगर्भमितिद्विज ततस्तांकश्यपःप्राहकिंचित्कोपप्लुताक्षरं किमारयसिगर्भांडमिति
नित्योपवासिनो साचतंप्राहगर्भांडमेतत्पश्येतिकोपना नमारितोविपक्षाणांमृत्युरेयंभविष्यति इ
त्युक्त्वासातदागर्भमुत्ससर्जसुरारणिः जाज्वल्यमानंतेजोभिःपत्युर्वचनकोपिता तंदृष्ट्वाकश्यपो
गर्भमुद्यद्भास्करवर्चसं तुष्टावप्रणतोभूत्वाऋग्भिराद्याभिरादरात् संस्तूयमानःसतदागर्भांडात्प्र
कटोभवत् पद्मपत्रसवर्णाभस्तेजसाध्वस्तदिङ्मुखः अथांतरिक्षादाभाष्यकश्यपंमुनिसत्तमं स
तोयमेघगंभीरावागुवाचाशरीरिणी मारितंचयतःप्रोक्तमेतदंडयादितेः तस्मान्मुनेसुतस्तेयंमार्तं
डाख्योभविष्यति सूर्याधिकारंचविभुर्जगत्येषकरिष्यति हनिष्यत्यसुरांश्चायंयज्ञभागहरानरीन्
देवानिशम्येतिवचोगगनात्समुपागतं प्रहर्षमतुलंयातादानवास्तेहतौजसः ततोयुद्धायदैतेया २५५
नाजुहावशतक्रतुः सहदेवैर्मुदायुक्तोदानवास्तंददाभ्ययुः तेषांयुद्धमभूद्घोरंदेवानामसुरैसह

255A

ग्रस्त्रास्त्रदीप्तसंदीप्तसमस्तभुवनांतरं तस्मिन्युद्धे भगवता मार्त्तंडेन निरीक्षिताः तेजसा दह्यमानास्ते भ
स्मीभूतमहासुराः ततः प्रहर्षमतुलं प्रापुः सर्वे दिवौकसः तुष्टुवुस्तेजसां योनिं मार्त्तंडमदितिं तथा स्वा
धिकारं ततः प्रापुर्यज्ञभागांश्च पूर्ववत् भगवानपि मार्त्तंडः स्वाधिकारं यथाकरोत् कदंबपुष्पवज्ज्वा
स्वान् अधश्चोर्ध्वं वरश्मिभिः वृत्तोग्निपिंडसदृशो दध्रे नातिस्फुटं वपुः इति श्रीमार्कंडेयपुराणे मार्त्तं
डोत्पत्तिरिति ८५ मार्कंडेय उवाच ततस्तस्मै ददौ कन्यां संज्ञानाम विवस्वते प्रसाद्य प्रणतो भूत्वा
विश्वकर्मा प्रजापतिः वैवस्वतस्य संभूतौ मनोरुषिं परांगते पूर्वमेव तवाख्यातं मयैतदाखिलं द्वि
ज त्रीण्यपत्यान्यसौ तस्यां जनयामास गोपतिः द्वौ पुत्रौ समहाभागौ कन्यां च यमुनां मुने मनुर्वैव
स्वतो ज्येष्ठः श्राद्धदेवः प्रजापतिः तेषां यमो यमी चैव यमसौ संबभूवतुः तत्तेजोभ्यधिकं चैवं मार्त्तं
डस्य विवस्वतः तेनातितापयामास त्रैलोक्यं सचराचरं गोलाकारं तु तद्दृष्ट्वा संज्ञा रूपं विवस्वतः
अ हंती च तत्तेजः स्वां छायां वीक्ष्य साब्रवीत् संज्ञोवाच अहं यास्यामि भद्रं ते स्वकं च भवनं पितुः
निर्विकारं त्वयाप्यत्र स्थेयं मच्छासनात् शुभे इमौ च दारकौ मह्यं कन्या च वरवर्णिनि संभाव्यैव

मार्क॰ चाख्येयं इदं भगवते त्वया छायोवाच आकेशग्रहणाद्देवि आशापान्नैव कर्हिचित् आख्यास्यामि
२५६ गतं तु भयं गच्छ तां यत्र वांछितं इत्युक्ता छायया संज्ञा जगामाभि पितृमंदरं तत्रावसत्पितृगृहे किंचित्का
लं शुभेक्षणा भर्तुः समीपं याहीति पित्रोक्ता सा पुनः पुनः आगच्छद्वडवा भूत्वा कुरून्विप्रोत्तरांस्ततः त
256 त्र तेपे तपः सा तु निराहारा महामुने पितुः समीपं यातायाः संज्ञाया वाक्यतत्परा तद्रूपधारिणी छाया
भास्करं समुपस्थिता तस्यां च भगवान्सूर्यः संज्ञेयमिति चिंतयन् तथैव जनयामास द्वौ पुत्रौ कंन्यकां
तथा पूर्वजस्य मनोस्तुल्यः सावर्णस्तेन सोभवत् यस्तयोः प्रथमं जातः पुत्रयोर्द्विजसत्तमः द्विती
योयोभवच्चान्यस ग्रहोयः शनैश्चरः कंन्याभूत्तपती तां तु वव्रे संवरणो नृपः संज्ञा तु पार्थिवी तेषां
आत्मजानां तथाकृतवती सती मनुस्तत्क्षांतवांस्तस्या यमस्तस्या न चक्षमे बहुशो याच्यमानस्तु
पितुः पत्न्यास्तु दुःखितः स वै कोपाच्च भाविनोर्थस्य वै बलात् पदा संतर्जयामास छाया संज्ञां ततो
यमः तं शशाप ततः क्रुद्धा संज्ञाया पार्थिवी भृशं छायोवाच पदा संतर्जसे जन्मां पितृभार्यां गरीय २५६
सी तस्मात्तवैष चरणः पतिष्यति न संशयः यमस्तु तेन शापेन भृशं पीडितमानसः मनुना सह धर्मा

2.56A

त्मासर्व्वंपित्रेनिवेदयन् यमउवाच स्नेहेनतुल्यमस्मासुमातादेवनवर्त्तते ।विसृज्यज्यायसोथस्मान्
कनीयांसोबुभूर्षति तस्यामयोद्यतःपादोननुदेहेनिपातितः बाल्याद्वायदिवामोहान्तज्जवान्क्षंतु
मर्हति शप्तोहंतातकोपेनजनन्यातनयोयतः ततोनमस्त्वंजननीममैषातपतांवरः विगुणेष्वपिपुत्रे
षुनमाताविगुणापितः पादस्तेपततांपुत्रकथमेतत्प्रचक्षते तवप्रसादाच्चरणोनपतेत्भगवन्यथा
मातृशापादयंमेद्यतथाचिंतयगोपते रविरुवाच असंशयमिदंपुत्रभविष्यत्यत्रकारणं येनत्वामवि
शत्क्रोधोधर्म्मज्ञंसत्यवादिनं सर्वेषामेवशापानाप्रतिघातोहिविद्यते नतुमात्राभिशप्तानांक्वचिच्छापनि
निवर्त्तनं नशक्यमेतन्मिथ्यातुकर्तुंमातुर्वचस्तव किंचित्तेसंविधास्यामिपुत्रस्नेहादनुग्रहं कृमयो
मांसमादायप्रयास्यंतिमहीतले कृतंतस्यवचःसत्यंत्वंचत्रातोभविष्यति मार्कंडेयउवाच आदित्य
स्त्वब्रवीच्छायांकिमर्थंतनयेषुच तुल्येष्वप्यधिकस्नेहएकत्रक्रियतेत्वया नूनंनैषांत्वंजननीसंज्ञाका
पित्वमागता विगुणेष्वप्यपत्येषुमाताशापंनदास्यति सातत्परिहरंतीदंनवाचक्षेविवस्वते सचात्मानं
समाधाययुक्तस्तत्वमपश्यत सचतमुद्यतंदृष्ट्वाच्छायासंज्ञादिवस्पतिं भयेनकंपिताब्रह्मन्यथावृत्तंन्य

वेदयन् विवस्वांस्ततः क्रुद्धः कृत्वाध्वसुरमभ्यगात् सचापि तं यथान्यायमर्चयित्वा दिवाकरं । निर्द
ग्धुकामं रोषेण प्रशांतयामास सुव्रत विश्वकर्मोवाच तवातितेजसा व्याप्तमिदं रूपं सुदुःसहं असहं
तीतु तत्कं द्यां वनेचरति वै तपः इत्युक्ते तेन भगवानघ स्वां भार्यां ब्रह्मचारिणीं रूपार्थं भवतोरण्ये चरंतीं सु
महत्तपः मत्तमेव ब्रह्मणो वाक्यं यदि ते देव रोचते रूपं निर्वर्त्तयाम्यद्य तव कांतं दिवस्पते मार्कंडेय उवाच
यतो हि भास्वतो रूपं प्रागासीत्परमंडलं ततस्तथेप्सितं प्राह त्वष्टारं भगवान्हरिः विश्वकर्मा मनुज्ञा
तः प्राक द्वीपे विवस्वता भ्रमिमारोप्य तत्तेजः शातनायोपचक्रमे भ्रमताशेषजनतानाभिभूतेन भास्व
ता समुद्रादि विनोपेता आरुरोह महीनभः गगनं चाखिलं विध्वस्तचंद्रग्रहतारकं अधोगतं महाभा
गव भूवाक्षिप्तमाकुलं विक्षिप्तसलिलाः सर्वे वभूवुश्च तथाब्धयः व्यभिद्यंत महाशैलाः शीर्णसानुनि
बंधनाः ध्रुवाधाराण्यनेकानि धिष्ण्यानि मुनिसत्तम भ्राम्यद्रश्मिनिबंधानि त्वधो जग्मुः सहस्रशः वेग
भ्रमणसंजातवायुक्षिप्ताः समंततः व्यशीर्यंत महामेघा घोररावविराविणः भास्वन्भ्रमणविभ्रांतभू
म्याकाशमहीतलं जगदाकुलमत्यर्थं तदासीन्मुनिसत्तम त्रैलोक्ये सकले विप्र भ्रममाणे महर्षयः दे

2-57A

वाप्यब्रह्मणासार्द्धंनास्त्वंतमभितुष्टुवुः आदिदेवोसिदेवानांजातमेतत्त्वयंतव सर्गस्थितंतकालेषु
त्रिधाभेदेनतिष्टसिस्वस्तितेस्तुजगन्नाथधर्मरस्मेहिमाकर जुषस्वशांतिंलोकानांदेवदेवदिवाकरः इंद्रश्चा
गत्यतेदेवंलिख्यमानमथास्तुवत् जयदेवजगन्व्यापन्प्राप्स्वज्जयजगत्पते ऋमयश्चततःसप्तवशिष्टर्षिपु
रोगमाः तुष्टुवुर्विधैःस्तोत्रैःस्वस्तिस्वस्तेतिवादिनः वेदोक्ताभिरथाग्र्याभिर्वालखिल्याश्चतुष्टुवुः ऋभि
राद्याभिभास्वंतंलिख्यमानंमुदायुताः त्वंनाथमोक्षकांक्षाणांमोक्षोध्येयस्त्वंध्यायिनांपरः त्वंगतिःसर्वभू[illegible]
कर्मकांडनिवर्त्तिनां त्वंप्रजाभ्योस्तुदेवेशशंनोस्तुजगतांपते शंनोस्तुद्विपदेनित्यंशंनश्चास्तुच[illegible]ष्पदे
दे ततोविद्याधराणांचयक्षराक्षसपन्नगाः कृतांजलिपुटःसर्वैःशिरोभिःप्रणतारविं ऊचिरेवविधावा
चोमनःश्रोत्रसुखावहा सह्यंभवतेतेजोभूतानांभूतभावनः ततोहाहाहूहूश्चैवनारदस्तंवुरुस्तथा उ
पगांनुसमारब्धागांधर्वकुशलारविं खड्जमध्यमगांधारग्रामत्रयविशारदाः मूर्छनाभिश्चतानाभिःसुप्र
योगैःसुखप्रदं विश्वाचीचघृताचीचउर्वशिप्रथतिलोत्तमा मेनिकासहजन्याचरंभाचाप्सरसांवरा नन्नतुर्ज
गतामीशेलिख्यमानेविभावसौ हावभावविलासाद्याःकुर्वंत्योविनयान्बहून् प्रावाद्यंततस्तत्रवीणावेणा

दिऊंरा: पणवापुष्कराश्चैवमृदंगापटहानका: देवदुंदुभय: शंखाशतशोथसहस्रश: गायद्भिश्चैवगांधर्वैर्नृत्य
द्भिश्चाप्सरोगणै: तूर्यवादित्रघोषैश्चसर्वंकोलाहलीकृतं तत: कृतांजलिपुटाभक्तिनम्रात्ममूर्त्तय: लिख्यमा
नंसहस्रांशुप्रणेमु:सर्वदेवता: तत:कोलाहलेतस्मिन्सर्वदेवसमागमे तेजस:शातनंचक्रे।विश्वकर्माश
नै:शनै: इतिहिमजलघर्मकालहेतोर्हरकमलासनविष्णुसंस्तुतस्य तनुपरिलिखनंनिशाम्यसम्यकृत्र
जंतिदिवाकरलोकमायुषोंते इतिश्रीमार्कंडेयपुराणेमार्त्तंडलिखिनंनाम ९६ मार्कंडेयउवाच लिख
मानस्यवैभानोर्विश्वकर्माप्रजापति: उद्भूतकिरणास्तोत्रमिदंचक्रेविवस्वत: विवस्वतेप्रणतजनानुकंपि
नेमहाजवेसमजवसमसप्तये सुतेजसेकमलजलाववोधिनेनमस्तम:पटलपुटावपाटने पावनातिशयाय
एपकर्मणोनेककामविषयप्रदायने भासुरामलमयूषमालिनेसर्वभूतहितकारिणेनम: अजायलोकत्रयभा
वनायभूतात्मनेगोपतयेवृषाय नमोमहाकरुणिकोत्तमायसूर्यायचक्षु:प्रभवालकाय विवस्वतेज्ञानभृतें
तरात्मनेजगत्प्रतिष्ठाजगद्धितैषिणे स्वयंभुवेनिर्मलकोत्तमायसुरोत्तमायामिततेजसेनम: करामुदया २५८
चलमौलिरुचि:सुरगणगीतगरिष्टगुणा: त्वमुरुमयूषसहस्रवपुर्जगतिविभासितमांसिरुदन् भवतिसुरा

258A

सनमदाङ्गवतिविलोहितविग्रहता मिहिरविभासितयासुतरांत्रिभुवनभावनभानिकरैः रथमधिरुह्यसमावयवं
रुचिराविकल्पितदिव्यहयं सततमखिन्नतयाभगवन्चरसिजगद्धितवद्धरसः अमृतमयेनरसेनसमंविबुधपि
तृनपितर्प्पयसे अरिगणसूदनतेनतवप्रणतिमुपेत्यलिखामिवपुः सुकसमवर्णहयप्रथितंतवपदपांशु
पवित्रतमं प्रणतजनवत्सलमांप्रणतंत्रिभुवपावनपाहिरवे इतिसकलजगत्प्रसूतभूतंत्रिभुवनभावनधा
महेतुमेकं रविमखिलजगत्प्रदीपभूतंत्रिदशवरंप्रणतोऽस्मिसर्वदात्वां इतिश्रीमार्कंडेयपुराणे ९७ श्री
मार्कंडेयउवाच एवंतस्यस्तवंकुर्वन्विश्वकर्म्मादिवस्पतेः तेजसःषोडशंभागंमंडलस्थमधारयत् शांति
तैस्तेजसोभागैर्द्दशभिःपंचभिस्तथा अतीवकांतिमद्यारुभानोरासीत्तदावपुः शांतितंचास्पयत्तेजस्तेन
चक्रंविनिर्मितं विष्णोःशूलंचशार्वस्यशिबिकाधनदस्यच दंडंप्रेतपतेःशक्तिःदेवसेनापतेस्तथा अन्येषां
चैवदेवानामायुधानिसविश्वकृत् चकारतेजसाभानोर्भासुराण्यरिशांतये इतिशातिततस्तेजाःस्वसुरेणा
तिशोभनं वपुर्द्दधारमार्तंडःपुष्पचापमनोरमं सददर्शसमाधिस्थःस्वंभार्यांवडवाकृतिं अधृष्यांसर्वभूता
नांतपसासंयमेनच ततोस्वरूपमाधायभगवांस्तेजसांनिधिं गामतत्रयत्रास्तेसोत्तरेषुकुरुष्वथसाचदृष्ट्वा

मार्कं॰ २५९ 259

तमांयांतंपरपुंसोपघ्रांकया जगामसंमुखंतस्यदृष्ट्वारूपातत्परा ततश्चनासिकायोगात्तयोस्तत्रसमेतयोः ना
सत्यदस्रौतनयावस्ववक्त्रात्विनिर्गतौ रेतसोंतेचरेवंतःखड्गीधन्वीतनुत्रधृक् अश्वारूढःसमुत्पन्नोवाणतूण
समन्वितः ततःस्वरूपमखिलंदर्शयामासभानुमान् तस्यार्थसासमालोक्यस्वरूपंमुदमाददे स्वरूपधारिणीं
चैनांसनिनायनिजालयं संज्ञांभार्यांप्रीतिमतींभास्करोवारितस्करः ततःपूर्वसुतोयोस्याःसोभूद्वैवस्वतोम
नुः द्वितीयस्तुयमःशापात्धर्मदृष्टिरभूत्सुतः कृमयोमांसमादायपादतस्तेमहीतले पतिष्यंतीतिशापांतंत
स्यचक्रेपितास्वयं धर्मादृष्टिर्यतश्चासौसमोमित्रेतथाहिते ततोनियोगेतंयाम्येचकारतिमिरापहः यमुनाच
नदीचक्रेकलिंदांतरवाहिनी अश्विनोदेवभिषजौकृतौपित्रामहात्मना गुह्यकाधिपतिश्चैववरेवंतोविनियोजि
तः रेवंतमप्याहततोभगवान्लोकभावनः त्वमप्यशेषलोकस्यपूज्योवत्सभविष्यसि अरण्येष्वोमहादावे
वैरिदस्युभयेषुच त्वांस्मरिष्यंतियेमर्त्याःमोक्ष्यंतेतेमहापदः मोक्षंवृद्धिंसुखंराज्यंआरोग्यंकीर्तिमुन्नतिं न
राणांपरितुष्टःत्वंपूजितःसंप्रदास्यसि छायासंज्ञासुतश्चापिसावर्णिःसुमहायशाः भाव्योसौनागतेकालेम २५९
नुःसावर्णिकोष्टमः मेरुपृष्ठेतपोघोरंअद्यापिचरतेप्रभुः भ्राताशनैश्चरस्तस्यग्रहोभूच्छाश्रनाद्रवैः यवीयसी

तुयाकंन्यायमस्याभूत्द्विजोत्तम अभवत्सासरित्क्रोष्टयमुनालोकपावनी यस्तुज्येष्ठोमहाभागःसगो
यास्येहसांप्रति विस्तरंतस्यवक्ष्यामिमनोर्वैवस्वतस्यहि यइदंजन्मदेवानांशृणुयाच्छापावयेच्चवा विव
स्वतस्यजातनांरवेर्माहात्म्यमेवच आपदंप्राप्यमुच्येतप्राप्नुयाच्चमहायशः अहोरात्रकृतंपापंएतत्स
मयतिश्रुतं माहात्म्यमादिदेवस्यमार्त्तंडस्यमहात्मनः इतिश्रीमार्कंडेयपुराणेमार्त्तंडमाहात्म्यसमाप्तं
क्रोष्टुकिरुवाच भगवन्कथितंसम्यक्भानोःसंततिसंभवः माहात्म्यंचादिदेवस्यस्वरूपंचातिविस्तरात्
भूयोपिभास्वतःसम्यक्माहात्म्यंमुनिसत्तम श्रोतुमिच्छाम्यहंतन्मेप्रसन्नोवक्तुमर्हसि मार्कंडेयउवाच
श्रूयतामादिदेवस्यमहात्म्यंकथियामिते विवस्वतोयच्चकारपूर्वमाराधितोजनैः दमस्यपुत्रोविख्यातोराजा
भूद्राज्यवर्धनः ससम्यक्पालनंचक्रेपृथिव्याःपृथिवीपतिः धर्मतःपाल्यमानंतुतेनराष्ट्रंमहात्मना ववृधेनु
दिनंविप्रजनेनचधनेनच हृष्टपुष्टमतीवासीत्तस्मिन्राजन्यशोभतः निर्भयःसकलश्चोर्व्यापौरजानपदो
जनः नोपसर्गोनचव्याधिर्नचव्यालोद्भवंभवं नानावृष्टिरभूत्तत्रदमपुत्रोमहीपतौ सइयाजमहायज्ञैर्ददौ
दानानिर्चार्थिनां स्वधर्मस्याविरोधेनबुभुजेविषयानपि तस्यैवंकुर्वतोराज्यंसम्यक्पालयतःप्रजाः सप्त

मार्कं० २६० 260 वर्षसहस्राणिजग्मुरेकमहर्यथा ।विदूरथस्यतनयादक्षिणात्पस्यनृपतेः तस्यपत्नीबभूवाथमानिनीनामनाम
तः कदाचित्तस्यसासुभ्रूः शिरसोभ्यंजनादृता पश्यतोराजलोकस्यप्रमुमोचाश्रुणिमानिनी तदश्रुपतंगात्रे
यदातस्यमहीपतेः तदोन्नमय्यवदनंतामपृच्छत्समानिनीं निःश्वासमश्रुमोक्षेणरुदंतींतांविलोक्यवै कि
मेतदितिपप्रच्छमानिनींराज्यवर्द्धनः पृष्टासातुततस्तेनभर्त्राप्राहमनस्विनी नकिंचिदितितांभूयःपप्रच्छ
समहीपतिः बहुशःपृच्छतस्तस्यभूभृतःसासुमध्यमा दर्शयामासपलितंकेशभारांतरोद्भवं एतत्पश्यसि
भूपालकिमल्पंममदुःकारणं ममातिमंदभाग्यायाजहासाथनृपस्ततः सविहस्याहतांपत्नीशृण्वतांसर्व
भूभुजां पौराणांचमहीपालोयेतत्रासन्समागताः शोकेनालंविशालाक्षिरोदितव्यंनतेशुभे जन्मवृद्धिज
रिणमाद्याःविकारासर्वजंतुषु अधीतासकलावेदाइष्टायज्ञाःसहस्रशः दत्तंद्विजानांवित्ताणिम
न्येस्माभिःकृतानिच भुक्ताभोगास्त्वयासार्द्धंयेमर्त्येषुपिदुर्लभाः सुसम्यक्पालिताःपृथ्वीसाधयुद्धेष्व
नुष्ठितं मित्रैःसहेष्टैर्हसितंविहृतंचवरानने किमन्यन्नकृतंभद्रेपलितेभ्योबिभेषयत् नवंतुकेशापलि २६०
तोवलयःसंतुमेशुभे शैथिल्यमेतुकामोयंकृतकृत्योस्मिमानिनि मूर्ध्न्यदर्शितंभद्रेनवत्यापलितं

2601

कृतंतत्पूर्बकैश्चयत् श्रतोनतेश्रुताहस्याकिंचिल्लश्चलाभिमारसं
श्चलंतेमनसुनाभद्रैर

मम चिकित्सामेषतस्माहंकरोमिचनसंशयः बाल्येबालक्रियापूर्बंतद्वत्कौमारकेचया यौवनेयस्यथायोग्या
वार्द्धकेवनसंश्रया एवंमत्पूर्बकैर्भद्रैनन्वभ्युदयकारिभि दर्शनंपलितस्यैतन्मारोदानिर्प्रयोजनं श्रीमार्कंडे
यउवाच ततःप्रग्राम्यसंभूपाःपौराश्चैवसमीपगाः सास्राःप्रोचुर्महीपालंमहर्षेराज्यवर्द्धनं नरोद्वित्रमम
नयातवपत्यानराधिपः रोदितव्यमिहास्माभिरथवासर्बजंतुभिः त्वंब्रवीषियतोनाथवनवासाश्रितांमतिं
ततोशेषक्रियाहानिःसर्वपृथ्वीनिवासिनां भविष्यतिनसंदेहस्त्वयिनाथेवनाश्रये सचसर्वोपघाताय
तत्स्वयंप्रविमृश्यतां सप्तवर्षसहस्राणित्वयेयंपालितामही तत्समुत्पन्नमहापुण्यमालोकयनराधिपः
वनेवसन्महीपालत्वंकरिष्यसिकिंतपः तन्महीपालनस्यास्यकलांनार्हंतिषोडशीं राजोवाच सप्त
वर्षसहस्राणिममेयंपालितामही इदानींवनवासस्यममकालोयमागतः ममापत्यानिजातानिदृ
ष्टामेऽपत्यसंततिः स्वल्पैरेवममाहोभिरंतकोनसहिष्यति यदेतत्पलितंमूर्द्धितद्विजानातिनागराः
दूतभूतंयमस्यास्यमृत्योरत्युग्रकर्मणः सोहंराज्येसुतंकृत्वाभोगान्वनाश्रयः तपःस्तप्स्येसमायांतिनया
वद्यमसैनिकाः श्रीमार्कंडेयउवाच ततोपियासुःसवनंदैवज्ञमवनीपतिः पुत्रराज्याभिषेकायदिनलग्ना

न्मपृच्छत श्रुत्वा च तेन तन्नृपतेर्वचो व्याकुलचेतसः दिनं लग्नं च होरां च न विदुः शास्त्रदृष्टयः श्रुत्वैतं म
मार्कं० हीपालं दैवज्ञा वाप्यगारुदं ज्ञानानि नः प्रनष्टानि श्रुत्वैतद्वोक्यो नृपः ततोन्यनगराद्राजपाश्चान्यराष्ट्रेभ्य एव च
२६१ आहूतास्तु नगराप्रोचुर्ये चाभ्युपाययुः ततस्तस्माच्च नगरात्प्रोचुर्येनाभ्युपागमत् समुपेत्य महीपालं तं प्रिया
261 संमुनेवचः प्रकंपिशिरसो भूत्वा प्रोचुर्ब्राह्मणास्तमाः प्रसीद पाहि नो राजन् पालिता स्म यथा पुरा सो
दिष्यत्यखिलं लोकः त्वयि भूपवनाश्रये तत् कुरुष्व महाराजन् यथा नो सीदते जगत् यावज्जीवाम हे वी
रस्वल्पं कालमिमं वयं नेच्छामस्त्वावत्त्वदूनं द्रष्टुं सिंहासनं प्रभो श्रीमार्कंडेय उवाच इत्येवं तैस्तथान्यैश्च
द्विजैः पौरपुरःसरैः भूपैर्भृत्यैरमात्यैश्च प्रोक्तः प्रोक्तः पुनः पुनः वनवासविनिर्बंधं नोपसंहरते यदा ततो
ऽमात्याश्च भृत्याश्च पौरा भृत्यास्तथा द्विजाः समेत्र मंत्रयामास किमत्र क्रियतामिति तेषां मंत्रयतां विप्र
निश्चयोयमजायत अनुरागवतां तत्र महीपालेति धार्मिके सम्यकूध्यानपरा भूत्वा प्रार्थयामि समाहि
ताः तपसाराध्य भास्वंतमायुरस्य महीपतेः तत्रैकनिश्चया कार्यो केचिद्गेहे च भास्करं सम्यगर्घोप २६१
हाराद्यैरुपहारैरपूजयन् अपरे मौनिनो भूत्वा रुगजनेन तथापरे यजुषामप्यसाम्नां च तोषयांचक्रियेरवं .

261A

अपरेच निराहारा नदीपुलिनशायिनः ततः संचक्रुरत्यंतं भास्कराराधनं द्विजाः अग्निहोत्रपराश्चैव र
विसृज्यान्ये हर्निशं जेपुस्तथान्ये संतस्थुः भास्करे दत्तदृष्टयः इत्येवमतिनिर्बंधं भास्कराराधनं प्रति व
हुप्रकारं चक्रुस्ते तं तं विधिरुपाश्रिताः तथानुयततां तेषां भास्कराराधनं प्रति सुदामानाम गंधर्व उप
गम्येदमब्रवीत् यद्याराधनमिष्टं वो भास्करस्य द्विजातयः तदेतत् ह्रूयतां तेन भानुप्रीत्यमुपेष्यति अस्या
गुरुविशालाख्यं वनं सिद्धनिषेवितं कामरूपे महाशैले गम्यतां तत्र वैलघुः तस्मिन्नाराधनं भानोः क्रि
यतां सुसमाहितैः सिद्धक्षेत्रं हि तत्तत्र सर्वान्कामानवाप्स्यथ श्रीमार्कंडेय उवाच इति ते तद्वचः श्रुत्वा
गत्वा तत्काननं द्विज ददृशुर्भास्वतस्तत्र पुण्यमायतनं शुभं तत्र ते नियताहारा वर्णाविप्रादयो द्विजाः
धूपपुष्पोपहाराद्यैः पूजां चक्रुरतंद्रिताः पुष्पानुलेपनाद्यैश्च धूपगंधादिकैस्तथा जपहोमान्नदीपा
दिवर्णाः पूजां समाहिताः कुर्वतस्तुष्टुवुर्ब्रह्मन् विवस्वंतं द्विजातयः प्रजा ऊचुः देवदानवयक्षाणां
ग्रहाणां ज्योतिषामपि तेजसाभ्यधिकं देवं प्रयामः शरणां रविं दिविस्थितं च देवेशं द्योतयंतं समंततः
वसुधामंतरिक्षां च प्लावयंतं मरीचिभिः आदित्यं भास्करं भानुं सवितारं दिवाकरं पूषाणमर्यमाणं च

स्वर्भानुदीप्तदीधितिं चतुर्युगांतकालाग्निं दुःप्रेक्ष्यं प्रलयांतकं योगेश्वरमनंतं च रक्तं पीतं सितासितं ऋ
मार्कं षीणामग्निहोत्रेषु यजुर्वेदेषु वस्थितं अक्षरं परमं गुह्यं मोक्षद्वारमनुत्तमं छंदोभिरश्वरूपैर्यः सकृद्यु
२६२ क्तैर्विहंगमैः गपदायास्तमनेयुक्तः सदा मेरोः प्रदक्षिणं अमृतं चैव सत्यं च पुण्यं तीर्थं पृथग्विधं। विश्व
262 स्थितिमचिंत्यं च प्रपन्नास्मि दिवाकरं यो ब्रह्मा यो महादेवो यो विष्णुः यः प्रजापतिः वायुराकाशमापश्च
पृथ्वी सवनकानना ग्रहनक्षत्रताराद्या वानस्पत्यं तथौषधं व्यक्ताव्यक्तेषु भूतेषु धर्माधर्मप्रवर्त्तकः
ब्राह्मी माहेश्वरी चैव वैष्णवी चापि वा तनुः त्रेधा यस्य स्वरूपं च स नो भास्वान् प्रसीदतु यस्य सर्वमज
स्यैदमंशाभूतं जगत्प्रभोः स नः प्रसीदतां भास्वान् जगतां यश्च जीवनं यस्यैकं नास्परं रूपं प्रभामंडल
दुर्द्दशं। द्वितीयमैंदवं सौम्यं स नो भास्वान् प्रसीदतु याभ्यां यस्य स्वरूपाभ्यां इदं विश्वं विनिर्मितं अग्नी
षोममयं भास्वान् स नो देवः प्रसीदतु श्रीमार्कंडेय उवाच इत्थं स्तुत्वा तथा भक्त्या सम्यक् पूजयतां तथा
तुतोष भगवांस्तेषां त्रिभिर्मासैर्द्विजोत्तम ततः स्वमंडलादुद्यन्नि विवस्वान् प्रभुः अवतीर्य ददौ तेभ्यो २६२
दुर्द्दशो दर्शनं रविः ततस्तेस्पष्टरूपस्थं सवितारमजं जनाः पुलकोत्कंपिता विप्रं भक्त्या नमः प्रणेमिरे न

262A

ष्णो नमस्ते ऽस्तु सहस्ररश्मे सर्वस्य हेतुस्त्वमशेषहेतुः योगीत्वमीड्यो ऽखिलयज्ञधामा ध्येयस्तथा योगविदां
प्रसीद इति श्रीमार्कंडेयपुराणे ८८ मार्कंडेय उवाच ततः प्रसन्नो भगवान्भानुराहाखिलं ऽशनं वृयतां
यदभिप्रेतं मत्तः प्राप्तं द्विजातयः ततस्तं प्रणिपत्योचुर्विप्रविप्राद्ययो जनाः ससाध्वसमप्रीतं प्रभुमवलोक्य
पुरः स्थितं भगवन्यदि नो भक्त्या प्रसन्नस्तिमिरापहः दश वर्षसहस्राणि ततो नो जीवितां नृपः निरामयो
जितारातिः सुकोशः स्थिरयौवनः दश वर्षसहस्राणि जीवताद्राज्यवर्द्धनः मार्कंडेय उवाच तथे
त्युक्तान्तं भास्वान्स्त्र्य दृश्यो ऽभून्महामुने तेपि लब्धवरा हृष्टाः समाजग्मुर्जनापुरं यथावृत्तं स ते तस्मै नरे
न्द्रायन्यवेदयन् वरं लब्धं सहस्रांशोः सकाशाद्यखिलं जगत् तच्छ्रुत्वा ऽज हर्षे तस्य सापत्नी मानिनी द्विज
।सच राजा चिरं दध्यौ नाह किंचिद्व तं जनं ततः सा मानिनी भूयो हर्षपूरितमानसा दिष्ट्या पुष्णा महीपाल व
र्द्धसीत्याह तं पतिं तथा तथा मुदा भर्त्ता मानिन्या स समभाजितः नाह किंचिन्महीपालचिंताकुलमनास्थि
तः सा पुनः प्राह भर्त्तारं चिंतयानमधोमुखं कस्मान्न हर्षमभ्येषि परमाभ्युदये नृप दश वर्षसहस्राणि
नीरुजः स्थिरयौवनः भावी त्वमद्यप्रभृति किं तथापि न हृष्यसि किं नु तत्कारणं ब्रूहि यच्चिंताक्रांत

मानसः परमाभ्युदयेपित्वंसंप्राप्तेपृथिवीपतिः राजवर्द्धनउवाच कथमभ्युदयेनद्धेकिंसभाजयसेचमां प्रा
मार्कं प्राप्तोदुःखसहस्राणांकिंसभाजनमिष्यते दशवर्षसहस्राणिजीविष्याम्यहमेककः तत्रतत्रविपन्नो
२६३ मेकिंनदुःखंभविष्यति सुतान्पौत्रान्प्रपौत्रांश्चतथान्यानिष्टबांधवान् पश्यतोमेमृतान्दुःखंकिमल्पं
263 हिभविष्यति मृतेषुचातिनक्षेषुमित्रवर्गेतथामृते नद्धेदुःखमुपात्तंमेभविष्यत्पुनसंततं येमदर्थत
पस्तप्तंकृशैर्द्धमनिसंततैः तेमरिष्यंत्यहंरोगीजीविष्यामीतिधिक्कथं सेयमापद्वरारोहेश्रामान्याभ्युद
योमम कथंतांमन्यसेतत्त्वंयासभाजयसेद्यमां मानिन्युवाच महाराजयथात्थत्वंतथैवनात्रसंशयः
मयापौरैश्चदोषोयंप्रीत्यानालोचितस्तव एवंगतेतुतंकार्यमहाराजविचिंत्यतां नान्यथाभावत
त्वाहप्रसन्नस्तिमिरापहः राजोवाच उपकारश्चयःपौरैःप्रीत्याभृत्यैश्चयोमम कथंभोक्ष्याम्यहं
भोगानकृत्वातेषामनिःकृतिं सोहमद्यप्रभृत्यद्रिंगत्वाप्रयतमानसः तपस्तप्स्येनिराहारोभानोरा
राधनोद्यतः दशवर्षसहस्राणियथाहंस्थिरयौवन तस्यप्रसादादेवस्यजीविष्यामिनिरामयः तथा २६३
यदिप्रजाःसर्वाःभृत्यास्त्वंचसुताश्चये पौत्राःप्रपौत्राःसुहृदस्तत्कृतिश्चवराननेजीवत्वेवंप्रसादेनः

263A

करोतिभगवान्रविः ततोहंभविताराज्येमोक्ष्येभोगांस्तथामुदा नचेदेवंकरोत्यर्कस्सदाहंतत्रमानिनि
तपस्तप्स्येनिराहारोभानोराराधनोद्यतः दशवर्षसहस्राणियथाहंस्थिरयौवनः तस्यप्रसादाद्देवस्यजी
विष्यामिनिरामयः तथायदिप्रजाःसर्वाःयावज्जीवितसंक्षयः मार्कंडेयउवाच इत्युक्तासातदातेनत
थेत्याहनराधिपं जगामचसमंतेनसापितंधरणीधरं सतदायतनंगत्वाभार्ययासहपार्थिवः भानोरारा
धनंचक्रेशुश्रूषानिरतोद्विज निराहाराकृशासाचयथासौपृथिवीपतिः तेयेतपस्तथैवोग्रंशीतवात
तपक्षमा तस्यपूजयतोभानुंतपश्चतपसोमहान् साग्रःसंवत्सरोजातस्ततःप्रीतोदिवाकरः समस्त
पुत्रभृत्यादिपौराणांचकृतेविभुः यथाभिलखितंसर्ववरंप्रादात्सुदुर्लभं सचलब्धावरंराजासमागम्य
पुरंततः चकारमुदितोराज्यंप्रजाधर्मेणपालयन् इयाजचमहायज्ञैर्ददौदानान्यहर्निशं भानिन्यास
हितोभोगानभुंजेचस्वधर्मवित् दशवर्षसहस्राणिपुत्रपौत्रादिभिर्नृपः भृत्यैश्चसहितःपौरैःसो
भवत्स्थिरयौवनः तस्यैतच्चरितंदृष्ट्वाप्रमतिर्नामभार्गवः विस्मयाकृष्टहृदयोगाथामेतामगायत भा
नुभक्तेरहोशक्तिर्यद्राज्याराज्यवर्द्धनः आयुष्मवर्द्धनोजातःस्वजनस्ययथात्मनः इतितेकथितंविप्रयस्त

ष्टोहं त्वयादितः आदिदेवस्य माहात्म्यमादित्यस्य विवस्वतः विप्रैतदखिलं श्रुत्वा भानोर्माहात्म्यमुत्तमं
मार्कं पठन्प्रमुच्यते पापैः सप्तरात्रकृतैर्नरः अरोगो धनधान्याढ्यः कुले महति धीमतां जायते च महा
२६४ प्राज्ञो यश्चैतद्धारयेद्धृदि मंत्राश्च ये त्राभिहिता भास्वतो मुनिसत्तम जपन्प्रत्येकमेतेषां त्रिसंध्यं पा
264 तकापहः समस्तमेतन्माहात्म्यं यत्र चायतने रवेः पठ्यते तत्र भगवान् सांनिध्यं न विमुंचति तस्मादे
तत्त्वया ब्रह्मन्भानोर्माहात्म्यमुत्तमं धार्यं मनसि जप्यं च महत्पुण्यमभीप्सता सुवर्णशृंगीमतिसो
भनां गां पयस्विनीं गां प्रददाति यो द्विजः शृणोति चैतत्स्वहमात्मवान्नरः समं तयोः पुण्यफलं द्विजाग्र
य इति श्रीमार्कंडेयपुराणे राज्यवर्द्धनोपाख्यानं १०० मार्कंडेय उवाच एवं प्रभावो भगवाननादिनि
धनो रविः यस्य त्वं क्रौष्टुके भक्त्या माहात्म्यं परिपृच्छसि परमात्मा योगिनां युंज्यतां चेतसो लयः क्षे
त्रज्ञः सांख्यसंज्ञानां यज्ञेशो यज्विनामपि सूर्याधिकारं वहतो विष्णोरीशस्य वेधसः मनुस्तस्याभवत्सु
तः छिन्नसर्वार्थसंशयः मन्वंतराधिपो विप्र यस्य सप्तममंतरं इक्ष्वाकुर्नाभगो दिष्टः सर्यातिश्चकरूषकः २६४
नरिष्यंतोथ नाभागः पृषध्रो धृष्ट एव च एते पुत्रा मनोस्तस्य पृथग्राज्यस्य पालकः विख्यातकीर्तयः

264A

सर्वेसर्वेशास्त्रार्थपारगाः विशिष्टतरमन्विष्यन्मनुः पुत्रंतथापुनः मित्रावरुणयोरिष्टिंचकारक्षतिनांब
रः तत्रचापकृतेहोतुरपचारात्महामुने इलानामसमुत्पन्नासनोकंन्यासुमध्यमाः तांदृष्ट्वाकंन्यकांत
त्रसमुत्पन्नांततोमनुः तुष्टावमित्रावरुणौवाक्यंचेदमुवाचह भवत्प्रसादात्तनयोविशिष्टोमेभवेदि
ति कृतेयज्ञियमिष्टेश्च उत्पन्नातनयामम यदिप्रसन्नौवरदौतदियंतनयामम प्रसादाद्भवतःपुत्रो
भविख्यातिगुणान्वितः तथेतितायामुक्तेतुदेवाभ्यांसेवकन्यका इलाइलःसपुत्रोभूत्सुद्युम्नइतिविख्या
तः पुनश्चेश्वरकोपेनमृगयामटतावने स्त्रीत्वमासादितंतेनमनुपुत्रेणधीमता पुरूरवसनामानंच
क्रवर्तिनमूर्जितं जनयामासतनयंतत्रसोमसुतोबुधः जातेपुत्रेततःकृत्वासोश्वमेधंमहाक्रतुं पु
रुषत्वंततःप्राप्तसुद्युम्नःपार्थिवोभवत् सुद्युम्नस्यत्रयःपुत्राः उत्कलोविनतोगयः पुरुषत्वेमहा
वीर्यायज्विनःपृथुलौजसः पुरुषत्वेतुयेजातास्तस्यराज्ञस्त्रयःसुताः बुभुजुस्तेमहीमेतांधर्मेनियत
चेतसः स्त्रीभूतस्यतुयोजातस्तस्यराज्ञःपुरूरवाः नसलेभेमहीभागंयतोबुधसुतोहिसः ततोवशिष्ठ
वचनात्प्रतिष्ठानंपुरोत्तमं तस्मैदत्तंसराजाभूत्तत्रातीवमनोहरः इतिश्रीमार्कंडेयपुराणेवंशानुक्रमणे

॥१०२॥ श्रीमार्कंडेय उवाच एष ध्राख्यो मनोः पुत्रो मृगयामगमद्वनं तत्र चक्रममाणोसौ विपिने निर्जने वने ना
मार्कं ससाद मृगांकं चिन्नानुदीधितितापितः क्षुत्तृट्तापपरीतांगः इतश्चेतश्च संचरन् सददर्श तदा तत्र होमधेनुं व
२६५ नोदरे स्वाध्यायिनो वनांतस्थो ब्राह्मणस्याग्निस्फूलिनः समन्यमानो गवयमीषुणा तामताडयन् प
265 पात सा च तद्बाणाविनिन्नहृदया भुवि॥ ततोग्निस्फूलिनः पुत्रो ब्रह्मचारी तपोरतिः सम्भवर्षा पितुर्दृष्ट्वा हो
मधेनुं निपातितां गोपालः प्रेषितः पित्रा वाभ्रव्योनामनामतः कोपामर्षपराधीनचित्तस्तत्सुतो मुने चु
कोपविगलत्स्वेदजललोलाविलेक्षणः तं कुद्धं प्रेक्ष्य स नृप एष ध्रो मुनिदारकं प्रसीदेति जगौ कस्मात् कु
द्धवान् कुरुषे रुषं न तस्करयो नवा वैश्यप एवं क्रोधमुपेति वै यथा त्वं स्फूद्रवज्जातो विप्रिष्टो ब्राह्मणो कुयो॥ श्री
मार्कंडेय उवाच इति निर्भत्सितस्तेन स राज्ञा स्फूलिनः सुतः शशाप तं दुरात्मानं स्फूद्र एव भविष्यसि
प्रयास्यति क्षयं ब्रह्म यत्तेधीतं गुरोर्मुखात् होमधेनुर्मम गुरोर्यदियं हिंसिता त्वया एवं शप्तो नृपः कुद्ध
स्तत्शापपरिपीडितः प्रतिशापपरो विप्रतोयं जग्राह पाणिना भूयो राज्ञो विनाशाय कोपं चक्रे द्विजन्म २६५
वान् तमभ्येति पिता तस्य स्फूलीवचनमब्रवीत् वत्सालमलमत्यर्थं कोपेन यति वैरिणा ऐहिकामु

265A

ष्मिकाहितःशमएवद्विजन्मनां कोपस्तपोनाशयतिक्रोधाद्भ्रंशस्तथायुषः क्रुद्धस्यगलतिज्ञानंक्रुद्धःस्व
र्गाच्च हीयते नधर्मःक्रोधशीलस्यनार्थमाप्नोतिरोषवान् नालंसुखायकामाप्तिःकोपेनाविष्टचेतसा य
दिराज्ञाहताधेनुरियंविज्ञाननासता युक्तमत्रदयांकर्त्तुमात्मनोहितकारिणः अथवाज्ञानताधेनुरियं
व्यापादितामम तत्कथंशापयोग्योयंदुष्टेनास्यमनोयतः आत्मनोहितमन्विच्छन्वाधितेयःपरंनरः क
र्त्तव्यामूढविज्ञानेदयातत्रदयालुभिः अज्ञानतःकृतेदंडंपातयतिवुधायदि वुधेष्वस्तदहंमन्येवरमज्ञा
निनोनराः नायंशापस्यचयादेयःपार्थिवस्यास्यपुत्रका स्वकर्मणैवविहतागौरेषादुःखमृत्युना मार्कंडेय
उवाच पृषध्रोपिमुनेःपुत्रंप्रणाममाऽनतकंधरः प्रसीदेतिजगादोच्चैःअज्ञानाद्धातितेतिच ऋषिरुवाच आ
जन्मतोमहीपालनमयाव्याहृतंमृषा क्रोधश्चासुमहाभागनसंभूतमेकदाचन तन्नाहमेनंशक्तोस्मिशापं
कर्त्तुंनृपान्यथा यत्नेसमुद्यतःशापोद्वितीयःसनिवर्त्तितः इत्युक्त्वैवंतंवालमादायपिताततः जगा
मस्वकमायं सोपिपृषध्रःशूद्रतामगात् इतिश्रीमार्कंडेयपुराणे १५२ श्रीमार्कंडेयउवाच कारूषा
क्षत्रियाःशूराःकरूषस्याभवन्सुताः तत्रसप्तयुतावीरास्तेष्वपश्चान्येसहस्रशः धृष्टपुत्रस्तुनाभागः

मार्कं॰ स्थितः प्रथमयौवने ददर्श वैश्यतनयामतीव सुमनोहरां तस्यां स दृष्टमात्रायां मदनाक्षिप्तमानसः बभू
२६६ व भूपतनयो निश्वासाक्षेपतत्परः तस्याः स गत्वा जनकं वव्रे तां वैश्यकन्यकां ततोऽनंगपराधीनमनोवृ
266 त्तिर्द्विजोत्तम तं चाह तस्याः स पिता राजपुत्रं कृतांजलिः विनम्रं तस्य पितुर्विप्र श्रयावनतं वचः भवंतो
भूभुजो भृत्याः वयं वः करदायकाः कथं संबंधमसमैरस्माभिरभिवांछसि राजपुत्र उवाच साम्यं मा
नुषदेहस्य क्षारलोहादिभिः कृतः तथापि काले तैरेव योज्यते मानुषं वपुः तथैव चोपकाराय जायंते
तस्य तानपि अन्यानि चान्यजातीनि भिन्नजातिमतां तथा ह्यन्यान्ययोग्यानि योग्यतां यांति कालतः यो
ग्यान्ययोग्यतां यांति कालवश्यानि योग्यता आप्यायते यच्छरीरमाहारादिभिरीप्सितैः कालेऽज्ञात्वा तथाभूतं त
देव परिशोष्यते इत्थं ममैषाभिमता तात तनया दीयतां त्वया अन्यथा मच्छरीरस्य विपत्तिरुपपद्यते वैश्य उवाच
परतंत्रा वयं त्वं च परतंत्रो महीभुजः पित्रा तेनाभ्यनुज्ञातस्त्वं ग्रहाण ददाम्यहं राजपुत्र उवाच प्रष्टव्याः स
र्वकार्येषु गुरवो गुरुवर्त्तिभिः न त्वीदृशेषु कार्येषु गुरूणां वाक्यगोचरः क्व मन्मथकथालापो गुरू २६६
णां श्रवणं क्व च विरुद्धमेतदन्यत्र प्रष्टव्या गुरवो नृभिः वैश्य उवाच एवमेतत्स्मरालापस्तवायं दृक्

266A

माधुरं अहंएकाकिनालापो ममकामकथाश्रयः श्रीमार्कंडेयउवाच इत्युक्तःसोभवन्मौनीराजपुत्रःसचापि
तत् तत्पित्रेसर्वमाचष्टेराजपुत्रस्यजन्मतं ततस्तस्यपिताविप्रान्चीकादीन्द्विजोत्तमान् प्रवेश्यराजपुत्रं
चयथाख्यातंन्यवेदयन् निवेद्यचततःप्राहमुनानेवंव्यवस्थिते यत्कर्तव्यंतदादेष्टुमर्हंति द्विजसत्तमाः
ऋषयऊचुः राजपुत्रानुरागस्तेयद्यस्यांवैश्यसंततौ नदस्तकधर्मएवैषांकिंतुन्यायक्रमेणासः मूर्धाभिषि
क्तेनयापाणिग्राहोभवत्पुरः भवत्यनंतरंचैयंतवभार्याभविष्यति एवंनदोषोभवितानेवमात्मुपभुंजतः
अन्यथाभ्येतितेजातिक्रमत्कृष्टावालुकानयान् श्रीमार्कंडेयउवाच इत्युक्तस्तदपास्येववचस्तेषांमहा
त्मनां विनिःक्रम्यगृहीत्वातामुद्यतासिरथाब्रवीत् राक्षसेनविवाहेनमयावैश्यसुताहृता यस्यसाम
र्थ्यमत्रास्तिसपेतांमोचयत्विति ततःसवैश्यस्तांदृष्ट्वागृहीतांतनयांद्रुतं त्राहीतिपितरंतस्यत्रययौशरणंद्वि
ज ततस्तस्यपिताक्रुद्धस्त्रादिदेशाबलंमहत् हन्यतांहन्यतांदुष्टोनाभागोधर्मदूषकः ततस्तद्धायुधेसैन्यंते
नभूपसुतेनवै कृतास्त्रेणतस्तेनतस्रोचुर्येणपातितं ससुत्वानिहतंसैन्यंराजपुत्रेणभूपति स्वयमेवययौ
पुत्रंस्वसैन्यपरिवारितः ततोयुद्धमभूत्तस्यभूभुजःस्वसुतेनतत् राजपुत्रेणशास्त्रास्त्रैस्तत्रातिप्रापितःपिता।

मार्कं॰ ततोंतरिक्षादागत्यपरिव्राजोमहामुनिः प्रत्युवाचमहीपालंविरमस्वेतिसंयुगात् त्वत्पुत्रस्यमहाभागविधर्मो
२६७ यंदुरात्मनः तवापिवैश्येनसहनयुद्धंधर्मवन्नृप ब्राह्मणोब्राह्मणींपूर्वंकुर्वन्दारपरिग्रहं ब्राह्मण्यात्स
267 र्ववर्णेषुनहानिमुपगच्छति तथैवक्षत्रियस्तुतांक्षत्रियःपूर्वमुद्वहन् इतरोपितरोराजंश्चरत्येवस्ववर्णतः
पूर्वंवैश्यस्तथावैश्यांपश्चाच्छूद्रकुलोद्भवं नहीयतेवैश्यकुलादयंन्यायःक्रमोदितः ब्राह्मणःक्षत्रियो
वैश्यःसवर्णांपाणिसंग्रहं अकृत्वान्यमवापाणेःपततिनृपसंग्रहात् यस्यायस्याहिहीनायाःकुरुतेपाणि
संग्रहं अकृत्वावर्णसंयोगंसोपितद्वर्णभाग्भवेत् सोयंवैश्यत्वमापन्नस्तवपुत्रःसमंदधीः नास्याधि
कारोयुद्धायक्षत्रियेणत्वयासह वयमेवात्रजानीमःकारणंनृपनंदनः यथानविघ्नतीदंचनिवर्तस्वाक
र्मणः इतिश्रीमार्कंडेयपुराणेनाभागाख्याने २२ श्रीमार्कंडेयउवाच ततोनिवर्त्तितोभूयःसंग्रामात्ससु
तेनवै उपयेमेचतांवैश्यतनयांसोपितत्सुतः ततःवैश्यतांप्राप्तःसमुपेत्याहपार्थिवं भूपालयन्मया
कार्यंतत्समादिश्यतांमम राजोवाच धर्माधिकरणेयुक्तावाभ्रव्याद्यास्तपस्विनः यदस्यकर्मधर्मोवातद्व २६७
दंतुतथाभम मार्कंडेयउवाच ततस्तेमुनयस्तस्यपाशुपाल्यंतथाकृषिं वाणिज्यंपरमंधर्मंकर्माचक्रुः

सभासदः तथाचचक्रे ससुतस्तस्यराज्ञोयथोदितं तैर्द्धर्मवादिभिर्द्धर्मच्युतस्यनिजधर्मतः तस्यपुत्रस्ततोजा
तोनाम्नाख्यातोभलंदनः स्वमात्राप्रहितोगच्छ गोपालोभवपुत्रक मात्रातथाभियुक्तोथप्रणिपत्यचमात
रं राजर्षिमगमन्नीपं हिमवत्पर्वताश्रयं तंसमेत्यसजग्राहतस्यपादौयथाविधिः प्रणिपत्याहचैवैनं राज
र्षिंसभलंदनः आदिष्टोभगवन्मात्रागोपालस्त्वंभवेतिवै मयाचपालनीयाद्भमातस्याःस्वीकरणं कथं म
याहिनोःपालनीयासापदास्वीकृतांभवेत् आक्रांतावलवद्भिः सादापादैः पृथिवीमम तांयथोप्राप्नु
यांपृथ्वींत्वत्प्रसादादहंविभो तथादिशाकरिष्यामितवाज्ञांप्रणतोस्मिते श्रीमार्कंडेयउवाच ततःस
नीयोराजर्षिस्तस्मैनिरवशेषतः भलंदायददौव्रह्मनस्त्रग्रामंमहात्मने प्राप्तास्त्रविद्यःसमदापितृव्य
तनयानिमान् वसुरातादिकान्पुत्रान्दृष्टस्यसुमहात्मनः अयाचतसराज्यार्द्धपित्र्यपैतामहोचितं
तत्रोचुर्वैस्यपुत्रस्त्वंकथंभोक्ष्यसिमेदिनीं ततस्तैर्युद्धमभवत्भलंदस्यात्मवंशजैः वसुरातादिभिःकु
द्धैःकृतास्त्रस्यास्त्रवर्षिणः सहत्वातानशेषांस्तुशस्त्रविद्धतसैनिकः जहारपृथिवींतेषांधर्मयुद्धेन
धर्मवित् सनिर्जितारिःसकलांपृथ्वीराज्यंततःपितुः निवेदयामाससनततस्पिताजगदेहिद्विज प्रत्युवा

मार्कं॰ चततः पुत्रं भार्यायाः पुरतस्तदा राजोवाच भलंदराज्यमेतत्ते क्रियतां पूर्वजैः कृतं अहं न कृतवान् राज्यं असा
मर्थ्यं पुतः पुरा वैश्यतां तु पुरस्कृत्य तथैवाज्ञाकरः पितुः कृत्वा प्रीतिं पितुरहं वैश्यकंन्यापरिग्रहात् न पुण्य
२६८ लोकभाग्राजन् यावदाभूतसंप्लवं त्वद्वंशग्माज्ञां पितुस्तुस्य पालयामि महीं यदि नास्ति मोक्षस्ततो नूनं मम
268 कल्पशतैरपि नचापि युक्तं त्वद्वाकुनाज्ज्ञितं मम मानिनः राज्यं भोक्तुं मनो हस्य दुर्बलस्य च कर्हिचित् राज्यं
कुरु घर्घ यावत् दायादेभ्यो विमुंच वा ममाज्ञा पालनं श्लाघ्यं पितुर्न्न क्षितिपालनं मार्कंडेय उवाच ततः प्रह
स्य तद्भार्या सुप्रभा नाम मानिनी प्रत्युवाच पतिं भूपगस्य तां राज्यमूर्ज्जितं न त्वं वैश्यो न चैवाहं जाता वैश्य
कुले नृप क्षत्रियस्त्वं तथैवाहं क्षत्रियाणां कुलोद्भव पूर्वमासीन् महीपालः सुदेव इति विश्रुतः तस्याभू
च्च सखा राज्ञो धूम्राश्वस्य सुतो नलः स तेन सख्या सहितो ययावाम्रवनं परं पत्नीभिश्च समं रंतुं माध
वे मासि पार्थिवः ततः पानान्यनेकानि भक्ष्याणि बुभुजे तदा भार्याभिः सहितस्ताभिस्तेन संख्या समा
न्वितः ततः पुष्करणीतीरे दर्शातिमनोरमां पत्नीं च्यवनपुत्रस्य प्रमतेः पार्थिवात्मजो संख्यातस्य न २६८
लो मत्तो जगृहे तां च दुर्मतिः पश्यतस्तस्य राज्ञस्त्क्रत्रा तत्रा तेति वादिनीं आक्रंदितां निशाम्यैतत्स तस्याः प्रम

268A

तिः पातिः श्राजगामत्वरायुक्तः किमेतदितिवैवदन् ततोददर्शराजानंसुदेवंतत्रसंस्थितं गृहीतां
चतथापत्नींनलेनसुदुरात्मनाततः सुदेवंनृपतिंप्राहाऽयंशास्यताम् इति त्वंचशास्ताभवान्राज्ञांदुष्टस्त्र्या
यंततोनृप मार्कंडेयउवाच तस्मात्तस्यवचंश्रुत्वासुदेवोनलगौरवात् प्राहवैश्यपोस्मिगच्छान्यंक्षत्रि
यंत्राणकारणात् ततःसप्रमतिक्रुद्धस्तेजसानिर्दहन्निव प्रत्युवाचाथराजानंवैश्योस्मीत्यभिभाषणं
एवमस्तुभवान्वैश्यः क्षत्रियः क्षतरक्षणात् क्षत्रियैर्धार्यतेशस्त्रंनार्तध्वंसोभवेदिति सत्वंनक्षत्रयो
नावैश्यएवकुलाधम इतिश्रीमार्कंडेयपुराणे १·४ मार्कंडेयउवाच तस्मैदत्वाततःशापंनलंक्रु
द्धोब्रवीद्वचः श्रमतिर्भार्गवःकोपात्त्रैलोक्यंनिर्दहन्निव मदोन्मत्तोयदाभार्यांभवानत्रममाश्रमे वालाद्ध
न्नातिभस्मत्वंतस्माद्व्रजतुमाचिरं तेनोदाहृतमात्रेतुवाक्येस्मिन्सतदानलः देहजेनाग्निनासद्योभ
स्मपुंजस्तदाभवन् दृष्ट्वाप्रभावंतंतस्यसुदेवोविस्मितस्ततः प्रणम्यतंचप्राहेदंक्षम्यतांक्षम्यतामिति यदु
क्तवांस्त्वंभगवान्सुरापानसमाकुलं तत्क्षम्यतांप्रसीदत्वंशापोयंविनिवर्त्यतां एवंप्रसादितस्तेनप्रम
तिः प्राहभार्गवः गतकोपोनलेदग्धेतांविनीतेनचेतसा नान्यथाभावितद्वाक्यंयन्मयासमुदीरितं तथा

मार्कं
२६९
269

पितेकरिष्यामिप्रसन्नोनुग्रहंपरं भविता वैश्यजातीयोभवान्नास्त्यत्रसंशयः भविताक्षत्रियोभूयस्तस्मिन्ने
वास्यजन्मनि ग्रहीष्यतिबलात्कन्यांयदातेक्षत्रसंभवः तदात्वंक्षत्रियोवैश्यःसुगृहीतोभविष्यसि ए
वंसवैश्यभूपालःसुदेवोस्मत्पिताभवत् अहंचयामहाभागातत्सर्वंशृणुयतोत्वया सुरथोनामराजर्षिःप्रा
गासीत्कंधमादने तपस्वीनियताहारस्त्यक्तसंगोवनाश्रयः तस्यश्येनमुखाद्भ्रष्टांदृष्ट्वैकांसारिकांभुवि
कृपाभूत्तुजनितामूर्छितयातस्यमहात्मनः ततोमूर्छावसानेहंतस्योत्पन्नाशरीरतः समांदृष्ट्वाचगृहे
स्निह्यमानेनचेतसा यस्मात्कृपाभिभूतस्यममजातेयमात्मजा तस्मात्कृपावतीनाम्नाभविष्यत्याहस
प्रभुः ततोहमाश्रमेतस्यवर्द्धमानादिवानिशं सखीभिःसहतुल्याभिर्विचराभिरमाभिवा ततोमुनेरगा
स्तस्यभ्रातागृष्टिरितिश्रुतः संचिन्वन्काननेवन्यंसखीभिःकोपितोशापत् यस्मान्मांवैश्यपद्धत्याहभ
वतीतेनतेप्राये वैश्याभविष्यसीत्युक्तेप्रसाद्योक्तोमयामुनिः नापराधंकृतवतीतवाहंद्विजसत्तम अन्या
साम पराधेनकिमर्थंशप्तवानसि ऋषिरुवाच दुष्टत्वंदुष्टसंसर्गाद्दुष्टमपिगच्छति सुराद्दुनिपातेनपं २६९
चगव्यघटोयथा दुष्टजातिप्रवासेनयत्त्वयाहंप्रसादितः तस्मादनुग्रहंवालेशृणुयत्तेकरोम्यहं वैश्य

यौनौयदाजातात्वंपुत्रंवोधयिष्यसि राज्यायजातिस्मरतांनदात्वंसमवाप्स्यसि ततोभूयःसर्वजा
तिंप्राप्तात्वंपतिनासह दिव्यानवाप्स्यसेभोगान्नाधर्मीःसमुपैतुते एवंशप्ताप्रियराजेंद्रोनचैवसापि
तामम नचाहमस्यदुष्टायामदुष्टादुष्यतेकथं इतिश्रीमार्कंडेयपुराणे १०५ श्रीमार्कंडेयउवाच
इतितस्यावचःश्रुत्वासपुत्रस्यचपार्थिवः पुनःप्रोवाचधर्मज्ञस्तांपत्नींतनयांतथा यन्मयापितुरा
देशात्यक्तंराज्यंनतत्पुनः गृहीष्यामिहृयोक्तेनकिमात्माक्षिप्यतेत्वया अहंप्रदास्यामिकरंतववै
श्रुपव्रतेस्थितभुंक्ष्वराज्यमशेषत्वमिच्छयावपरित्यज इत्युक्तःसतदापित्राराजपुत्रोभलंदन चकाररा
ज्यंधर्मेणातद्ददारपरिग्रहं अव्याहतंतस्यचक्रंपृथिव्यामभवद्द्विज नचाधर्मेमनोभूपास्तस्यसर्वेभवच्च
प्शो तेनेष्टंविविधैर्यज्ञैःसम्यक्शास्तावसुंधरा सएवैकोभवद्भर्तापृथिव्यांव्यापिशासनः अजायत
सुतश्चास्यवत्सश्रीर्नाममनामतः पितातिशायेतोयेनगुणौघेनमहात्मना तस्यापिभार्याशोनंदाविदूरथ
सुताभवत् पतिव्रतामहाभागासाप्राप्तातेनवीर्यतः हत्वापुरंदरिरिपुंकुजंभंदितिजेश्वरं कोष्टुकिरुवा
व भगवन्तेजसाप्राप्ताकुजंभनिधनात्कथं एतदाख्यातुमिच्छामिप्रसन्नेनात्मनात्वया श्रीमार्कंडेयउ

मार्कं॰ वाच विदूरथोनामनृपरव्यातिकीर्त्तिरभूद्भुवि तस्यपुत्रद्वयंजातंसुनीतिःसुमतिःसुमतिस्तथा एकदातुवनं
२७० ज्ञातोमृगयांसविदूरथः ददर्शगर्त्तंसुमहात्भूमेर्मुखमिवोद्गतं तंदृष्ट्वाचिंतयामाससकिमेतदितिभैरवं
270 पातालविवरंमन्येनैतद्भूमेश्चिरंतरं चिंतयान्नितितत्राथददर्शविजनेवने ब्राह्मणंसुव्रतंनामतपस्विनमु
पागतं सतंपप्रच्छनृपतिःकिमेतदितिविस्मितः अतिगंभीरमवनेर्दृष्टंतंतर्गतोदरं ऋषिरुवाच किंनवेत्सि
महीपालचाराढ्यस्त्वंनमेततः ज्ञेयंसर्वनरेंद्रेणवर्त्ततेतन्महीतले दानवःसुमहावीर्योवसत्युग्रोरसातले
सज्जंभयतियत्पृथ्वीकुजंभःप्रोच्यतेततः ।क्रियतेतेनयत्किंचिद्बलभूतंमहीतले त्रिदिवोवानरपतेतत्क
थंवेत्तिनोभवान् सुनंदंनाममुशलंत्वष्टायन्निर्मितंपुरा तंजहारसुदुष्टात्मातेनहंतिरणेरिपून् पाताला
न्तर्गतस्तेनभिनत्तिवसुधामिमां ततोसुराणांसर्वेषांद्वाराणिकुरुतेऽसुरः तेनभिन्नातिवसुधासुनंदमुशा
लेनतु भोक्ततेवसुधामेतामाजित्वैषकथंभवान् यज्ञान्विध्वंसयत्युग्रोदेवदृत्त्युपरोधकः आप्याययति
दैतेयात्सवलीमुशलायुधः यदीमंवद्धोपस्यारिंपातालांतरगोचरं ततःसमस्तवसुधापतिस्त्वंपरमेश्व २७०
रः मुशलस्तस्यवालिनःसौनंदःप्रोच्यतेजनैः तथावलावलंचैववदंतिचाविचक्षणाः तन्नुनिर्वीर्यतांया

270A

तिसंस्पृष्टोयोषितान्नृप तस्मिन्दिने द्वितीयेह्निवीर्यवत्कुदुदीयते नसवेत्ति दुराचारः प्रभावं मुशलस्यच यो
षित्कराग्रसंस्पर्शदोषं वीर्यनिपातनं एतत्तस्यवलंभूपदानवस्य दुरात्मनः मुशलस्यचतेप्रोक्तंयदुक्तंतत्समा
चर आसन्नमेतःसद्दुष्टपुरस्यपृथिवीपते कृतंतेनमहीरंध्रंनिश्चतः किंभवान्यथा मार्कंडेयउवाच इत्यु
क्तानुगतेतस्मिंमुनिनाथमहीपतिः मंत्रयामासमंत्रज्ञैःपुरमध्येतुमंत्रिभिः यथाश्रुतमशेषंतुमंत्रिभिस्तेनभूय
ता तत्पार्श्ववर्त्तिनीकंन्यासुम्रावाथमुदावती ततःकतिपयाहानिस्तांकंन्यांरममाणिकां जहाररोषवनादैत्यःकु
जंभःस्वसखीवृतां एतच्छ्रुत्वामहीपालक्रोधपर्याकुलेक्षणः पुत्रावुवाचचरितंउपेत्यसहकंन्यकांनिर्विंध्यायां
स्तटेगर्त्तेस्तेनगंतारसातले सहंतव्योपहर्त्तायोमुदावत्यासदुर्मतिः मार्कंडेयउवाच ततस्तौतत्सुतौप्राप्य
तद्गर्त्तंसदामुगो युयुधातेकुजंभेनस्वसैन्येनातिकोपितो ततोनिस्त्रिंशकोदंडशक्तिशूलपरश्वधैः वा
णोघ्वाविरतंयुद्धंतेषामासीत्सुदारुणः ततोमायावलवतीतेनदैत्येनतावुभौ राजपुत्रौरणेवद्धौनिह
त्वाशेषसैनिकौ तच्छ्रुत्वासमहीपालःप्राह हतसैनिकः वत्सपुत्रःपरामर्त्तिमागतोमुनिसत्तम यस्तंनिह
त्यदैत्येयान्मोचयिष्यतिमत्सुतान् तस्याहंसंदोदास्यामितामेवायतलोचनां इतिघोषपरांश्चक्रेसराजा

मार्कं स्वपुरेतदा निराशःपुत्रतनयासचमोक्षायवैमुने ततःसुश्राववत्सप्रीर्भलंदनसुतोवली अघोष्यमाणांसहि
२७१ तेतेघस्त्रःशौर्यसंयुतः सचागम्याभिवाद्यैनंप्राहपार्थिवसत्तमं आज्ञापयस्वमांयेनतनयेमोचयाम्यिते त
वैवतेजसाहत्वातंदैत्यंतनयांचते मार्कंडेयउवाच सतेमुदापरिष्वज्यप्रियसख्युरथात्मजं गम्यतामितिसं
271 सिद्धेवत्सेत्याहसपार्थिवः स्थानेस्यास्यसिमेवत्सयद्येवंकुरुषेविधिं वसैतत्कृतामाप्नुयद्युत्साहेम
नस्तव मार्कंडेयउवाच ततःसधनुःतूणीपाणीर्वद्धगोधांगुलित्रवान् जगामवीरःपातालंतेनगर्तेन
सत्वरः ततोज्यास्वनमत्युग्रंसचक्रेपार्थिवात्मजः येनपातालमखिलंआसीदापूरितांतरं ततोज्यास्वन
माकर्णकुजंभोदानवेश्वरः आजगामातिकोपेनस्वसैन्यपरिवारितः तत्रोयुद्धमभूत्तस्यतेनपार्थिव
सूनुना ससैन्यस्यास्यसैन्येनवलिनोवलशालिना दिनानित्रीणितिसयुद्धायोधितस्तेनदानवः ततःकोपप
रीतात्मामुशालायोभ्यधावत गंधैर्माल्यैस्तथाधूपैः पूज्यमानासुराधिपः अंतःपरेमहाभागप्रजापतिवि
निर्मितः ततोविज्ञातमुशालप्रभावासामुदावती यस्पर्शमुशालंश्रेष्टमभिनम्रशिरोधरा पुनर्यावत्स २७१
गृह्णातिमुशालंतंमहासुरः तावत्सावंदनत्याजैःपस्पर्शातिकशःकृना ततःसगत्वायुयुधेमुशालेना

271A

सुरेश्वरः व्यर्थामुशलपातेस्तेजग्मुस्तेषुचशत्रुषु परमास्त्रेतुनिर्वीर्येसौनंदेमुशलेमुने अस्त्रैशस्त्रैश्चदैते
यः सोयुध्यतरणोरिणा शस्त्रास्त्रैर्नसमस्तस्यराजपुत्रस्यसोसुरः मुशलेनैववलवान्स्तच्चतन्व्यानि कृ
तः ततःपराजित्यसमूपस्तनुरस्त्राणिशस्त्राणिदानवस्यच चकारसघोविरथंततश्चसचर्मखङ्गग्रकरो
भ्यधावत् तमापतंतंरभसात्सुदीर्णाविस्पष्टकोयंत्रिदशेंद्रशत्रुं अस्त्रेणवक्रेणमृविराजपुत्रोजघानका
लानलमुग्रभेरा सपावकास्त्रेणदृढाङ्कितोभृशं तत्याजदेहंत्रिदशारिरात्मजः वभूवसघश्चमहोरगाणां
रसातलांतेसुमहान्विनादः ततोपतत्पुष्पवृष्टिर्महीपालसुतोपरि जगुर्गंधर्वपतयोदेववाद्यानिसस्व
नुः सचापिराजपुत्रस्तंहत्वातैर्नृपतेःसुतौ मोचयामासतन्वंगीतांचकन्यांमुदावतीं तच्चापिमुशले
तस्मिन्कुजंभेविनिपातिते जग्राहनागाधिपतिःअनंतशेषसंमतः तस्याश्चपरितुष्टोसौशेषःसर्वोर
गेश्वरः मुदावत्यामुदाव्याप्तमनोवृत्तिस्तपोधनः सुनंदमुशलस्पर्शात्पाचकारपुनःपुनः योषित्करतल
स्पर्शाप्रभावज्ञापिशोभना मुदावत्यास्ततोनामनागराजस्ततोऽकरोत् सुनंदामितिसानंदःसौनंदगुणजं
द्विज सचापराजपुत्रस्तांभ्रातृभ्यांसहितांपितुः समीपमानिनायात्तुप्रातिपत्याहतंनृपं आनीतौतनयो

तात तथैवेयं मुदावती तवाज्ञया मयान्याय्यत्कर्तव्यं तत्समादिश श्रीमार्कंडेय उवाच ततः प्रहर्षसंपूर्ण
हृदयः स महीपतिः साधु साध्वित्यथाहोच्चैः वत्स वत्सेति सोहृदात् समोजितोस्मि त्रिदशैर्वत्साहं कार
णैस्त्रिभिः त्वं जामाति च यत्प्राप्तो यत्सौरिर्विनिपातितः आगतान्यत्रय च्चापत्यानि मे पुनः सद्गृहाणाद्य शास्त्रे
क्तिपाणिमथपा मयोदितं त्वं राजपुत्रं न्याय्यं याः कन्यापाठ दुहितुर्मम मुदावत्या मुदायुक्तः सत्यवाक्यं कुरु
ष्व मां राजपुत्र उवाच तातस्याज्ञा महाकार्या यद्ब्रवीषि करोम्यहं त्वमेव तात जानासे नैवात्राधिकृता वयं श्री
मार्कंडेय उवाच ततस्तयोस राजेंद्रश्चक्रे वैवाहिकं क्रमं मुदावत्याश्च दुहितुर्नलंदनसुतस्य तु ततः स
हतया रेमे वत्सध्रीर्नवयौवनः रमणीयेषु देशेषु प्रासादशिखरेषु च कालेन गच्छता वृद्धः पितातस्य
नलंदनः वनं जगाम वत्सध्रीः सबभूव महीपतिः इयाज यज्ञैस तदा प्रजा धर्मेण पालयन् पुत्रवत्पाल्य
मानास्तु प्रजास्तेन महात्मना ववृधुर्विषये तस्य न चाभूद्वर्णसंकरः न दस्युर्व्यान दुर्वृत्तो भयमासीन्नु कस्यचि
त् नोपसर्गभयं चैव तस्मिन्शासति भूपतौ इति श्रीमार्कंडेयपुराणे नलंदनवत्सध्रीचरितं समाप्तं १०६ श्रीमा २७२
र्कंडेय उवाच तस्य तस्यां सुनंदायां पुत्रा द्वादश जज्ञिरे प्रांशुः प्रवीरः शूरो रिपुश्च सुचक्रो विक्रमः क्रमः वलीव

२७२A

लोकश्चंडश्चप्रचंडःश्चंडविक्रमः सुनयश्चमहाभागःसर्वसंग्रामजित्तमाः तेषांज्येष्ठोमहावीर्यःप्रांशुरासी
न्नराधिपः अंतरेभूत्पवन्नस्यवभूवुर्वशवर्तिनः तस्ययज्ञेद्विजत्यक्तैरनेकैर्द्रव्यराशिभिः न्यूनवर्णाविशिष्टैश्चस
त्पनामावसुंधरा सम्यक्पालयतस्तस्यप्रजापुत्रानिवौरसान् योभूद्धनचयःकोशस्तेनानिष्पादितास्तकये क्र
तवःशतसाहस्रास्तेषांसंख्यानविद्यते अयुतानिवैर्न्नवकोटीर्नचपद्माद्विभिर्मुने प्रजानिस्तस्यपुत्रोभूद्य
स्ययज्ञेशतक्रतुः अवाप्यतृप्तिमतुलांयज्ञभागैःसुरैःसह दानवानामुदीर्णानांजपाननवतीर्नव वलेच
वलिनांश्रेष्ठोजंभाचासुरसत्तमं अन्याश्चसुमहावीर्यानूजघानामरविद्विषः प्रजानेस्तनयापंचखनि
त्रप्रमुखामुने तेषांखनित्रोराजाभूत्प्रख्यातोनिजविक्रमैः सशांतःसत्यवाक्शूरःसर्वप्राणहितेरितः
स्वधर्मनिरतोनित्यंवृद्धसेवीबहुश्रुतः वाग्मीविनयसंपन्नःक्षतास्त्रोप्यविकत्थनः सर्वलोकप्रियो
नित्यमुवाचैतदहर्न्निशं नंदंत्वशेषभूतानिस्निग्धत्वरिजनेष्वपि स्वस्त्यस्तुसर्वभूतेषुनिरातंकानिसंतु
च माव्याधिरस्तुभूतानांभूत्पानांप्रीतिरस्तुच समृद्धिःसर्ववर्णानांसिद्धिरस्तुचकर्मणां मोलोकाःस
र्वलोकेषुशिवावोस्तुसदामतिः यथात्मनियथापुत्रेहितमिच्छतिसर्वथा तथासमस्तभूतेषुवर्त्तध्वंहित

मार्कं॰ बुभुजुः मासंतुलौकिकालोकान्पापान्प्राप्स्यथवैमुधा येमेत्रस्निस्ततेतस्याप्रीवमस्तुसदाभुवि: यथाग्रमाद्ये
२७२ ष्टिलोकेस्मिन्नसोपिमन्नाप्तिपश्यतु एवंस्वरूपः पुत्रोभूत्खनित्रस्तस्यभूपतेः समस्तगुणसंपन्नः श्रीमा
273 न् दलेक्षणः तेनतेभ्रातरःप्रीत्यापृथक्राज्येषुयोजिताः स्वयंचपृथिवीमेतांबुभुजेसागरांवरां प्राच्यां
तेनकृतःशौरिर्दक्षिणायामुदावसुः दिशिप्रतीच्यांसुनयाउत्तरस्यांमहारथः तेषांतस्यचभूपस्यपृथ
गोत्राःपुरोहिताः वभूवुर्मंत्रिणश्चैववनहिवंशक्रमागताः शौरेरत्रिकुलोद्भूतःसुहोत्रोनामवैद्विजः
उदावसोःकुशावर्तोगौतमान्वयजोभवत् काश्यपोऽप्रतिर्नामसुनयस्यपुरोहितः महारथस्यवा
सिष्ठःपुरोधाभून्महीक्षिणः बुभुजुस्तेस्वराज्यानिचत्वारोपिनराधिपाः खनित्रश्चाधिपस्तेषामशेषवसु
धाधिपः तेषुभ्रातृष्वशेषेषुखनित्रःसमहीपतिः प्रजासुचसमस्तासुपुत्रेष्विवसदाहितः एकदामंत्रि
णाशौरिःसप्रोक्तोविश्ववेदिना विविक्तेपृथिवीपालकिंचिद्वक्तव्यमस्तिमेयस्येयंपृथिवीकृत्स्नायस्यभू २७२
पावशानुगाः सराजातस्यपुत्रस्यतत्पौत्रस्यान्वयासतः इतरेभ्रातरस्तस्यप्राकृस्वल्पविषयाधिपाः
स्येयोतत्पुत्राश्चाल्पकास्तस्मात्तत्पौत्राश्चाल्पकाल्पकाः कालेनक्रासमासाद्यपुरुषात्पुरुषांतरं क्र

273A

ष्योपनीविनोभूपभवंतुपितुरन्वयाः नोपकारंकुरुतेभ्राताभ्रातुस्नेहबलार्प्पणः स्नेहःकः पृथिवीपालपरयोर्भ्रा
तृपुत्रयोः तत्पुत्रयोःपरतरामतिर्भवतिपार्थिव तत्पुत्रःकेनकार्येणाप्रीतियुक्तोभविष्यति अथचेद्येनतेनैवसं
तोषंकुरुतेयदि कार्यनिष्पादकंराज्येकारणंकर्तुमिष्यते राज्यलाभश्चतेकार्यंत्वंकर्त्ताकारणंवयं सोस्माभिः
कारणैराज्यंपितृपैतामहंकुरु फलप्रदाभविष्यामःपरलोकेनतेवयं राजोवाच ज्येष्ठोराजामहीपालो
वयतस्मात्तुजायतः ततःसंभुंक्तेपृथिवींस्वयंचाल्पवसुंधरां वयंतुभ्रातरःपंचपृथ्वीचैकानहामते अतो
स्याःपृथग्गोप्त्र्यंकथंकृत्स्नंभविष्यति विश्वदेवउवाच राज्यस्थितःपूजयेथाज्येष्ठंभूपार्हणैर्वरैः कनिष्ठ
ज्येष्ठताकेयंराज्यंप्रार्थयतांनृणां मार्कंडेयउवाच तथेतिचप्रतिज्ञातेभूभुजातेनसत्तम ।विश्वदेवस्ततोमंत्री
तज्ज्ञात्त्वनयनदृष्टं तेषांपुरोहितांश्चैवआत्मनःशांतिकादिषु ।नियोजयामासततःखनित्रस्याभिचारिके वि
नोदितस्यनिघ्नतान्सामदानादिभिस्तथा चक्रेचपरमोद्योगंनिजदंडप्रबाधने आभिचारिकमत्युग्रमहन्यह
नि कुर्वतां पुरोधसांचतुर्णांतुजज्ञेकृत्याचतुष्टयं विकरालंमहावक्त्रंमहाभीषणदर्शनं समुद्यतमहाशूलंप्र
भूतमातिदारुणं ततस्तदागतंतत्रखनित्रोपत्रपार्थिवः निरस्तंवाप्यदुष्टस्यतस्यपुण्यचयेनतत् कृत्याचतुष्ट

यंतेषुनिपपातदुरात्मसु पुरोहितेषुभूपानांतथावैविश्वदेविनि ततोनिर्हंतुर्निर्दग्धाःकृत्याभिस्तेपुरोहि
ताः विश्ववेदीतथामंत्रीससद्योर्दुष्टमंत्रदः इतिश्रीमार्कंडेयपुराणे १०७ श्रीमार्कंडेयउवाच ततःसमस्त
लोकस्यविस्मयंसोभवन्महान् यदेककालेनेष्टास्ते पृथक्पुरनिवासिनः ततःसमस्तावनिधनंयातान्
भ्रातृन्पुरोहितान् मंत्रिणंचतथाभ्रातुर्दग्धंतंविश्ववेदिनं किमेतदितिसोतीवविस्मितोमुनिसत्तम एवंत्रि
नोमहाराजानाज्ञानाद्यैवकारणं ततोवशिष्टंपप्रच्छसराजागृहमागतं यतकारणंविनेष्टास्तेभ्रातृमंत्रि
पुरोहिताः तेनपृष्टस्तदाचाहयथावृत्तंमहामुने यत्यौरेमंत्रिणाप्रोक्तं यथाशौरिरुवाचह यथावानु
ष्ठितंतेनभ्रातृणांभेदकारिवै मंत्रिणातेनदुष्टेनवकुर्यच्चपुरोहिताः यन्निमित्तंविनेष्टास्तेदुष्टाःपापस्या
यकारिणः पुरोहितास्तथाराज्ञःपुत्राश्चवपिदयावतः सतछ्रुत्वाततोराजाहाहतोस्मीतिवैवदन् नि
निंदात्मानमत्यर्थंवशिष्टस्याग्रतोद्विज राजोवाच धिग्मामपुण्यसंस्थानंश्चाल्पभाग्यमपंडितं देवदोष
गतंपापंसर्वलोकाविगर्हितं यन्निमित्तंविनष्टंपुरोहितचतुष्टयं मत्तःकोन्यःपापतरोभविष्यतिपुमा २७४
न्भुवि नाभविष्यायदिपुपान्नह मत्रमहीतले कारणात्वंगतोयोहंविनाशायद्विजन्मनां कुर्वंतेःस्वा

२७५A

मिनस्यार्थेभ्रातृणांममजायकाः नाशंययुर्नदुष्टास्तेदुष्टोहंनाशकारणे किंकरोमिक्वगच्छामिनान्यो
मत्तोहिपापकृत् पृथिव्यांमस्तिहेतुत्वंद्विजनाशस्ययोगः इत्थंमुद्विग्नहृदयःखनित्रःपृथिवीपतिः
वनंपियासुःपुत्रस्यकृतवानभिषेचनं अभिषिच्यसुतंराज्येक्षुपसंज्ञंमहीपतिः भार्याभिस्तिसृभिःसा
र्द्धंवनंसतपसेययौ तत्रगत्वातपस्तेपेवानप्रस्थविधानवित् यातानित्रीणिवर्षाणांसार्द्धानिनृपसत्त
मः तपःसाक्षीणदेहस्तुराजवर्ज्जोद्विजोत्तमः निरुद्ध्यासर्वस्रोतांसितत्याजासून्वनेचरः कृतपुण्यं
ययौलोकान्सर्वकामदुघोक्षयान् अश्वमेधादिभिर्यज्ञैरवाप्यैनराधिपः भार्याभिस्तिसृभिस्ताभिःस
मंतेनैवतत्युज्जुः प्राणान्समस्तलोकस्यविस्मयःसोभवन्महीन् यदेककालंतेभुस्ते पृथक्पुरनिवा
सिनः प्राणानुवायुःसाल्पैकतेनैवसुमहात्मना एतत्खनित्रचरितंश्रुत्वाल्पषनशनं पर्वतांचमहात्मा
गक्षुपस्यातोनिशामय इतिश्रीमार्कंडेयपुराणेखनित्रचरितंसमाप्तं १९ श्रीमार्कंडेयउवाच क्षुपः
या खनित्रपुत्रस्तुप्राप्यराज्यंयथापिता तथैवपालनामास प्रजाधर्मेणरंजयन् सदानशीलोयष्टाचयज्वा
नामवतीपतिः समःशत्रौचमित्रेचव्यवहारेष्वकरः विवावतारंसंचक्रेदेवमातुरथोदरे कृच्छ्रचांद्रायणा

मार्कं०
२७५
275

दीनिसा च कृतु समाहिता शुचिः संधारयाम्येनं दिव्यं गर्भमिति द्विज ततस्तां कश्यपः प्राह किंचित्कोपप्लुता
क्षरं । किं मारयसि गर्भांडमिति नित्योपवासिनी सा च तं प्राह गर्भांडमेतत्पश्येति कोपना न मारितो विप
क्षाणां मृत्युवेयं भविष्यति इत्युक्त्वा सा तदा गर्भमुत्ससर्ज सुरारणिः जाज्वल्यमानं तेजोभिः पत्युर्वचन
कोपिता तं दृष्ट्वा कश्यपो गर्भमुद्यद्भास्करवर्चसं तुष्टाव प्रणतो भूत्वा ऋग्भिराद्याभिरादरात् संस्तू
यमानः स तदा गर्भांडात्प्रकटोऽभवत् पद्मपत्रसवर्णाभस्तेजसा व्याप्तदिङ्मुखः अथांतरिक्षादाभाष्य
कश्यपं मुनिसत्तमं सतोयमेघगंभीरा वागुवाचाशरीरिणी मारितं च यतः प्रोक्तमेतदंडं त्वया दितेः
तस्मान्मुने सुतस्तेऽयं मार्तंडाख्यो भविष्यति सूर्याधिकारं च विभुर्जगत्येष करिष्यति हनिष्यत्यसु
रांश्चायं यज्ञभागहरानरीन् देवी निशम्येति वचो गगनात्समुपागतं प्रहर्षमतुलं याता दानवास्ते
हतौजसः ततो युद्धाय दैतेयानाजुहाव शतक्रतुः सह देवैर्मुदा युक्तो दानवास्तं ददाभ्ययुः तेषां
युद्धमभूद्घोरं देवानामसुरैः सह शस्त्रास्त्रदीप्तसंदीप्तसमस्तभुवनांतरं तस्मिन्युद्धे भगवता मार्तंडे २७५
नानिरीक्षिताः तेजसा दह्यमानास्ते भस्मीभूता महासुराः ततः प्रहर्षमतुलं प्राप्ताः सर्वे दिवौकसः

275A

रादिवर्द्धिनि एकदासमहीपालो निजस्थानगतोमुने सूतैस्सक्तोयथापूर्वं क्षुपोराजातथाभवान् ब्रह्म
णास्तनयपूर्वं क्षुपोभूत्पृथिवीपतिः यावद्वृत्तचरितमस्याभूत्तद्वृत्तव विचेष्टितं राजोवाच श्रोतुमिच्छामिच
रितं क्षुपस्यसुमहात्मनः यदितादृक्मयाशक्यंचेष्टितंतत्करोम्यहं सूताऊचुः सचकाराकरान्नृपराज्ञा
गोब्राह्मणान्पुरा सम्पाद्येपेणचैवोर्व्यामिष्टंतेनमहात्मना राजोवाच तेषांमहात्मनांजातंकोनुयास्यतिम
द्विधः तथापुष्कृतचेष्टानांचेष्टास्वनुपायवान्भवेत् तच्छ्रूयतांप्रतिज्ञामेयासंप्राप्याद्यकर्म्मणा क्षुपस्या
नुकरिष्यामिमहाराजस्यचेष्टितं त्रीन्सप्तान्यज्ञान्करिष्यामिशम्पापातेगतेगते पृथिव्यांचतुरन्तायांप्रति
ज्ञेयंकृतामया यच्चगोब्राह्मणाःपूर्वमदन्भूभृतेकरं तमेवप्रतिदास्यामिब्राह्मणानांतथागवां श्रीमार्क
ण्डेयउवाच इतिप्रतिज्ञायवचःक्षुपस्तत्कृतवांस्तथा शम्पापातेसयज्ञांस्त्रीनियाजयजतांवरः गोब्राह्म
णांपुराराज्ञामदच्चैवयंकरं तावत्संख्यामदाद्वित्तमन्यज्ञोब्राह्मणायसः तस्यपुत्रोभवद्वीरःप्रमथा
यामनिंदतः यस्यप्रतापशौर्याभ्यांकृतावश्यामहीभृतः तस्यानंदिनीनामवैदर्भीदयिताभवत् विविं
शतनयंयस्यांजनयामाससप्रभुः विविंशेशासतिमहींमहीपालेमहौजसि महीतलमभूत्स्व्यापंनि

मार्कं॰ रंतरतयानरैः ववर्षकालेपर्यन्योमहीसस्यवतीतथा सकलानिचसस्यानिरसवंतिफलानिच रसाःपुष्टि
२७६ कराश्चासन्पुष्टिर्न्नोन्मादकारिणी नवित्तनिचपान्दृणांप्रभूतमदहेतवः तत्रातापेनरिपवोनयमायुर्म
हामुने स्वास्थांजनः सुहृद्वर्गोमुदमिष्टामिपूरिकां इष्ट्वासयज्ञान्सुवहून्सम्यकूसंपाल्यमेदिनी सं
276 ग्रामेनिधनंप्राप्यशक्रलोकमितोगतः इतिश्रीमार्कंडेयपुराणेविंशतिचरितसमाप्तं १९ मार्कंडेय
उवाच तस्यपुत्रःखनीनेत्रोमहाबलपराक्रमः यस्ययज्ञेषुगायंतगंधर्वाविस्मयान्विताः खनीनेत्रसमो
नान्योभुवियज्वाभविष्यति येनयज्ञायुतेपूर्णेदत्ताएथ्वीससागरा दत्वाचसकलांएथ्वींव्राह्मणानांम
हात्मनः तपसाद्रव्यमासाद्यमोचयेत्साधकेनयः यतश्चप्राप्यवित्तर्द्धिमतुलांदातसत्रमात्र जगरकुर्व्राह्म
णाविप्रनान्यराज्ञांप्रतिग्रहं सप्तषष्टिसहस्राणिसप्तषष्टिशतानिच सप्तषष्टिचयोयज्ञानयजाभूरिदक्षि
णान् अपुत्रःसमहीपालोमृगयांमुपचक्रमे पुत्रार्थपितृयागायमांसकामोमहामुने अश्वारूढोमहा
सैन्यमेकएवमहामुने वद्धगोधांगुलित्राणोवाणखड्गधनुर्धरः तेवाहयंतंतुरगमन्पातोगहनाद्वनात्
विनिक्रम्यमृगप्राहमांहत्वाभिमतंकुरु राजोवाच अन्येमृगापलायंतेमत्सुभीतावैलोक्यमां कथं २७६

276A

मात्मप्रदानत्वंमत्पवेकर्त्तुमिच्छसि मृगउवाच अपुत्रोहंमहाराज दृथाजन्मप्रयोजनं विचारयंनपश्यामि
प्राणानामिहधारणं मार्कंडेयउवाच अथाजेतमृगप्राहतमन्योवसुधाधिपं मृगस्पतस्पप्रत्पक्षमलमे
तेनपार्थिव घातयस्त्वेतिमांमांसैर्तिजकर्मसमाचर यथाकृतार्थतातेस्पान्ममचास्युपकारियत् पुत्रा
र्थंतुमहाराजस्वपितॄन्यष्टुमिच्छसि अपुत्रस्पास्पमांसेनलप्स्पसेवांछितंकथं यादृक्कर्मविनिष्पाद्यं
तादृक्द्रव्यमुपाहरेत् दुर्गंधैर्नसुगंधानांगंधानांमुविनिर्णयः राजोवाच वैराग्यकारणंप्रोक्तमथोना
पुत्रताममकथ्यतांप्राणासंत्यागेयत्तेवैराग्यकारणं मृगउवाच वहवोमेसुतास्पवध्वोदुहितरस्त
था तच्चिंतादुःखदावाग्निज्वालामध्येवसाम्यहं सर्ववध्यानरेंद्रेयंमृगज्यातिःसुकातरा तेषपत्नेषु
मेवातिममत्वंतेनदुःखितः मनुष्यसिंहसार्दूलवृकादिभ्योविभेम्पहं विहीनात्सर्वसत्वेभ्यः स्वच्छगा
लादपिप्लवो सोहंनिमित्तवंधूनामिमांपृथ्वींवसुंधरा नृसिंहादिभयात्सर्वामिच्छामिसुनृपंसकृत् दृएं
येन्येपिखादंतिगजादितुरगादिकाः तांस्तेषांपोषणायाहमिच्छामिनिधनंगतान् ।निष्क्रांतेषुततस्तेषुम
मापत्येषुवैपृथक् भवंतिचिंताःप्रातयोममत्वाकृष्टचेतसः ।किंकूटपाशंकिंरज्जुंवागुरांकिंसुतोमम प्रा

तच्चवंधनं किं वा न सिंहादिवशं गतः प्राप्तोयमेकः संप्राप्तास्ते वस्यां कीदृशी मम सांप्रतं विलयं

मार्कं ते वै येगतासु महावनं दृष्ट्वा प्राप्तान्ममाभ्यासमहं तानात्मजान्नृपः एकदुःखं सितः क्लेश्यामि

२७७ क्लामि रजनी पुनः प्रभाते दिवसं क्लेमममस्तगे क्लें निशामपि वांछाम्यहं कदा क्लेमं सर्वकालं न विप्र

277 ति एतत्ते कथितं भूय मम मोद्वेगस्य कारणं अतः प्रसादं कुरु मे वालोयं पात्यतामपि इति दुःखसमावि

ष्टः प्राणान्नाहं त्यजामि यत् तत्कारणं निवोधत्वं ब्रुवतो मम पार्थिव असूर्या नाम ते लोका यानाह्वं त्वा

त्मघातकाः यज्ञोपयुक्ताः पशवः संप्रयांत्युक्ततीः प्रभो अग्निः पशुरभूत्पूर्वं पशुराशी ज्वलाधिपः

भास्वानथो पुष्टतीः प्राप्तो यज्ञे निष्ठामुपागतः तस्मात्त्रिष्वं क्रियां कृत्वा नयमामुक्ततं नृप आत्मनः श्रिंवति

तं कामं पुत्रलाभमवाप्स्यसि पूर्वमृग उवाच राजेंद्र नैषदं तव्योधन्योयं सुकृती मृगः वहवः स्तनया यस्य

हं तव्योहमसंततिः उत्तरमृग उवाच एकदेहमवं यस्य दुःखं धन्यः स वै भवान् वहनि यस्य देहानि तस्य दुः

खान्यनेकशः एकोयदाहमासं हि प्राक् तदा देहजं मम दुःखमासीन्ममत्वेन भार्यायां तदभूद्द्विधा २७७

यदा जातान्यपत्यानि तदा यावंति तानि वै तावच्छरीरभूतानि मम दुःखान्यथाभवन् सकृता

277A

र्थो भवान्यत्र नाति दुःखाय संभवः इह दुःखाय मे सूतिः परत्र च विरोधिनी इतो रक्षणपोषार्थमपत्यानां
करोम्यहं चिंतयामि न संभूतिर्येन मे नरके ध्रुवं राजोवाच न वेद्मि किं संततिमान् धन्यो ऽपुत्रो नु किं
मृगाः पुत्रार्थं ध्यायमारंभो मम दोलायते मनः दुःखाय संततिः मैहिकामुष्मिकाय यत् तथापि तन
यात् यांति क्रूराणि नीतिश्रुतं मया सोहं यतिष्ये पुत्रार्थं मृते प्राणिवधं नृप तपसैव प्रचंडेन यथा पूर्वं महो
पतिः इति श्रीमार्कंडेयपुराणे खनित्रचरिते ११० श्रीमार्कंडेय उवाच ततः स नृपतिर्गत्वा गोमतीपा
पनाशिनीं तत्र तुष्टाव नियतो भूत्वा देवं पुरंदरं तप्यमानस्तपः सोथ यतवाक्कायमानसः तुष्टाव प्रयतः
शक्रमपत्यार्थं महीपतिः तस्य तस्य स्तोत्रेण तपसा भक्त्या च त्रिदशेश्वरः तुतोष भगवानिंद्रः प्राह चेदं मह
मुने अनेन तपसा भक्त्या स्तोत्रस्योच्चारणेन च परितुष्टोस्मि ते भूप ह्रियतां भवतां वरः राजोवाच अपुत्रस्य
सुतो मे स्तु सर्वशास्त्रभृतां वरः स सदाव्याहतैश्वर्यो धर्मविद्धर्मकृत्कृती मार्कंडेय उवाच तथेति चो
क्तः शक्रेण राजा प्राप्तमनोरथः प्रजापालयितुं भूप आजगाम निजं पुरं तत्रास्य कुर्वतो राज्यं सम्यक्
पालयतः प्रजाः अजायत सुतो विप्र तदा शक्रप्रसादजः तस्य नाम पिता चक्रे बलाकाश्चेति भूपतिः

मार्कं॰ अस्त्रग्रामविशेषांस्तग्राहयामासतंसुतं ।पितर्युपरतेस्वर्गमधिराज्येऽस्थितोनृपः वलाकाश्वोवशन्नि
२७८ न्येभुविसर्वमहोक्षितः करंचदापयामाससारग्रहणापूर्बकं ससर्वभौमिकोराजापालयामासच
278 प्रजा अथाखिलनरेंद्रास्तेदायादास्तस्यदुर्मदाः नचाप्युप्रायसततंतेतस्मैप्रददुः करान् व्युत्थि
ताः स्वेषुदेशेषुनसंतोषपरास्ततः भुवंतस्यनरेंद्रस्यजगृहुस्तेनराधिपाः गृहीतोयांततोभूम्यांव
लाश्वःसवलोमुने तस्थौसनगरेभूपैर्विरोधंवहुभिर्गतः समेत्यसुमहावीर्याःससाधनधनास्ततः सगृहीतात्म
रुरुधुस्तंमहीपालंपुरेतत्रनरेश्वराः पुरस्यरोधनेसाथकुपितःसमहीपतिः स्वल्पकोशोल्पदं व सुखदा. प
डश्चवैलक्ष्यंपरमंगतः अपश्यमानःप्राणामवलो।द्विजसत्तम करौमुखाग्रतःकृत्वानिशश्वासा दिवीशोवन्हे
र्तमानसः ततोऽस्यहस्तविवरान्मुखानलसमाहताः ।निर्ययुःशतशोयोधाःरथनागतुरंग मुने ५
माः ततःक्षणेनतत्सर्वंनगरंतस्यभूपति व्याप्तमासीद्वलौघेनसारेणाखिलान्मुने अनिर्ययुः
शतशोयोधाःरथनागतुरंगमाः यसौपिवलोघेनमहतातेनसंवृतः निर्गम्यनगरात्तस्मादवजिन्नेनरा २७८
धिपान् ।जित्वाचवशमानीयचकारकरदान्पुनः यथापूर्बंमहाभागमहाभागोनरेश्वरः क्षतयोकरयो

278A

करयोजज्ञेयतस्तस्यारिहानिदं वलंकरंधमस्तस्यास्सवलाय्योभिधीयते सधर्मात्मामहात्माचसमैत्रःस
र्वजंतुषु करंधमोभवद्भूपस्त्रिषुलोकेषुविश्रुतः संप्राप्तस्यपरामर्त्तिंददावरिविनाशनं वलंधर्मोह्निचा
क्षिप्तमभ्युपेत्यस्वयंनृपं इतिश्रीमार्कंडेयपुराणेकरंधमचरिते १११ श्रीमार्कंडेयउवाच वीर्यचंद्रसुता
सुभ्रूर्वीरानामसुव्रता स्वयंवरेतांजगृहेमहाराजःकरंधमः तस्यांपुत्रंसराजेंद्रोजनयामासवीर्यवान् अ
विक्षितमितिख्यातिमुपेतंजगतीतले जातेतस्मिन्सुतेराजासदैवज्ञानपृच्छत कच्चित्प्रशस्तनक्षत्रे
लग्नेसुतोमम कच्चिदालोकितंजन्मममपुत्रस्यशोभनैः ग्रहैकच्चिन्नदुष्टानांग्रहाणांदिगरूपथंगतः
इत्युक्तास्तेनदेवज्ञास्तमूचुर्नृपतिंततः प्रशस्तेमुहूर्तेनक्षत्रेलग्नेचैवसुतस्तव समुत्पन्नोमहावीर्यो
महाभागोमहाबलः भविक्षितिमहाराजमहाराजस्तवात्मजः अवेक्षतेचदेवीनांगुरुःशुक्रश्चसप्तमः
सोमश्चतुर्थतनयंतवैनंसमवेक्षते उपांतिसंस्थितश्चैवसोमपुत्रोथवेक्षते नावेक्षितेनुसविता
नभौमोनशनैश्चरः तवपुत्रंमहाराजधन्योयंतनयस्तव सर्वकल्याणसंपत्तिसमवेतोभविष्यति
श्रीमार्कंडेयउवाच इतिदेवज्ञवचनंनिशम्यवसुधाधिपः हर्षपूर्णमनाःप्राहनिजस्थानगतस्तदा

अवेक्षतेचदेवानांगुरुःसोमसुतोबुधः नावेक्षतेनमादित्योनार्कसूनुर्नभूमिजः अवेक्षतेतियस्त्रोक्तोभव
मार्कं ङ्गिर्वहुशोवचः अविक्षितेतितेनास्यख्यातंनामभविष्यति श्रीमार्कंडेयउवाच अवीक्षितस्सुतस्तस्यवेद
२७९ वेदांगपारगः अस्त्रग्राममशेषंसकएवपुत्रादवाप्तवान् स्वरूपेणतिमिषज्ञोदेवानांपार्थिवात्मजः बु
279 ध्यावाचस्पतिःकांत्याशशांकःतेजसारविः धैर्यगाधिसत्वध्यैर्वोवीसहिष्णुत्वेनवीर्यवान् शौर्येणनसमस्त
स्यकश्चिदासीन्महात्मनः स्वयंवरेतंजग्रहेहेमवर्मात्मजावरा सुदेवतनयागौरीसुभद्रावलिनःसुता
लीलावतीवीर्यसुतावीरभद्रासुताविभु भीमात्मजामान्यवतीदंपुत्राकुमुद्वती याश्चैनंनाभिनंदंतिस्व
यंवरकृतेक्षणां ताश्चापिसवलावीरोजग्राहनृपतेस्सुतः निराकृत्यनृपान्सर्वान्तेषांपितृकुलानिच
स्वंहिवीर्यसमाश्रित्यवलमानमदोद्धतः एकदानुविशालस्यविदिशाधिपतेःसुतां विशालिनींस
सुदंतीस्वयंवरकृतेक्षणां परिभूयाखिलान्भूपान्स्वेच्छयानेक्षतस्तया वलाज्जग्राहविप्रर्षेयथान्यां
वलगर्वितः ततस्तेभूभृतःसर्वेवहुशस्तेनमानिना निराकृताःसुनिर्विग्नाःप्रोचुश्चान्योन्यमाकुलाः क्ष २७९
मतांवंचनामेतांकस्माद्ववलिशालिनां वहुनामेकवर्गाणांजन्मधिग्वोमहीभृतां क्षत्रियोयःक्षतत्राणे

२७९A

ते

वर्धमानस्य दुर्मदैः करोति तस्य तन्नाम दृष्ट्वैवान्ये हि विभ्रति आत्मनोपि ह्यनीशांकुशाद स्मादकुर्वतां भवतां
क्षत्रियकुले जातानां कीदृशी मतिः उच्चार्यते स्तुतिर्या वन् सूतमागधवंदिभिः सास त्यामात्दृथा वीरा भवं त्वरि
विनाशनात् चरतां मा दृष्ट्यैवैष तूर्यशब्दोदिर्गतरे पौरुषाश्रयिणः सर्वे विशिष्टकुलसंभवा विमेति को न मर
णं तु कोयद्देन विना मरः विचिंत्यैतन्न हातव्यं पौरुषं शस्त्रपातिभिः एवं निशम्य ते भूयाः प्रस्पष्टमर्षपूरिताः
ऊचुः परस्परं सर्वे समुत्तस्थुश्च सायुधाः केचिद्रथानारुरुहुः केचिन्नागान् तथा हयान् युद्धे मर्षपराधीना श्रा
स्तमुपेता पदातयः इति श्रीमार्कंडेयपुराणे अविक्षितचरिते ११२ श्रीमार्कंडेय उवाच इति संग्रामसमस्तैर्नृ
पान्भूपसुतास्तथा निराकृतास्ते वहुशः तत्कालं चाप्यविक्षिता ततो वभूव संग्रामस्तस्य तैः सह दारुणः एकस्य
वहुभिर्भूपैर्भूपपुत्रवरैर्मुने तेसि शक्तिगदावाणपाणयस्तं स दुर्मदा अभिघ्नंतो युयुधिरे तैस्समस्तैरसावपि सता
नू शरशतैरुग्रैर्विभेद नृपनंदनः कृतास्त्रो वलवान्चाणोस्ते च तं विभिदुः शतैः चिच्छेद कस्यचिद्वाहुं तथान्यस्य
शिरोधरां हृदि विव्याध चैवान्यमन्यं वक्षस्यताडयन् करं चिच्छेद करिणस्तुरगस्य तथा शिरः रथस्यैषां तथै
वाश्वान्रथस्या न्यस्य सारथीन् वाणेनापतितश्च क्रोधद्विधावाणोस्तथान्यपान् चिच्छेदान्यस्य खड्गं च

धनुरन्यस्यलाघवान् तनुत्रेपहतेचैवननाशान्योनृपात्मजः अविद्धिताडितश्चान्यः पदातिः प्रजहौरणं इ
मार्कं॰ त्याकुलीकृतेतस्मिन्समग्रेराजमंडले तस्थुसप्तशतावीरामरणोकृतनिश्चयाः अभिजात्यवयःसौर्यवीर्यज्ञा
२८० समन्विताः निर्जितेसकलेसैन्येपलायनपरायणे तैःसमेत्यमहीपालैःसतुपुत्रोमहीभृतः युयुधेधर्मयु
280 द्धेनतैःसार्द्धंनातिकोपितः ।विछिन्नपत्रकवचान्सतानपिमहावलः कर्तुंव्यवसितस्तेचततःक्रुद्धा
महामुने धर्ममुत्सृज्ययुयुधर्युध्यमानेनधर्मतः नरेंद्रपुत्राप्रस्वेदजलक्लिन्नाननाःसमं विव्याध
कश्चिद्बाणौघैकश्चिच्चिच्छेदकार्मुकं ध्वजमस्यापरोबाणैश्छित्वाभूमावपातयत् जघ्नुरन्येत
थैवाश्वान्ववंतुश्चापरेरथं गदापातैस्तथैवान्येवाणैःपृष्ठमताडयन् छिन्नेधनुषिसक्रोधःसत
दानृपतेःसुतः जग्राहसिंतथाचर्मतदप्यन्योप्यपातयत् छिन्नासिचर्माजग्राहसगदांगादिनांव
रः तामप्यन्यःक्षुरप्रेणचिच्छेदकृतहस्तवत् अन्येशरसहस्रेणघातेनान्येनराधिपाः विजिदुःको
ष्टकीकृत्यधर्मयुद्धपराङ्मुखाः सविह्वलःपपातोर्व्यामेकोवहुभिरर्दितः राजपुत्रोमहाभागोववं २८०
धस्तेवसंमतः तमधर्मेणतेसर्वेगृहीत्वान्नृपतेस्सुतं विशालेनसमंराज्ञावैदिशंविवुशुःपुरं हृष्टाः

280A

मुदितावद्गमादायचनृपात्मजं स्वयंवरायसाकंन्मान्यस्तातेनततः पुनः पुनपुनः श्च पित्रोक्तातथापि चपुरोधसा आलंव्मतामितिवचोयस्तेराजसुरोचिते यदासामानिनीकिंचिन्नजग्राहवरंमुने तदाय प्रछदैवज्ञंविवाहार्थंनरेश्वरः विशिष्टतरमेतस्माद्विवाहायदिनंवद अद्यैतंदीदृक्कुसंजातंयुक्तंविघ्नो पपादिकं श्रीमार्कंडेयउवाच इतिपृष्टोनरेंद्रेणसदैवज्ञोविमृश्यतत् दुर्मनाप्राहविज्ञातपरमार्थो महीपतिः भविष्यंतिपराणीहदिनानिपृथिवीपते प्रशस्तलग्नयुक्तानिशोभनान्यचिरेणच करि ष्यसिविवाहंत्वंतेषुप्राप्तेषुमानद अलमेतेनयत्रायंमहाविघ्नउपस्थितः इतिश्रीमार्कंडेयपुराणे अवीक्षितचरिते १२२ श्रीमार्कंडेयउवाच ततःसुस्रावतंवद्धंतनयंसकरंधमः तस्यपत्नीतथावीरा तथाचान्येमहीभृतः तमधर्मेणतनयंवद्धंश्रुत्वामहीपतिः समस्तेपृथिवीपालेष्विरंदध्यौमहा मुने केचिदूचुर्महीपालावध्याःसर्वेमहीक्षितः यैरेकःसंयुगेवद्धःसमस्तैस्तैरधर्मतः युध्यतांवाहि नीशीघ्रमूचुरन्येकिमास्यते विशालोवध्यतांदुष्टस्त्वेचयेऽपेसमागताः अन्येतथैचुर्धर्मोऽत्रत्यक्तःपू र्वमवीक्षिताः अन्यथिनवलाद्येनगृहीतातमवांछिती स्वयंवरेषुप्रोषेषुतेनराजसुतातदा खलीक्त

ताततः सर्वैस्समेत्यचवशीकृतः तेषामेतद्वचः श्रुत्वावीरावीरप्रजावती वीरगोत्रसमुद्भूतावीरपुत्रीप्रह
मार्कं· र्षिता उवाचभर्तुःप्रत्यक्षमथेषांचमहीक्षितां भद्रंकृतंभद्रभुजाममपुत्रेणपार्थिवाः गृहीतायद्बला
२८१ त्कन्याजित्वासर्वमहीक्षितः तदर्थंयुद्ध्यमानोयःपरुद्धएकोनधर्मतः तदप्यस्मत्सुतस्याजौमन्येनाप
281 चयप्रदं एतदेवाहिपौरुष्यंयदमर्षवतांनरः नीतिंनगणयत्येवाजिघांसुरिवकेशरी स्वयंवरायवि
न्यस्तांममपुत्रेणकन्यका वलाद्गृहीताभूपानांपश्यतामतिमानिनां क्वक्षात्रेयकुलेजन्मक्वयाक्वा
रानसेविता वलादेवप्रमादत्तेक्षत्रियोवलिनांपुरः लोहश्रृंखलबद्धानानवशंयांतिकातराः प्र
सह्यकरिणोयांतिगजानांधर्मशालिनः तदलंदौर्मनस्येनश्लाघ्यमेवास्यवंधनं युष्माकमप्ययुक्तानानां
श्वरिमूर्द्धनिपातितां क्वचेदंपृथिवीपालानांपृथ्वीपुत्रादिकंवपु भार्याकार्याणिभिन्नानिततोजा
नातिगौरवं तद्वीर्यताराणायासुस्पंदनान्याधरायता सज्जीकुरुतनामाश्वमचिरेणासुसारथी म २८१
न्यध्वंकिंमहीपालैर्वहुभिःसरविग्रहं प्रभूताएवतोघायमकृस्याल्पवलक्रियाः कस्यनाल्पेषुसामर्थ्यं
नरेंद्रारिषुजायते यस्योनविद्यतेभीतिकातरस्यापिप्राणुषु व्याप्यलोकान्समस्तान्योस्वजिभूयाहि

281A

तान्नरः रोचतेनिसःश्रूरःस्तामांसीवदिवाकरः मार्कंडेयउवाच इत्थंमुक्तस्पितोराजातयापत्याकरं
धमः चकारसवलोद्योगंहंतुंपुत्राहितामुने क्षिप्रंससैन्यस्तत्रागातेपुत्रविद्विषः ततस्तस्यसमंभूपैर्वि
शालेनचसंगरः वभूववत्सपुत्रस्यतैरशेषैर्महामुने देनत्रयमभूत्क्रुद्धस्तेनराज्ञासमंतदा करंधमेनरा
ज्ञानंविशालस्यानुकुर्वतां यदापराजितप्रायंतत्सर्वंभूपमंडलं तदाविशालोयकरःकरंधममुपस्थि
तः करंधमोपिसंप्रीत्यातेनराज्ञाभिपूजितः विमुक्तेतनयेतत्रानिशांतंसुखमाविशत् तांचकन्यांस
मादायविशालःसमुपस्थितः अविक्षित्प्राहविप्रर्षे विवाहार्थंपितुःपुरः नाहमेतांग्रहीष्यामितन्वीमन्या
योषितंनृप परैरस्यानिरीक्षन्त्याःसंग्रामेहंपराजितः अन्यस्मैसंप्रयच्छेमांएषावान्यैहृतगोतुवै अखंडित
यशोवीर्ययःपरैर्नविमानतः परैर्विमानतोहंवैकातरेयंतयावला किमत्रपुरुषत्वंमेनैतस्यासमवासरं
स्वतंत्रनामनुष्याणांपरतंत्रातथावला नरोपिपरतंत्रोयतस्यकीदृग्मनुष्यता सोहमस्यामुखंभूयोनु
ष्टावर्त्सिदताकथं योहमस्यापरैर्भूमौपरैर्भूपखिलीकृतः कथंपाणिंग्रहीष्यामिपुरुषत्वविनाकृतः
इत्युक्तेतेनतनयामुवाचजगतीपतिः श्रुतेतेवचनंवत्सवदतोस्यमहात्मनः परयान्यंपतिंयत्रमनसोर

मतेष्फुने वयंवासंत्रयच्छामोयत्रतेप्रियतेमनः एतयोस्त्वंकमातिष्टमार्गमारोतुचिराननने कन्याउवाच परा
मार्कं॰ जितोयंवहुभिर्भवद्भिर्ममगोचरन् संग्रामेतद्यशोवीर्यहानिकारिनपार्थिव एकोवहूनांयुद्धायगजाना
२८२ मिवकेसरी यत्संस्थितः परंसौर्यंतेनास्यप्रकटीकृतं नकेवलमयंतस्थौयुद्धेतेप्यखिलाजिताः वहु
282 श्रोनेनयत्नेनविक्रमोपिप्रकाशितः शौर्यविक्रमसंयुक्तमिमंसर्वेमहीक्षितः धर्मयुद्धमधर्मेणाजि
तवंतोऽत्रकात्रया नचापिरूपमात्रेहंलोभमस्यगतापितः सौर्यविक्रमसंयुक्तमिमंसर्वेमहीक्षितः
धर्मयुद्धमधर्मेणाजितवंतोऽत्रकात्रया नचापिरूपमात्रेहंलोभमस्यगतापितः सौर्यविक्रमसंयुक्त
मिमंसर्वे धैर्याणिहरंत्पस्यमनोमम तत्किमुक्तेनवहुनायाच्यतांमत्कृतेनृप त्वयामसानुभावोयंनान्यो
मेभवितापतिः विशालउवाच राजपुत्रसुताप्राहममैतच्छोभनंवचः एवमेतत्वयानुल्यः कुमारोनमही
तले अधिसंवादितेशौर्यमतोवचपराक्रमः पावयास्मत्कुलंवीरदुहितुर्मेपरिग्रहात् राजपुत्रउवाच
नाहमेनांग्रहीष्यामिनचान्यांयोषितंनृप आत्मन्येवहिमेवुद्धिः स्त्रीमयामनुजेश्वर मार्कंडेयउवाच त २८२
तः करंधमः प्राहपुत्रेयंग्रह्यतांत्वया विशालतनयासुभ्रूस्त्वयिदार्ढ्यवतीदृढं राजपुत्रउवाच नाज्ञांगु

282A

कदाचिन्ने कृतपूर्वो मया प्रभो तथाज्ञापय मां तात यथाज्ञां न मिनद्मिते श्रीमार्कंडेय उवाच अत्यंतनिश्चितमतौ तस्मिन्‌ राजसुते सुतां तामुवाच विशालोपि व्याकुलो हृतमानसः निवर्त्स्यतां पुनः पुत्रि एतस्मात्त्वं प्रयोजनात्‌ अन्यं वरय भर्त्तारं संतप्ये कैर्नेन नृपात्मजाः कन्योवाच वरं दृष्टोस्म्यहं तात मामेष यदि नेच्छति तपसान्यो न मे भर्त्ता जन्मन्यस्मिन्‌ भविष्यति श्रीमार्कंडेय उवाच ततः करंधमो राजा विशाले वसमं मुदा स्थित्वा दिनत्रयं तस्थे निजमभ्याययौ पुरं अविच्छिदपि तेनैव पित्राद्यैस नराधिपैः निदर्शनैः पुरावृत्तैः सांत्विता भ्यगमत्पुरं सा पिकन्या वनं गत्वा नस्ट्रष्टा निजबांधवैः तपस्तेपे निराहारा वैराग्यं परिमास्थिता निराहाराय दासा तु मासत्रयमवस्थिता संप्राप परमामार्त्तिं कृशा धमनिसंतता संदोन्साहा ततन्वंगी मुमूर्षुरतिबालिका देहत्यागाय साचक्रे तदा बुद्धिं नृपात्मजा आत्मत्यागाय तां ज्ञात्वा कृतबुद्धिं सुरास्ततः समेत्य प्रेषयामासुर्देवदूतं तदंतिकं समुपेत्य सुतां प्राह दूतोहं पार्थिवात्मजे प्रेषितस्त्रिदशैस्तुभ्यं यत्कार्यं तन्निशामय न भवत्या परित्याज्यं शरीरमतिदुर्ल्लभं त्वं भविष्यसि कल्याणि जननी चक्रवर्त्तिनः त्वत्पुत्रेण महाभाग भोक्तव्यानिहतारिणा अव्याहताज्ञेन चिरं सप्तद्वीपवती मही हंतव्यस्तेन दनुजो देवानां प्रवरो रिपुः अयंशंकुस्तथा

मार्कं॰ क्रूरोधर्मैस्थाप्यास्तथाप्रजा परिपालयनीयमखिलंचातुर्वर्ण्यंस्वधर्मतः हंतव्यादस्यवोम्लेच्छायेचान्येदुष्ट
२८२ चेष्टिताः यष्टव्यंविविधैर्यज्ञैःसमाप्तवरदक्षिणैः वाजिमेधादिभिःश्रेष्ठैःसहस्रप्रातसंख्यया मार्कंडेयउवा
२८३ च तंदृष्ट्वासांतरिक्षस्थंदिव्यगंधविलेपनं देवदूतमुवाचेदंराजपुत्रीततोमुदुः राजपुत्रीउवाच सत्यं
त्वमागतःस्वर्गाःदेवदूतोनसंशयः किंतुभर्त्ताविनापुत्रःसकथंमेनविष्यति अविक्षितिमृतेभर्त्ता
ममनानोऽत्रजन्मनि भविनेतिप्रतिज्ञातंमयैतत्संनिधौपितुः सचनेच्छतिमांप्रोक्तोमत्पित्राजनकेन
च करंधमेनचतथायाचितस्तुमयानसुः देवदूतउवाच किमनेनमहाभागेवद्दुनोक्तेनतेसुतः सम्
त्पत्स्यतिमात्याक्षीस्त्वमात्मानमधर्मतः अत्रैवकाननेतिष्ठतनुंक्षीणांचपोषय तपःप्रभावादेतत्तेसर्वं
साधुभविष्यति श्रीमार्कंडेयउवाच इत्युक्त्वादेवदूतोऽसौयथागतमगच्छत चकारानुदिनंसुभ्रूःसाप्या
त्मतनुपोषणं इतिश्रीमार्कंडेयपुराणेअविक्षितचरिते १२४ श्रीमार्कंडेयउवाच अथसावीक्षितोमाता
वीरानामप्रजावती पुण्येहनिसमाहूयप्राहपुत्रमविक्षितं पुत्राहमभ्यनुज्ञातातवपित्रामहात्मना उपवा २८२
संकरिष्यामिदुष्करोयंकिमिच्छकः सचायत्तस्तवपितुस्त्वयासाध्योमयापिच प्रतिज्ञातेत्वयापुत्रततस्त

त्रयताम्महं द्रव्यस्यार्द्धमहाकोशान्नवदास्याम्यहंपितुः ततस्तेपितुरायत्तमनुज्ञातास्मितेनच क्लेशःसाध्यो
ममायंतत्रःसहिष्येयोभविष्यति साध्योभविष्योयदितेकश्चिद्बलपराक्रमैः सतेसाध्योन्यथावापि दुःखसा
ध्योभविष्यति तत्प्रतिज्ञांकुरुष्वेयदिपुत्रान्नवैव्रते तदेतदहमारप्स्येकथ्यतांयदिपास्महे अविक्षिदुवाच
।वित्तंमेपितुरायत्तंममेशित्वंनतत्रवै जनच्छरीरनिष्पाद्यंतत्करिष्येत्वयोदितं किमिच्छकंव्रतंमातर्निश्चि
ताभवनिर्व्यथा राज्ञापित्राप्यनुज्ञातंयदिचितेप्सितेरणमे श्रीमार्कंडेयउवाच ततःसाराजमहिषीतद्व्रतंस
मुपोषिता यथोक्तंसाकरोत्पूजांराजराजस्यसंमता निधीनामप्यशेषाणांनिधिपालगणस्यच लक्ष्म्याश्च
परयाभक्त्यायतवाक्कायमानसः विविक्तेदुर्गहेस्वस्थ अथराज्याकरंधमः आसीनन्नक्तःसचिवैर्नीतिशा
स्त्रविशारदैः सचिवाऊचुः राजन्वयःपरिणातंतवैतद्वासतोमही एकश्चैतनयोविक्षिप्यक्तदारपरिग्रह
अपुत्रसचतेनिष्ठां यदापुत्रोगमिष्यति तदारिपक्षं प्रस्थीनिश्चितंतववयास्यति वंशक्षयस्तेभवितापितृपिं
डोदकक्षयः एतन्महत्तेविवरंक्रियाहान्याभविष्यति तस्मात्कुरुतथाभूपयथातेतनयःपुनः करोति
सततंवुद्धिंपितृणामुपकारिणीं श्रीमार्कंडेयउवाच एतस्मिनंतरेशब्दंसुश्रावजगतोपतिः पुरोहितस्य

मार्कं॰ वीरायायागदतोर्थिजनंप्रति कः किमिच्छतिदुःसाध्यंकस्यकिंसाध्यतामिति करंधमस्यमहिषीकिमिच्छकमुपो
२८४ षिता राजपुत्रोप्यविक्षिन्नुश्रुत्वापौरोहितंवचः प्रत्युवाचार्थिनः सर्वान् राजद्वारमुपागतान् मयासाध्यं
284 शरीरेरायस्यकिंचिद्ववोनुमे ममामातामहाभागा किमिच्छकमुपोषिता आएवंतुमेर्थिवः सर्वेप्रतिज्ञातं
मयावचः किमिच्छतददाम्येषक्रियमाणोकिमिच्छके श्रीमार्कंडेयउवाच ततोराजानिशम्येतद्वा
क्यंपुत्रमुखान्च्युतं समुपेत्याब्रवीत्पुत्रमहमर्थीप्रयच्छमे अविक्षिदुवाच दातव्यंतेमयाताताभवते
यद्ववाहितां कर्त्तव्यं दुष्करंमात्रेसाध्यंवासाध्यमेवच राजोवाच यदिसत्यप्रतिज्ञस्त्वंददासिकिमिच्छ
कां पौत्रस्यदर्शयमुखंममोत्संगगातस्यतत् अविक्षिदुवाच अहंतवैकस्तनयोब्रह्मचर्यंचमेनृप नमे
पुत्रोस्तिपौत्रस्यदर्शयामिकथंमुखं राजोवाच पापायब्रह्मचर्यंतेयदिदंधार्यतेत्वया तस्मात्त्वंमोचयात्मा
नंममपौत्रंचदर्शय अविक्षिदुवाच विरमास्मान्महाराजपदन्यत्तत्समादिश वैराज्ञेनमयात्यक्तःस्त्रीसंभो
गस्तथास्त्कसः राजोवाच वहुभिर्युध्यमानानांनदृष्टोवैरिणांजयः तत्रापियदिवैराग्यंगपैषितदपंडितः २८४
किंवानोवहुनोक्तेनब्रह्मचर्यंपरित्यजा मातुस्त्वमिच्छयावक्त्रंपौत्रस्यममदर्शय श्रीमार्कंडेयउवाच य

284A

दासवक्तुशास्तेनप्रोक्तः पुत्रेणपार्थिवः नान्यंप्रार्थयतेकिंचित्तदापुत्रोऽब्रवीत्पुनः दत्वाकिमिच्छकंतुभ्यंप्रा
प्तोहंतातसंकटं तत्करिष्यामिनिर्द्वन्द्वोभूयोदारपरिग्रहं स्त्रियाःसमक्षंविजितःपीडितोधरणीतले स्त्री
पतिर्भविताभूपतदेतदतिदुष्करं तथापिकिंकरोम्येषसत्यपाशवशंगतः करिष्यामितथानत्वंभुज्यतां
निजशासनं इतिश्रीमार्कंडेयपुराणेऽत्रविक्षिच्चरिते १२५ श्रीमार्कंडेयउवाच कदाचिद्राजपुत्रोसौम्
गयामचरद्वने मृगान्निघ्नत्वराहांश्चशार्दूलादींश्चदंष्ट्रिणः शुश्रावसहसाशब्दं त्राहित्राहीतिपोषितः
विक्रोशंत्याःसुवक्तुशोभयगद्गदमुच्चकैः माभैर्माभैरितिवदन्राजपुत्रःसवेगतः नोदयामासतुरगंय
तःशब्दसमागतः ततश्चसापिचुक्रोशाकन्यकाविपिनेवने गृहीतादनुपुत्रेणदृढकेशेनमानिना कार
धमस्यभार्याहंमांदुष्टोयमवीक्षितः हरत्यनार्योविपिनेपृथिवीशास्यधीमतः यस्यसर्वेमहीपालास्तथा
गंधर्वगुह्यका नसमर्थापुरस्थातुंतस्यभार्याक्रियाम्यहं यस्यमृत्योरिवक्रोधःशक्रस्येवपराक्रमः कर
धमसुतस्यैषातस्यभार्याक्रियाम्यहं श्रीमार्कंडेयउवाच इत्याकर्ण्यमहीपालस्त्वरयन्सशरासनी चिंत
यामासकिमिदंममभार्यात्रकानने मापेयंरक्षसानूनंदुष्टानांकननौकसां अथवागतएवेहंसर्वेवेत्स्यामिका

गहनेवने

रणं श्रीमार्कंडेयउवाच त्वरितःसततोगत्वाददर्शातिमनोरमां काननेकन्यकामेकांसर्वालंकारभूषितां
मार्कं॰ गृहीतांदनुपुत्रेणदृढकेशेनदंडिना त्राहित्राहीतिकरुणांविक्रोशंतींपुनःपुनः माभैरितिचतामहतोसी
२८५ तिवैवदन् महाराजनिधर्मज्ञोविजनेत्रवनेघने प्रासतीमांमहींदुष्टःकोक्रियतकरंधमे यस्यप्रतापाव
285 नतामुविसर्वैमहीक्षितः श्रीमार्कंडेयउवाच ततस्तमागतंदृष्ट्वागृहीतवरकार्मुकं सात्राहीत्याहतन्वं
गाक्रियामेशोतिचासकृत् राज्ञःकरंधमस्याहंस्नुषाभार्यास्यवीक्षितः क्रियाम्येतेनदुष्टेनसनाथा
नाथवद्वने ततोविमम्रशोवाक्यं अविक्षित्सतयोदितं कथमेषाहिमेभार्यास्नुषाताततस्यवाकथं अथ
वामोचयाम्येनांतत्वंवेत्स्यामियत्पुनः क्षत्रियैर्धार्यतेशस्त्रमार्तानांतत्रकारणात् ततःकुपोत्रवीद्धी
रोदानवंतंसुदुर्मते जीवंचेद्वसिमुंचैनामन्यथानभविष्यसि ततःसुतांविहायोच्चैर्दंडमुद्धिप्यदानवः
तमभ्यधावत्सोप्येनंशरवर्षैरवाकिरन् सवार्यमाणोवाणोघैर्घनवोतिमदानवः राजपुत्रायविक्षे
पदंडंप्रांकुशताहतं तमापतंतंचिक्षेपशरैर्भूपसुतस्ततः सोप्यासन्नंगृहीत्वोच्चैर्दममाजोव्यवस्थितः २८५
सृज्जतः शरवर्षाणिनांचिक्षेपततोद्रुमं सतुतांतिलशश्चक्रेनबलैःकर्मारसाधितैः ततश्चिक्षेपसशि

285A

लां राजपुत्राय दानवः तत्र चिक्षेप वाराणौघैर्भूभृत्सूनुः सलीलया ततो विच्छिन्नदंडोसौ विच्छिन्नसकलायु
धः मुष्टिमुद्यम्य सक्रोधो राजपुत्रमधावत तस्यापतित एवास्य करंधमसुतस्तदा छित्वा वेतस पत्रेण पातया
मास वै भुवि तस्मिन् विनिहिते देवैर्दानवे दुष्टचेष्टिते करंधमसुतः सर्वैः साधु साध्विति भाषितः श्रीमार्कंडेय
उवाच वरं दृणीष्वेति तदा देवैरुक्तो नृपात्मजः वव्रे पुत्रं महावीर्यं पितुः प्रियचिकीर्षया देवा ऊचतुः भविष्य
ति हि ते पुत्रः चक्रवर्त्ती महाबलः अस्यामेव हि कन्यायां मोक्षितायां त्वयानघ राजपुत्र उवाच पित्राहं सत्य
पाशेन बद्धश्छन्दाम्यहं सुतं राजभिर्निर्जितैः राज्ञो नोत्पन्नो मे दारसंग्रहः साच मे याचिता त्यक्ता विशालस्य नृपतेः
सुता तत्सर्वे तामनादाय विशालतनयामहं नृशंसात्मा करिष्यामि अन्यदारपरिग्रहं देवा ऊचतुः इ
यमेव हि ते भार्या श्लाघ्यते या त्वया सदा विशालस्य सुता सुभ्रू त्वत्कृते चाश्रिता तपः अस्यामुत्पत्स्यते वी
रः सप्तद्वीपप्रसाधिता यष्टा यज्ञसहस्राणां चक्रवर्ती सुतस्तव इत्युक्त्वा प्रययुर्देवा करंधमसुतं द्विज
सोप्याह तातदा पत्नीं क्षीणप्रायं कलेवरं त्यक्तुकामा समभ्येत्य देवदूतेन वारिता भविष्यति च पुत्रस्ते चक्र
वर्त्ती महाबलः प्राणान् धिष्यति यो देवानसुरांश्च हनिष्यति इति देवाज्ञापयति देवदूतेन वारिता न संत्यक्त

मार्कं वतीदेहंत्वत्संगममनोरथा परश्चैष महानागस्तातुंगंगाह्रदंगता अवतीर्णानिकृष्टानिदृष्टिनागेनकेचि
२८६ त् ततोरसातलंनीतातेनतत्रचमेपुरा नागाः सहस्रशस्तस्मिन्नागपत्न्याकुमारकाः तुष्टुवुःमासमभ्येत्य
तामन्येद्यजयंस्तथा प्रसादंकुरु सर्वेषामस्माकंतनयः त्वया अपराधमुपेतानांसंनिवार्योविधोन्मुखः अ
286 पराधंकरिष्यामितत्पुत्रस्यानिलाम्बराः तन्निमित्तंनिवार्योसौप्रसादःक्रियतामिति तथेतिचमयाप्रोक्तो
देकैःपातालभूषणैः भूषिताहंतथापुष्पगंधवासोभिरुत्तमैः समानीतातथात्लोकमिमंतेनानिलाम्ब्री
ना पुरायथाकांतिमतीपूर्ववद्रूपशालिनी इतिरूपवतींदृष्ट्वासर्वालंकारभूषितां जग्राहदृढकेशो
यंहंतुकामः सुदुर्मतिः युष्मद्बाहुबलेनाहंराजपुत्रविमोक्षिता तत्प्रसीदमहाबाहोमांप्रतीक्ष्यत्वया
समः भूर्लोकेराजपुत्रोन्योनास्तिसत्यंब्रवीम्यहं इतिश्रीमार्कंडेयपुराणेऽवक्षिच्चरिते ११६ मार्कं
डेयउवाच इतितस्यावचःश्रुत्वास्मृत्वापितृवचश्चतत् किमिच्छकेप्रतिज्ञातेप्रयुक्तंतेनभूभृता प्रत्यु
वाचसतांकन्यामवीक्षिन्नृपतेःसुतः सानुरागमनास्कांतांत्यक्तभोगश्चतत्कृते यदाहंत्यक्तवांस्तत्रत्वा २८६
मरातिपराजितः निहत्यशत्रुंसंप्राप्तात्वंमयात्रकरोम्यकिं कन्योवाच ममपाणिग्रहाणात्वंरमणीये

286A

त्रकानने सकामायासकामेन संगमोगुणवान्भवेत् राजपुत्रउवाच एवंभवतुभद्रंते विधिरेवात्रकारणं
अन्यथाकथमत्रत्वमहंचैवसमागतः श्रीमार्कंडेयउवाच एतस्मिन्नंतरेप्राप्तोगंधर्वतनयोमुने वरा
प्सरोभिःसहितोगंधर्वैरपरैर्वृतः गंधर्वउवाच राजपुत्रसुतेयंमेभाविनीनामभाविनी अतिशापादग
स्त्यस्यविशालतनयाभवत् बालभावेनयोगस्त्यःकोपितःक्रीडमानया ततस्तेनतदाशप्तामानुषीत्वं
भविष्यसिप्रसादितः सचास्माभिर्बालेयमविवेकिनी तवापराधान्विप्रर्षेप्रसादःक्रियतामिति प्रसा
द्यमानःसोस्माभिरिदमाहमहामुनिः बालेतिमत्वाशापोऽल्पोदत्तोस्यानान्यथेतितत् इतिशापादगस्त्य
स्यविशालभवनेशुभा जातेयंमत्सुतासुभ्रूर्भामिनीनामनामतः तदस्याहंकृतेप्राप्तोगृहाणेमांनृपात्म
जः ममात्मजांसुतस्तेतुचक्रवर्तीभविष्यति श्रीमार्कंडेयउवाच तथेत्युक्त्वाततःसाथसपाणिंपा
र्थिवात्मजः जग्राहविधिवत्होतुंचक्रेतत्कर्मतुंबरुः प्रजगुर्देवगंधर्वानन्नृतुश्चाप्सरोगणाः पुष्पाणिस
सृजुर्मेघादेववाद्यानिसस्वनुः विवाहेराजपुत्रस्यतयातस्यसमीयुषः समस्तवसुधात्राणकर्तृकारण
भूतया ततोगंधर्वलोकंतेसहतेनमहात्मना नाम्नायेनययुःसाचसचराजसुतोमुने नामिन्यामुमुदेसा

ईभविद्धिन्नृपनंदनः साचतेनसमंतत्रभोगसंपत्समन्विता कदाचिददतिरम्येसौनगरोपवनेतया ।विक्रीडति
मार्कं समंतन्व्याकदाचिछरपर्वते कदाचित्पुलिनेनद्याहंससारससोभिते कदाचिद्वनेस्पांतः प्रसादेष्वातिशो
२८७ भने ।विहारदेशेष्वन्येषुरमणीयेष्वहर्निशं सरेमेसहितस्तन्व्यासाचतेनमहात्मना भक्ष्यानुलेपनंवस्त्रंस्र
287 क्पुष्पादिकमुत्तमं उपजकुस्तयोस्तत्रमुदागंधर्वकिंनराः तदारमयतास्तत्रभामिन्यासहदुर्लभे गंधर्व
लोकेवीरस्यपुत्रंसासुषुवेशुभे तस्मिन्जातेमहावीर्येगंधर्वाणांमहोत्सवः वभूवमनुजव्याघ्रेतेनका
र्य्यप्रवेदृता जगुःकेचित्तथैवान्येमृदंगपटहानकान् अवादयंस्तथैवान्येवेणुवीणादिकांस्तथा न
नृतुश्चातथातत्रवहवोप्सरसांगणाः पुष्पवृष्टिमुचोमेघाजगर्ज्जुर्मृदुनिःस्वना तथाकोलाहृतेतस्मिन्
वर्त्तमानेधातुंवरुः प्राणायेनस्मृतेभ्येत्यजातिकर्माकरोन्मुने देवाःसमाययुःसर्वेतथादेवर्षयोमलाः
पातालात्पन्नगेंद्राश्चशेषवासुकितक्षकः अथान्येचासुराणांचयेप्रधानाद्विजोत्तमाः पक्षिणांगुह्य
कानाचवायवश्चतथाखिलाः तदागतैरशेषैश्चदेवदानवपन्नगैः मुनिभिश्चाकुलनभूत्गंधर्वाणां २८७
महत्पुरं ततःसतुंवुरुःकृत्वायातिकर्मादिकाःक्रियाः चक्रेस्वस्त्ययनंतस्यवालस्यश्रुतिपूर्वकं च

287A

क्रवर्त्तीमहावीर्योचक्रवर्त्तीपराक्रमः महांतंकालमीशित्वमशेषायाःक्षितेकुरुः इमेशक्रादयसर्व्वेलोक
पालास्तथार्षयः स्वस्तिकुर्वंतुतेवीरवीर्यंचारिविनाशनं मरुत्तशिवायास्तवातिपूर्वेणयोरजः मरुतो
विमलश्रीणांवैमल्यायास्तुदक्षिणाः पश्चिमंतेमरुद्वीर्यमुत्तमस्तेप्रयच्छतु वलयक्षतुचोत्कृष्टंमारुत
स्त्वतथोत्तरः इतिस्वस्त्ययनःस्यांतःवाग्रुवाचाशरीरिणी मरुत्तवेतिवह्रूशोयदिदंगुरुरुब्रवीत् मरुत्तइ
तितेनायंभुविख्यातोभविष्यति भुविचास्यमहीपालायास्यंत्याज्ञामशेषतः एषसर्वक्षितीशानांवीर
स्यास्यतिमूर्द्धनि चक्रवर्त्तीमहावीर्यःसप्तद्वीपवतीमही आक्रम्यपृथिवीपालानयंभोक्ष्यत्यवारितः
प्रधानःपृथिवीशानांभविष्येतेषुपश्चिनां अधिकंशौर्यवीर्येचभविष्यत्यस्यराजसु श्रीमार्कंडेयउ
वाच इत्याकर्ण्यवचःसर्वेकेनाप्युक्तंदिवौकसः तुष्टुवुःर्भुर्विप्रगंधर्वासम्यग्मातातथापिता इतिश्री
मार्कंडेयपुराणेअवीक्षिच्चरिते ११७ श्रीमार्कंडेयउवाच ततःस्वराजपुत्रःस्वमादायदयितंसुतं पत्न्या
चानुगतोविप्रगंधर्वैरायतौपुरं सपितुर्भवनंप्राप्य ववंदेपितुरादरात् चरणौसाचतन्वंगीक्षीमतीन्नृपते
सुता अथाहराजपुत्रोसौगृहीत्वावालकंसुतं धर्मासनगतेभूपराज्ञांमध्येकरेधमं सुखंपौत्रस्यपश्य

तदुत्संगस्थस्यमन्मया किमिष्टके प्रतिज्ञातं तुभ्यं मानकृते पुरा इत्युक्त्वा पितरस्तत्संगे तं कृत्वा तनयं ततः त
था दत्तमशेषं स कथयामास तस्य तत् सपरिष्वज्य तं पौत्रमानंदाश्रुविलेक्षणः सभाग्योस्मीत्यथा
त्मानं प्रशशंस पुनः पुनः ततः सोर्घादिना सम्यक् गंधर्वान्समुपागतान् संमानयामास मुदा विस्मि
तः प्रीतये जनः तत्पुरे च महानासीदानंदः पौरवेश्मसु अस्माकं संततिर्याता नाथस्येति महामुने
हाष्टपुष्टपुरे तस्मिन् गीतवाद्यरवाकुले विलासिन्यो तिचार्वंग्यो नन्दतुस्तस्य मुत्तमं राजा च द्विज
मुख्येभ्यो रत्नानि च बहूनि च गोभूवस्त्राण्यलंकारानदद्दृष्टमानसः ततः स कलो ववृधे शुक्लप
क्षे यथा शशी पितॄणां प्रीतिजनको जनस्येष्टस्य सोभवत् आचार्याणां सकाशात्स प्राग्वेदानजगृहे
मुने ततः शास्त्राण्यशेषाणि धनुर्वेदं ततः परं कृताभ्यासो यदासोभून्मूढकार्मुककर्मणि अन्येषु च
तथा वीरः शास्त्रेषु जितः श्रमः ततोस्त्राणि स जग्राह भार्गवाद्दूरसंभवात् विनिया वनतो विप्रगुरोः प्रीति
परायणः गृहीतास्त्रः कृतो वेदे धनुर्वेदस्य पारगः निस्नातः सर्वविद्यासु स बभूव ततो युवा विशालो २८८
पि सुतावात्तीमुपलभ्याखिलामिमां हर्षनिर्भरचित्तोभूद्दौहित्रस्य च योगितां अथ राजा सुतसुतं द्द

288A

ह्वाप्राप्तमनोरथः यज्ञाननेकानिष्पाद्य दत्वादानानिचार्थिनां कृताशेषकृयायुक्तः सवर्णधर्मतोमहीं
परिपाल्यारिविजयीवनवुद्धिर्वभूवसः सपियास्सुवनेपुत्रमवीक्षितमभाषत पुत्रवृद्धोस्मिगच्छामिवनंरा
ज्यंगृहाणमे कृतकृत्योस्मिनास्त्यन्यत्किंचित्वदभिषेचनात् सुनिष्पन्नमिदंराज्यंत्वंगृहाणमयार्पितं इ
त्युक्तंपितरंप्राहसोऽविक्षिन्नृपनंदनः प्रश्रयावनतोभूत्वाथियास्त्वस्तपसेवनं नाहंतातकरिष्यामिपृ
थिव्याःपरिपालनं नापैतिव्रीर्मेमनसोराज्येन्यंत्वंनियोजय तातेनमोक्षितोवद्धोनात्मवीर्याद्दहंयतः त
तःकियत्पौरुषंमेपुरुषैःप्राप्यतेमही योहंनपालनापालमात्मनोपिवसुंधरां सकथंपालयिष्यामिराज्य
मन्यत्रनिक्षिपः सस्त्रीसधर्मापुरुषोयस्यान्येनापदुह्यते आत्ममोहायभवताबंधनाद्येनमोक्षिता सोहं
कथंभविष्यामिस्त्रीसधर्मामहीपतिः स्त्रियाःपुमान्भवेद्भर्तीयःष्टरःसमहीपतिः पितोवाच नभिन्नएव
पुत्रस्यपितापुत्रस्तथापितुः नान्येनमोक्षितोवीरयस्त्वंपित्राविमोक्षितः पुत्रउवाच हृदयंनान्यथानेतुं
मयाशक्यंनरेश्वरः हृदयेभीरतेवात्रयदहंमोक्षितस्त्वया पित्रोपात्तांश्रियोभुंक्ते पित्राकृच्छ्रात्समुद्धृतः
विज्ञायतेचयःपित्रामानरःसोस्तुनःकुले स्वयमार्जितवित्तानांख्यातिंस्वयमुपेयुषां स्वयंनिस्तीर्ण

मार्कं॰ कृच्छ्रागंयातिस्मास्त्कमेमतिः श्रीमार्कंडेयउवाच इत्याहवहुशःपित्रायदाश्रोक्तोप्पसौमुने तदातस्यसुतेराज्यं
२८९ मरुत्तमकरोन्नृपः सापित्रासमनुज्ञातंराज्यंप्राप्यपितामहात् चकारसम्यक्सुहृदामानंदमुपपादयन्
राजाकरंधमपत्नीपिवीरामादायतांतदा वनंजगामतपसेयतवाग्यतमानसः तत्रवर्षसहस्रंसतपस्त
289 प्त्वासुदुष्करं विहायदेहंनृपतिःप्राक्रस्यापसलोकतां सास्यपत्नीतदावीरावर्षाग्राममपरंप्रातं तपश्च
चारविप्रर्षेजटिलामलपंकिनी सालोक्यमिच्छतीभर्त्तुःस्वर्गस्थस्यमहात्मनः फलमूलकृताहारामा
र्गवाश्रमसंश्रया द्विजातिपत्नीमध्यस्थाद्विजसुश्रूषरोरता इतिश्रीमार्कंडेयपुराणेअविक्षिच्चरि
तंसमाप्तं १२८ क्रोष्टुकिरुवाच भगवन्विस्तरात्सर्वममैतत्कथितंत्वया करंधमस्यचरितमविक्षित
रितंचयत् आविक्षितस्यनृपतेर्मरुतस्यमहात्मनः श्रोतुमिच्छामिचरितंश्रूयतेसोऽतिचेष्टितः चक्रव
र्त्तीमहाभागःशूरःकांतोमहामतिः धर्मविद्धर्मकृच्चैवसम्यक्पालपिताभुवः श्रीमार्कंडेयउवाच स
पित्रासमनुज्ञातंराज्यंप्राप्यपितामहात् धर्मतःपालयामासपितापुत्रानिवौरसान् इयाजसुवहून्यज्ञा २८९
न्यथावत्व्याप्तदक्षिणान् ऋत्विक्पुरोहितोदेशावष्टचित्तोमहीपतिः तस्याप्रतिहतंचक्रमासीद्वीपेषु

289A

सप्तसु गतयश्चाप्यविच्छिन्नाः खपातलजलादिषु ततः प्राप्यधनंविप्रा यथावत्स्वक्रियापराः अयजंतम
हायज्ञैर्देवानिंद्रपुरोगमान् इतरेश्चत्रयोवर्णाः स्वेस्वेकर्मण्यपतंद्भिताः तदुपात्तधनाश्चक्रुरिष्टापूर्त्तादिकाः
क्रियाः पाल्यमाना हीतेन मरुत्तेनमहात्मना पस्पर्द्धत्रिदशावासवासिभिर्मुनिसत्तम तेनातिशायिताःसर्वे
केवलंनमहीक्षितः यज्विनोदेवराज्ञोपिशतयज्ञोतिशंकितः ऋत्विक्कृतस्यतुसंवर्त्तोबभूवांगिरसःसु
तः भ्राताबृहस्पतेर्विप्रमहात्मातपसांनिधिः सौवर्णोमुंजिवानामपर्वतःसुरसेवितः पातितंतेनतच्छृं
गंकृतेतस्यमहीपतेः तेनतस्याखिलंयज्ञेहेमभांडादिकंवचः प्रासादाश्चकृतास्तुभ्रातस्तपसासर्वकांच
नाः गाथाश्चाप्यत्रगायंतिमरुत्तचरिताश्रयाः सात्त्येनर्षयःसर्वेकुर्वंतोध्ययनंतथा मरुत्तेनसमोना
भूत्यजमानोमहीतले सदःसमस्तंयद्यज्ञेप्रासादास्तस्यकांचनाः अमाद्यदिंद्रःसोमेनदक्षिणाभिर्द्वि
जातयः विप्राणांपरिवेष्टारःप्राकाद्यास्त्रिदशोत्तमाः यथायज्ञेमरुत्तस्यतथाकस्यमहीपतेः सुवर्णमखिलं
त्यक्तंरत्नपूर्णैर्गृहैर्द्विजैः प्रासादादिसमस्तंचसौवर्णंतस्ययज्ञतो त्रयोवर्णाश्चलभ्यंततस्मात्किंचित्तदा
ददुः पातितंतेनशिखरंयज्ञेनापूर्णमनोरथाः तेपियज्ञान्यजंतेचदेशेदेशेपृथक्पृथक् तस्यैवंकुर्व

तोराज्यंसंम्यक् पालयतः प्रजाः तपस्वीकश्चिदभ्येत्यतमाहमुनिसत्तमः पितुर्मातोतवाहेदंदृष्ट्वातापसमंडलं
विषाभिभूतमुरगैर्मदोन्मत्तैनरेश्वरः पितामहस्तेस्वर्यातःसम्यक् संपाल्यमेदिनींपितातवापिशक्तोपिहित्वा
गतामंवनेस्थितः सोहंपयप्रपाभिवैकल्यंतवराज्यंप्रशासतः पितामहस्यतेनाभूद्यत्पूर्वेषांचतेनृप नूनंप्रशक्तोभो
गेषुत्वंअशक्तोवाजितेंद्रियः चारांधत्वायतस्तेयंदुष्टादुष्टान्नवेत्सिपत् पातालादभ्युपेतैस्तैर्भुजगैर्मदशालिभिः
दृष्ट्वामुनिसुताःसप्तदूषितावजलाशयाः स्वेदमूत्रपुरीषेणदूषितंचघृतंहविः अपराधंसमुद्दिश्यदत्तोना
गवलिश्चिरात् एतेसमर्थमुनयोभस्मीकर्तुंभुजंगमान् किंत्वेषांनाधिकारोत्रत्वमेवात्राधिकारवान्
तावत्सुखंभूपतिभिर्भोगजंप्राप्यतेनृप अभिषेकजलंयावन्नमूर्ध्निविनिपातितं कानिमित्राणिकः
शत्रुर्ममशत्रोर्वलंकियत् कोहंकेमंत्रिणःपक्षेकेवाभूपतयोमम कियान्कोशोवलंकिंवाकोनुरक्तो
जनोमम विरक्तोवापरैर्भिन्नःपरेषामपिकोदृशः कःसम्प्रत्यत्रनगरेविषयेवाजनोमम धर्मकर्माश्रयीमू
ढःकोसम्प्रत्यधिवर्त्तते कोदंड्यापरिपाल्यामेकेचोपेक्ष्यानरामया साममेदकराश्चान्येदेशकालमवेक्षि २९०
ता चारांश्चवारयेदन्यैर्भूपतिर्निभृतैश्चरैः सचवादिषुसर्वेषुचारान्दद्यान्महीपतिः इत्यादौभूपतिर्नि

२१०A

त्वंकर्म्मन्यासक्तमानसः नयेदिनंतथारात्रिंनतुभोगपरायणः राज्ञांशरीरग्रहणंनभोगायमहीपते क्लेशा
यमहतेपृथ्वीस्वधर्मपरिपालने सम्यक्पालयतःपृथ्वींस्वधर्मेणमहीपतेः इहक्लेशोमहान्स्वर्गेपरमंसुख
मक्षयं तदिहत्वंमहाभाग हित्वाभोगान्नराधिप पालनायक्षितेर्क्लेशंमेगीकर्त्तुमिहार्हसि इतिद्विग्नमृषी
णांयत्व्यसनंत्वयिशासति भुजंगहेतुकंभूपचारांधोनहिवेत्सितत् वहुनात्रकिमुक्तेनदुष्टेदंडोनिपात्यते
शिष्टान्पालयराजंस्त्वंधर्मंखड्गगमाप्स्यसि अरक्षन्यायमखिलंदुष्टैरविनयान्हृतं समवाप्स्यसंदिग्धं
यदिच्छसितकुरुष्वतत् एतन्मयोक्तंसकलंपत्रवाहपितामह कुरुक्षेत्रेवंस्थितेयत्तेरोचितेवसुधाधिप इतिश्री
मार्कंडेयपुराणेमरुत्तचरिते ११९ श्रीमार्कंडेयउवाच इतितापसवाक्यंसश्रुत्वालज्जापरोन्टपः धिग्मां
चारांधमित्युक्त्वानिःश्वस्यजगृहेधनुः ततःसत्वरितोगत्वातमौर्वस्याश्रमंप्रति ववंदेशिरसावीरांमातरंपि
तुरात्मनः तापसंश्चययेथान्यायंतैश्चाशीर्भिरभिष्टुतः दृष्ट्वाचतापसान्सप्तनागैर्दष्टान्मृतान्भुवि ननिंदात्मा
नमसकृत्पुरस्तेषांमहीपतिः उवाचचैतदद्याहंमन्वीर्यमवमन्यतां यत्करोमिभुजंगानांदुष्टानांब्राह्मणद्वि
षां तत्पश्यतुजगत्सर्वंसदेवासुरमानुषं श्रीमार्कंडेयउवाच इत्युक्त्वाजगृहेकोपादस्त्रंसंवर्त्तकंन्टपः नाशा

मार्कं याश्चोग्रनागानांपातालोर्द्ध्वविचारिणां ततोजज्वालसहसानागलोकऽसमंततः महास्त्रतेजसाविप्रदह्यमानो
२९२ निवारितः हाहातातेतिमहताहाहावत्सेतिनामतः तस्मिन्नस्त्रकृतेरावःपन्नगानामथाभवत् केचिज्ज्वल
ङ्गिःपुच्छाग्रैःफणैरन्येभुजंगमाः गृहीतपुत्रदाराश्चत्यक्ताभरणवाससः पातालमुत्सृज्यययुःशरणंभामि
२९१ नीतदा मरुत्तमातरंपूर्वंययादत्तंतदाभयं तामुपेत्योरगाःसर्वेसप्रणामंभयातुराः सगद्गदमिदंप्रोचुः
क्रियतांनःपुरोदितं प्रणम्याभ्यर्थितंपूर्वंयदस्माभीरसातले तस्यकालोयमायातस्त्राहिवीरप्रजाथिनि
पुत्रोनिर्वीर्मतांराज्ञिप्राणौसंयोज्यमस्त्रनः दह्यतेसकलोलोकोनागानामस्त्रवह्निना एवंसंदह्यमाना
नामस्माकंतनयेनते त्वामृतेशरणंनान्यत्कृपांकुरुयशस्विनि श्रीमार्कंडेयउवाच इतिश्रुत्वावचस्तेषां
संस्मृत्यादौचभाषितं भर्त्तारमाहसासाध्वीससंभ्रममिदंवचः पूर्वमेवयथाख्यातंपातालेयद्भुजंगमैः प्रोक्तम
भ्यर्थितापूर्वंममासीत्तनयंप्रति तइमेभ्यागताभीतादह्यंतस्तस्यतेजसा ममैतेशरणंपूर्वंदत्तमेभ्योमयाभयं
येमांशरणमापन्नास्तेत्वांशरणमागताः अप्यथाधर्मचरणायतोहंसकलंतव तेनिवारयत्पुत्रंमरुत्तंवचना
त्रतः मयाचाभ्यर्थितोवश्यंसमंमभ्युपयास्यति राजोवाच महापराधेनियतंमरुत्तः क्रोधमागतः दुर्निव २९२

र्थमहंमन्येतस्यक्रोधंसुतस्यच नागाऊचुः शरणागर्तास्तेघवयंप्रसादः क्रियतांनृपः क्षत्रस्यत्वंपरित्राण

निमित्तंशस्त्रधारणं श्रीमार्कंडेयउवाच नागानांतद्वचः श्रुत्वाभीतानांशरणैषिणां तथाचाभ्यर्थितः

पत्न्याप्राहावीक्षिन्महयशाः गत्वाब्रवीमितंभद्रेतनयंत्वरयातव परित्राणायनागानांनत्याज्ञ्याशरणाग

ताः नोपसंहरतेशस्त्रंयदिमद्वचनान्नृपः तदास्त्रैर्वारयिष्यामितस्यास्त्रंतनदह्याते ततोगृहीत्वासध

नुरवीक्षित्क्षत्रियोत्तमः भार्ययासहितःप्रायान्त्वरावान्भार्गवाश्रमं इतिश्रीमार्कंडेयपुराणेम

रुतचरिते १२० श्रीमार्कंडेयउवाच सतुतत्रवचःश्रुत्वागृहीतवरकार्मुकं धनुशस्त्रंचतस्योग्रंज्वालाव्या

प्तदिगंतरं अजिरंतमहाज्वालासंततिव्याप्तभूतलं पातालांतर्गतप्रांतमसह्यंघोरभीषणं सतंदृष्ट्वामही

पालंभ्रूकुटीकुटिलापुनःपुनः गृहीतकार्मुकंपित्रोःप्रणिपत्यसगौरवं प्रत्युवाचापराधंमेसुमहांतंप

न्नगाधिपैः शासतीमांमपिमहींपरिभूयबलंमम सप्ताश्रममुपागम्यदष्टामुनिकुमारिकाः ऋषी

णामाश्रमस्थानाममीषामवनीपते मपिशासतिदुष्टैस्तैर्दूषितानिहवींषिच जलाशयास्तथाप्येतेःस

र्वएवहिदूषिताः तदेतत्कारणंकिंचिन्नवक्तव्यंत्वयापितः ननिवारयतत्वोहंब्रह्मघ्नान्प्रतिपन्नगान् अवि

मार्कं॰ क्षिदुवाच यद्येभिर्निहिताविप्रावास्यंतिनरकंमृताः ममैतत्क्रियतांवाक्यंविरमास्त्रप्रयोगतः मरुत्त उवाच अ
२९२ हमेवगामिष्यामिनरकंयदिपापिनां ननिग्रहेयतांयेषांमांमानिवारयमामितः अविक्षिदुवाच मामेतेशरणंप्रा
२१२ प्ताःपन्नगाममगौरवात् उपसंहियतामस्त्रमलंकोपेनतेनृप मरुत्त उवाच नाहमेषांक्षमिष्यामिदुष्टाना
मपराधिनां स्वधर्ममुल्लंघ्यकथंकरिष्यामिवचस्तव दंड्येपातयतेदंडंभूयःशिष्टांश्चपालयन् पुण्यलोका
नवाप्नोतिनरकांश्चाप्युपेक्षकः श्रीमार्कंडेय उवाच एवंसंवक्तुशः पित्रावार्यमाणोपितत्सुतः नोपसंह
रतेसोऽस्त्रंततोऽसौपुनरब्रवीत् हिंससेपन्नगान्भीतान्ममैतान्शरणागतान् वार्यमाणोपितस्मांते
करिष्यामिप्रतिक्रियां मयाप्यस्त्राण्यवाप्तानिनत्वमेकोस्त्रविद्भुवि ममाग्रतस्तेदुर्वृत्तपौरुषंचक्रिय
तांव ततःकार्मुकमारोप्यकोपताम्रविलोचनः अविक्षिदस्त्रंजग्राहकालाख्यंमुनिपुंगवः ततोज्वाला
परीवारमरिसंघघ्नमुत्तमं कालास्त्रंतन्महावीर्य्यंयोजयामासकार्मुके ततःक्षुब्धोभजगतीसंवर्त्तास्त्रप्र
तापिता साब्धिशैलाखिलाविप्रकालस्यास्त्रेसमुद्यते श्रीमार्कंडेय उवाच कालास्त्रमुद्यतंपित्रामरुत्तः २९२
सोभिवीक्ष्यतत् प्राहोच्चैरस्त्रमेतन्मेदुष्टशास्तिसमुद्यतं नत्वद्वधायकालास्त्रंमयिमुंचतिकिंभवान् सद्धर्म

२१२A

चारिणि सुतेसदैवाज्ञाकरेतव मयाकार्य्यंमहाभागप्रजानांपरिपालनं तच्चैवंक्रियतेकस्मात्मद्धायास्त्र
मुद्यतं अविक्षिदुवाच शरणागतसंत्राणंकर्त्तुंव्यवसितावयं तस्यव्याघातकर्त्तात्वंनमेजीवन्विमोक्ष्यसे
मांवाहत्वास्त्रवीर्येणजहिदुष्टानिहोरगान् त्वांवाहत्वामहास्त्रेणरक्षिष्यामिमहोरगान् धिक्तस्यजीवि
तंपुंसःशरणार्थिनमागतं योनार्त्तिमनुगृह्णातिवैरिपक्षमपिध्रुवं क्षत्रियोहममेभीताःशरणंमामुया
गताः अपकर्त्तात्वमेवैषांकथंवध्योनमेभवान् मरुत्तउवाच मित्रंवांबांधवोवापिपितावायदिवागुरुः
प्रजापालनविघ्नाययोहंतव्यःसभूभृता सोहंतेप्रहरिष्यामिनक्रोधंव्यंत्वयापितः स्वधर्मःपरिपाल्योमे
नमेक्रोधस्तपोपरि श्रीमार्कंडेयउवाच ततस्तौनिश्चितौद्रष्टुंपरस्परवधंप्रति समुपेत्यांतरेतस्थुर्मुनयो
भार्गवादयः ऊचुश्चैनंनमोक्षव्यंत्वयास्त्रंपितरंप्रति त्वयाचनायंहंतव्यःपुत्रःप्रख्यातचेष्टितः मरुत्तउ
वाच मयादुष्टानिहंतव्याःसंतोरक्ष्यामहीक्षिता इमेचदुष्टाभुजगाःकोपराधोममद्विज अविक्षिदुवाच
शरणागतसंत्रासांमयाकार्यमयंचमे अपराधीसुतोविप्रायोहंतिशरणागतं ऋषयऊचुः इमेवदंतिभु
जगास्त्रासलोलविलोचनाः संजीवयामासविप्रान्येदष्टादुष्टपन्नगैः तदलंविग्रहेणोभौराजवर्यौप्रसी(

दत्तां उभावपिविनिर्व्यूढप्रतिज्ञौधर्मकोविदौ श्रीमार्कंडेयउवाच ततोवीरासमभ्येत्यपुत्रमेतदभाषत महात्मा
मार्कं देषतेपुत्रोहेतुंनागान्कृतोद्यमः तन्निष्पन्नंयदाविप्रास्तेजीवंतियथामृताः संजीवनास्तेमुच्यंतेयेयुष्मत्क
२९३ रणागताः भाविन्युवाच अहमभ्यर्चितापूर्वमेभिः पातालसंश्रयैः तन्निमित्तमयंभर्त्तामयात्रविनियो
४१३ जितः तदेतदार्ये।निर्वृत्तमुभयोरपिशोभनं ममपुत्रस्यभर्तुश्च त्वत्पौत्रस्यात्मजस्यच श्रीमार्कंडेयउवा
च ततःसंजीवयामासुस्तांन्विप्रास्तेभुजंगमाः ।दिव्यैरोषधजातैश्चविषसंहरणेनच पित्रोर्न्ननाम
चरणौसततोजगतीपतिः मरुत्तंचपिताप्रीत्यापरिष्वज्येदमब्रवीत् मानहाभवशत्रूणांचिरंपालयमे
दिनीं पुत्रैःपौत्रैःप्रपौत्रैश्चमाचतेसंतुविद्विषः ततो।द्विजैरनुज्ञातौवीरयाचनरेश्वरौ समारूढौरथंसा
चभामिनीस्वपुरंगता वीरानुकृत्वासुमहत्तपोधर्मभृतांवरः भर्त्तुःसलोकतांप्राप्तामहाभागापतिव्रता
मरुत्तोपिचकारोर्व्वींधर्मतःपरिपालितं विनिर्जितारिषड्वर्गोभोगांश्चबुभुजेनृपः तस्यपत्नीमहाभावा
वीरस्यसौ दर्भीनीलपीततथा प्रभावतीसुवीरस्याभवत्सुता सुकेशीकेतुवीर्यस्यमागधस्यात्मजाभवत् सुताच २९३
सिंधुवीरस्यकैकेयीकेकयस्यच सैरंध्रीचसिरंध्रश्चसिंधुभर्त्तावपुष्मती चेदिराजसुताचाभूद्भार्यातस्यसु

293A

शोभना तासांपुत्रास्तस्य चासन्भूभृतोष्टादशद्विज तेषांप्रधानोज्येष्टस्तु नरिष्यतः सुतोभवत् एवंवीर्योम
रुत्तोभून्महाराजोमहाबलः यस्याप्रतिहतंचक्रमासीद्दीपेषुसप्तसु यस्यतुल्योपरोयज्वानाभून्नवाभविष्य
त् सत्वविक्रमयुक्तस्य राजर्षेरमितौजसः तस्यैतच्चरितंश्रुत्वा मरुत्तस्य महात्मनः जन्मचाग्र्यंद्विजश्रेष्ट
मुच्यतेसर्बकिल्विषैः इतिश्रीमार्कंडेयपुराणेमरुच्चरितंसमाप्तं २१ क्रोष्टुकिरुवाच मरुतच्चरितंकृत्स्न
भगवन्कथितंत्वया तत्संततिमशेषेण श्रोतुमिच्छाप्रवर्त्तते तत्संततौयेक्षितिपाराज्याहीवीर्यशालिनः तान
हंश्रोतुमिच्छामित्वयाख्यातान्महामुने श्रीमार्कंडेयउवाच नरिष्यंतिइतिख्यातोमरुत्तस्याभवत्सुतः अष्टा
दशानांपुत्राणांज्येष्टः श्रेष्टः सएवच वर्षाणांतुसहस्राणांसप्ततिर्द्दशपंचच बुभुजेपृथिवीकृत्स्नांम
रुतः क्षत्रियर्षभ कृत्वाराज्यंसधर्मेणइष्ट्वायज्ञाननुत्तमां मरुतश्चसुतंश्रेष्टमभिषिंच्यययोवनं एकाग्र
चित्तः सन्तपस्तप्त्वातत्रतपोमहत् आरुरोहदिवंविप्रयशसाव्याप्तरोदसी नरिष्यंतः सुतंतस्यचिंतयामास
बुद्धिमान् । पितुर्वृत्तंसमालोक्यतथान्येषांचभूभृतां अत्रवंशेमहात्मानोराजानोममपूर्बजाः यज्वानो
धर्मतः पृथ्वींपालयामासपूर्वताः दातारश्चातिविख्यातानांसंग्रामेष्वानिवर्त्तिनः तेषांकिंचरितंशक्यमनुयातंम

हात्मनां किंतुतैयत्कृतंकर्म्मधर्मंचाहवशालिभिः तदहंकर्त्तुमिछामितच्चनास्तिकरोमिकिं धर्मतःपालतः
मार्कं पृथ्वीकोगुणोत्रमहीपतेः असम्यक्पालनात्पापोनरेंद्रोनरकंव्रजेत् सतिवित्तेमहायज्ञाःकर्त्तव्याएवभू
२९४ २९५ भुजा दातव्यंचात्रकिंचित्रंसीदतामीश्वरोगतिः आभिजात्यंतथालज्जाकोपश्चारिजनाश्रयः कारयेति
स्वधर्मोश्चसंग्रामादपलायनं एतत्सर्वंयथासम्यक्मत्पूर्वपुरुषैःकृतं पित्राचमेमरुत्तेनतथातत्केनश
क्यते तदसंकिंकरिष्यामियच्चतैःपूर्वजैःकृतं तेयज्विनांवरादांताः संग्रामाद्यानिवर्त्तिनः महासमरसंम
र्देषुविसंवादिपौरुषाः कर्मणाहंयतिष्यामिकस्मैताननतिसंधितुं अथवातैस्वयंयज्ञाःकृतासर्वजनेश्व
रैः अविश्रमद्भिर्नान्येनकारितास्तत्करोम्यहं श्रीमार्कंडेयउवाच इतिसंचिंत्ययज्ञंसचकारैकंनरेश्व
रः यादृशंनचकारान्योविन्नोत्सर्गोपशोभितं द्विजानांजीवनायालंदत्वासुसुमहाधनं ततःप्रातगु
णंतेषांयज्ञार्थमवदन्नृपः गावोवस्त्राण्यलंकारान्धान्यागारादिकंतथा प्रत्येकमददत्तेषांसर्वपृथ्वी
निवासिनां ततस्तेनयदायज्ञःप्रारब्धोभूभुजापुनः प्रारब्धमखपुण्यायैततोनालभतद्विजान् यान्यान् २९४
वृणोतिसनृपोविप्राणांत्विज्यकर्मणि तैचैनमूचुर्यज्ञायवयमन्यत्रदीक्षिताः अन्यंवरयपयद्वितंत्वया

294A

स्माकंविसर्जितं तस्यांतोनास्तियज्ञेषुतथातुन्रपतेर्थिनं श्रीमार्कंडेयउवाच नावापऋत्विजोविप्रान्यदाशेष
क्षितीश्वरः बहिर्वेद्यांतथादानंसदातुमुपचक्रमे तथापिजगृहुर्नैवधनंसंपूर्णमेदिराः द्विजायदातुभूयो
सौनिर्विन्नइदमब्रवीत् अहोनुशोभनंपृथ्व्यांद्विजोनाधनःक्वचित् अशोभनंचयत्कोषोविफलोयमया
र्ज्चेनः नार्त्विज्यंकुरुतेकश्चिद्यंजमानोखिलोजनः द्विजानांददतांदानंनतदासंप्रतीच्छते श्रीमार्कंडे
यउवाच ततःकांश्चिद्द्विजान्भक्त्याप्रणिपत्यपुनःपुनः सयज्ञेऋत्विजश्चक्रे तेस्यचक्रुर्महामखं
अत्यद्भुतमिदंचासीत्यज्ञेतस्यमहीपतेः सयज्ञोभूत्तदातस्ययजमानोऽखिलोजनः द्विजन्मनामभू
न्नासीत्सदस्यस्तस्यकश्चन यजमानाद्विजाःकेचित्केचित्तेषांचयाचकाः नरिष्यंतोनरपतिरियाज
सयदातदा तस्मिंदत्तैर्धनैर्यागांश्चक्रुःपृथ्व्यामशेषतः प्राच्यांकोट्यस्तुयज्ञानामासन्नष्टादशाधिका
प्रतीच्यांसप्तवैकोट्योदक्षिणस्यांचतुर्दश उत्तरस्यांचपंचाशद्दिक्कालेतदाभवन् एतेब्राह्मणय
ज्ञानांनरिष्यंतोयदायजत् एवंसराजाधर्मात्मानरिष्यंतोभवत्पुरा मरुत्ततनयोविप्रख्यातबलपौ
रुषः इतिश्रीमार्कंडेयपुराणेनरिष्यंतचरितंसमाप्तं १२२ श्रीमार्कंडेयउवाच नरिष्यंतस्यतनयो

दुष्टारिदमनो दमः सर्वलोकमनोहारि तस्य चित्रं मुनेरिव वाभ्रव्यामिंद्रसेनायां स जज्ञे तस्य भूभुजः नव वर्षाणि

मार्कं० २९५ 295 जठरे स्थितो मातुर्महायशाः तदग्राहयामास दमं मातरं जठरे स्थितः दमशीलश्च भविता यतश्चायं नृपात्म
जः ततस्त्रिकालविज्ञानसहितोऽस्य पुरोहितः दम इत्यकरोन्नाम नरिष्यंतुसुतस्य तु सदमो राजपुत्रस्तु
धनुर्वेदमशेषतः जगृहे सुरराज्यस्य सकाशाद्वृषपर्वणः दुंदुभेर्दैत्यपुत्रस्य तपोवननिवासिनः सकाशाज्ज
गृहे कृत्स्नमस्त्रग्रामं च तत्त्वतः शुक्रात्सकाशाद्वेदांश्च वेदांगान्यखिलानि च तथार्ष्टिषेणाद्राजर्षेर्जगृहे यो
गमात्मवान् तं सुरूपं महात्मानं गृहीतास्त्रं महाबलं स्वयंवरे कृता पित्रा जगृहे सुमना सती सुता दशार्णाधि
पतेर्बलिनश्चारुकर्मणः पश्यतां सर्वभूपानां ये तदर्थमुपागताः तस्यां च सानुरागोऽभून्मद्रराजस्य वै सुतः
सुमनायां महानंदो महाबलपराक्रमः तथा विदर्भाधिपतेः पुत्रः संक्रंदनस्य च वपुष्मान् राजराजस्य महाधनुरु
दारधीः ते तु यांतं वृतं दृष्ट्वा दुष्टारिदमनं दमं मंत्रयामास रन्योन्यं तत्रानंगविमोहिताः एतामस्य दमत्कन्यां गृ
हीत्वा रूपशालिनीं गृहान्त्वरात ततस्त्वेयमस्माकं यं ग्रहिष्यति भर्तृबुध्या वराहो हा स्वयंवरविधानतः तस्ये ह्रुपा २९५
नो भविता भार्या धर्मोपपादका अथेयं नेच्छते कंचिदस्माकं यं ग्रहिष्या मदरे द्धराग ततस्तस्य भवित्री सा यो

295A

दमं घातयिष्यति श्रीमार्कंडेय उवाच इतितेनिश्चयं कृत्वातंपार्थिवनंदनाः जगृहुस्तांसुचार्वंगीदमपा
र्श्वानुवर्त्तिनी अथकेचिन्नृपा तेषां येपक्षे तेपिचुक्रुधुः चुक्रुशुश्च यथापरेभूयाः केचिन्माध्यास्थितांगताः त
तोदमस्तान्नृपतीनवलोक्यसमं ततः अनाकुलमनावाक्यमिदमाहमहामुने दमउवाच भोभोभूपामया
प्राप्ताधर्मक्षेत्रस्वयंवरे अधर्मोयदियंदेवीवलिभिःगृह्यतेवलात् वलातवाथवाधर्मोपरेभिर्गृह्यतेवला
त् यदाधर्मोनमेकार्यमन्याभार्याभविष्यति धर्मेचतदलंप्राणोयेरक्षांति विलंघने ततोदशार्णाधिप
पतिःचारुवर्मानराधिपः निशाम्यकारयित्वातत्सदथाहमहामुने दमेनयदिदंप्रोक्तंधर्माधर्मास्थितंनृपाः
तदवध्यंयथाधर्मोममास्यचनलुप्यते श्रीमार्कंडेयउवाच ततःकेचिन्महीपालातमूचुर्वसुधाधिपं
परस्परानुरागेण गांधर्वोविहितोविधिः क्षत्रियाणांपरमयंनविट्शूद्रजन्मनां दममाश्रित्यानिष्पन्नो
सचास्यादुहितुस्तव इतिधर्मोदमस्यैषादुहितातवपार्थिव योन्यथामन्यतेमोहात्कामात्सप्रवर्त्तते अ
थापरेतदाप्राहुर्महात्मानोहिभूभृताः पक्षेयेभूभृतोविप्रदशार्णाधिपतेर्वचः मोहात्किमाहधर्मोयंगां
धर्वःक्षत्रजन्मनः नत्वेषएवधर्मोन्योराक्षसःसस्त्रजीविनां बलाधिकायोहरतिहत्वायसरिपंथिन त

स्यैवेनं राक्षसेन विवाहेनावनीश्वरः प्रधानतर एषोप्यत्र विवाह इति तये मतः क्षत्रियाणामतो धर्म महा
नेदादिभिः कृतं श्रीमार्कंडेय उवाच अथ प्रोचुर्पुनर्भूपायैष्पूर्वमुदितो नृपः परस्परानुरागेणापाति
धर्माश्रितं वचः सत्यं प्रशस्तो राक्षसोपि क्षत्रियाणां परो विधिः किंतु सौ जनकस्यैव कुर्यानुमतेव
रे हत्वानुपितृसंबंधबलेन क्रियते तु यः स राक्षसो विधिः प्रोक्तो नात्र भर्तृकरी स्थिति पश्यतां सर्वभू
तानां त्वनयांच हतो दमः गांधर्वोः सहितिष्मीन्नो विवाहो राक्षसोत्रकः विवाहितायां कन्यायां पु
नरन्यन्न विद्यते कन्यायाश्चाविवाहेन संबंधाट्धिवीश्वराः इतीमां यद्बलाद्देते दमाय दातुमुग्ध
ता विलिनस्तेयदि तितः कुर्वन्तु साधकवत् श्रीमार्कंडेय उवाच तच्छ्रुत्वा सौ दमः कोपकषाईक्ष
तलोचनः आरोपयामास धनुः वचनं चेदमब्रवीत् ममाद्यभार्यावलिभिः पश्यतो ह्रियते यदि तत्कुले
न भुजाभ्यां वा को गुणः क्लीवजन्मनः धिग्मांशस्त्राणि धिग्वीर्यं धिक्सौर्यं धिक्सरासनं धिग्मेदं कुले
जन्म मरुत्तस्य महात्मनः यदि भार्यां भिमे मूढाः समादाय बलान्विताः प्रयांति जीवितो धिग्मां ममव्यर्थं
मनुष्यता इत्युक्त्वा तां महीपालान् महानंदमुखान्वली अब्रवीत्स तदा सर्वान् महारिंदिमनो दमः ए २५६

296A

षानुष्ठोभनावालाचार्वंगीमदरेक्षणा किंतस्यजन्मनाभार्यानयस्येयंकुलोद्भवा इतिसंचिंत्यभूपाला

त्तथायतततसंयुगे यथानिर्जित्यमामेनांयत्नीकुरुतमानिनः इत्याभाष्यतथावीरादशरववर्षममुं

चत छादयन्पृथिवीपालान्तमसश्चमहारुहान् येपिवीरामहीपालाशरवृष्टिमुत्सृजान् अमूमु

चंस्तत्रयुक्तान्दमश्चिच्छेदलीलयान् तेपितत्रहितान्वाणांस्तेषांवासोशरोत्करान् चिच्छेदपृथिवी

शानांनरिष्यंतात्मजोमुने वर्त्तमानेतथायुद्धेदमस्याद्धितितिपात्मजैः प्रविवेशमहानंदःखड्गपाणिर्य

तोदमः महानंदःप्रचिच्छेदखड्गेनान्यानवंचयत् ततोरोषात्समाक्रम्यदमस्यरथकूबरं महानंदोमहावी

र्योदमेनयुयुधेसना वहुस्यैधायुध्यमानस्यमहानंदस्यलाघवात् दमोमुमोचहृदयेशरंकालानलप्रभं

तंलग्नमात्मनःकृष्णभिन्नेतेनततोहृदि दमंप्रतिसचिच्छे महानंदोसिमुज्वलं पतंतंचैवमुल्कामंशा

क्षाच्चिच्छेदतंदमः शिरोवेतिसपत्रेणमहानंदस्यचाच्छिनत् तस्मिन्हतेमहानंदेक्षोचुर्येनपराङ्मुखाः

वभूवुःपार्थिवास्तस्थौवपुष्मान्सनराधिपः दमेनयुयुधेचासौवलगर्वमदान्वितः दक्षिणात्यमहीपालत

नयोरणगोचरः युध्यमानस्यतस्योग्रंकरवालंसवैलघुः।चिच्छेदसारथेश्चैवशिरःसंख्येतथाध्वजं छिन्न

मार्कं॰
२९१
217

खड्गेगदांसोथजग्राहवरुकंटकं तामप्यस्यचचिच्छेदकरस्थानेवसत्वरः यावदन्यत्समादत्तेवपुष्मान्स्व
रायुधं तावत्क्षुरेणतंविध्यादमोभूपमावपातयन् सपातितस्ततोभूमौविक्लांगःसवेपथुः ।विनिर्दि
ष्टमतिर्युद्धायबभूवक्षितिपालजः नमालोक्यतथाभूतंतमयुद्धमतिमात्मवान् विसृज्यादायसु
मनांततस्तुप्रययौदमः ततोदशार्णाधिपतिःप्रीतिमान्नकरोत्तयोः दमस्यसुमानायाश्चविवाहंवि
धिपूर्वकं कृतदारोदमस्तत्रदशार्णाधिपतेःपुरे ।स्थित्वाल्पकालंप्रययौसभार्योनिजमंदिरं दशा
र्णाधिपतिश्चास्मैदत्वानागांस्तुरंगमान् रथांगाश्चखरोष्ट्राश्चदासीदासांस्तथाबहून् वस्त्रालंका
रचापादिवरप्रस्तरमासनं अन्यैस्तैश्चतथाभांडैःपरिपूर्णंविसर्जयन् इतिश्रीमार्कंडेयपुराणेद
मचरिते १२२ मार्कंडेयउवाच सतांलब्ध्वातथापत्नींसुमनांसुमहामुने प्रणानामपितुःपादौमातुश्चक्षि
तिपात्मजः साचतौश्चश्वशुरौसुभ्रूर्नाम्नासुमनातदा प्रणानामपितुःपादौमातुश्चक्षितिपात्मजः सा
ताभ्यांसमागतौविप्रआशीर्भिरभिनंदितौ महाजनोत्सवोजज्ञेनरिष्यंतस्यवैपुरे कृतदारेचसंप्राप्ते २९१
दशार्णाधिपतेःपुरे संबंधनंदशार्णोशंजितांश्चपृथिवीश्वरान् श्रुत्वापुत्रेणमुमुदेनरिष्यंतोमहीपतिः

सोऽपिरेमेसुमनयामहाराजसुतोदमः वनोद्यानवरोद्देशप्रासादगिरिसानुषु अथकालेनमहतारममा
णादमेनसा अवापगर्भंसुमनादशार्णाधिपतेःसुता सोऽपिराजानरिष्यंतोभुक्त्वाभोगान्महीपतिः वपुः
परिणतिंप्राप्यदमंराज्येऽभिषिच्यच वनंजगामेंद्रसेनापत्नीचास्ययशस्विनी वानप्रस्थविधानेनसत
त्रसमतिष्ठत दाक्षिणात्यःसुदुर्वृत्तःसंक्रंदनसुतोवने वपुष्मान्समृगान्हंतुययावल्पपदानुगः सतंद
ष्ट्वानरिष्यंतंतापसंरूपधारिणं इंद्रसेनांचतत्पत्नींतपसातिदुर्बलां यःपप्रछकस्त्वंभोविप्रःक्षत्रियोवावने
चरः वानप्रस्थमनुप्राप्तोवैश्योवाममकथ्यतां ततोमौनव्रतोभूपोनहितदुत्तरंददौ इंद्रसेनानुतत्साचमा
चष्टास्मैयथातथ्यं श्रीमार्कंडेयउवाच ज्ञात्वानुतंनरिष्यंतंवपुष्मान्पितरंरिपोः प्राप्तोसीतिवदन्कोपाज्ज
टापरिगृहस्यच हाहेतिचेंद्रसेनायावदंत्यावाष्पगद्गदं चकर्षकोशात्खड्गंचवाक्यंचेदमुवाचह निर्जितःस
मरेयेनयेनमेसुमनाहृता दमस्यचपितरंतस्यहन्मिरक्षतुतंदमः येनाखिलमहीपालतत्रकन्यार्थमागता
अवधूताघहन्निष्येपितरंतस्यदुर्मते यौवनेघस्त्ररूपेषुदर्पोयस्यदुरात्मनः सदमोधारयत्वेनंहन्मितस्यारि
पोर्गुरुं श्रीमार्कंडेयउवाच इत्युक्त्वासदुराचारोवपुष्मान्अवनीपतेः आक्रंदंत्यामिंद्रसेनायांशिरश्छिच्छे

दतस्यसः ततोधिकृतंमुनयोयेचान्येवनवासिनः तमूचुःसन्तुतेहत्वाजगामस्वपुरंमुने गतेतस्मिन्दितिष्व
मार्कं स्यसैंद्रसेनावपुष्मती प्रेषयामासपुत्रस्यसमीपंप्रूइतापसं गत्वागछाशुमेपुत्रंदमंब्रूहिवचोमम अभिज्ञोस्य
२५८ ।सिमेभर्त्तुर्वृत्तांतेप्रोच्यतेत्रिकिं तथावाक्यःसुपुत्रोमेयद्ब्रवीम्यतिदुःखिता लंघनामीदृशींप्राप्तां विलोक्ये
२१४ तांमहीपतिः भर्त्ताधिकृतोराज्येचतुर्णांपरिपालकः त्वमाश्रमाणांकिंयुक्तंतापसांन्यत्ररक्षसि भर्त्तारं
नरिष्यंतंतापसंतपसेस्थितं विलयंत्याघानाथोहन्यतेत्रतथाहतः आक्रुष्यकेशेषुवलादपराधंविनान्
पः हतोवपुष्मतेत्यारव्यंतद्इतितेभूपतिर्भवान् एवंकृतेयन्नक्षमंतेयथाधर्मोनलुप्यते तथाचरनवक्त
व्यंमितोहंतापसीयतः पिताहद्धितपस्वीचनापराधेनदूषितः निहतोयेनयत्तस्यकर्त्तव्यंतद्विचिंत्यतां सं
तितेमंत्रिणोधीरसर्बशास्त्रार्थकोविदाः तैसहालोच्ययत्कार्यमेवंभूतेकुरुष्वतत् नास्माकमधिकारो
स्तितापसानांनराधिपः कुरुष्वैतदितीछत्वं एवंभूपेतिभाषितुं विहूरस्यस्यजनकोयवनेनयथाहतः त
दापवनभूपस्यकुलंतेनविनाशितं जंभस्यासुरराजस्यपितादष्टोभुजंगमैः तेनाप्यखिलपातालेम २५८
स्मिनपन्नगाहताः पराशरणपितरंसक्तिंरक्षसाहतं श्रुत्वाग्नौपातितंसर्बराक्षसाणांचयत्कुलं अ

न्पस्यापि स्वपक्षस्य लंघना क्रियते द्विया ता नालं क्षत्रियः सोढुं किं पुनः पित्रमारणं नायं पिता ते निहतो न
स्मिन् छत्रे निपातितं त्वामेवात्र हहं मन्ये त्वपि शास्त्रं निपातितं वित्तत्पस्य हि कः सस्त्रं न्पस्तं येन वनौकसां तव भू
पस्य पुत्रस्य मा विभेतु विभेतु का तदेयं लंघनायुक्तं यदस्मिंस्तत् समाचर वयुष्मति महाराज सम्प्रतं ज्ञातवां
धवे इति संक्रान्तसंदेशामिन्द्रसेना विसर्ज्यतां पतिदेहमुपाश्लिष्य विवेशाग्निं मनस्विनी इति श्रीमार्क्कण्डेयपुरा
णे दमचरिते १२४ श्रीमार्क्कण्डेय उवाच इन्द्रसेना समाज्ञप्तः समागत्याथ इतापसः समाचष्टे यथाप्रोक्तं दमा
य निधनं पितुः श्रीमार्क्कण्डेय उवाच तापसेन समाख्याते दमस्तेन पितुर्वधे क्रोधेनातीव जज्वाल्य हविना
चाग्निरुद्यतः स तु क्रोधाग्निनावीरो दह्यमानो महामुने करं करेण निष्पिष्य वाक्यमेतदुवाच ह अनाथ इव
मे तातो मयि पुत्रेपि जीवति घातितः सुनृशंसेन परिभूय कुलं मम नापवादो जने न स्यादेषलक्षैर्व्यात् क्षमाम्य
हं दुर्वृत्तप्राणस्ताप्रिष्टानां पालने धिक्कृतावयं पितरं तथापि निहतं दृष्ट्वा जीवति प्रात्रनः तत्किमेतेन वक्तुना
तात तातेति जाल्पिते प्रलापेनात्र यत्कृत्यं तदेषोत्र करोम्यहं यद्यहं तस्य रक्तेन देहोत्थेन वयुष्मतः न क
रोमि गुरोस्तृप्तिं तत्प्ररेद्ध्येकुतशानं तच्छोणितेनोदककर्म तस्य मांसेषु सम्यक् द्विजभोजनं च कुर्या पितु

स्तस्यच पिंडदानंनचेत्सवत्साभिकृताशनंच साहायमस्यास्तुरदेवयक्षगंधर्वविद्याधरसंहताये कुर्वंति वेत्तानपिचास्त्र
मार्कं पूगैर्भस्मीकरोम्येषरुषामेताति ।तिः प्रूरमाधार्मिकमप्रशास्तंतदाद्धिराणात्पंसमरो।निहस्यभाद्ये ततोहं पृ
२९९ ।थिवीहिक्षत्त्वांवह्निप्रवद्याम्यनिहत्पतंवा दुर्म्मतिंतापसमृदसेविनंवनस्थगं साधुविधिंविद्ददग्धं हंता
२११ हमद्याखिलवंधमित्रपदातिहस्त्यश्वरथैसमेतं एषोहमादायधनुसरवङ्गीरथीतथैवारिवलंसमेत्यसमे
त्य करोमियत्तत्कदनंसमेतःपश्यंतुमेदेवगणाःसमस्ताः योयःसहायोभविताद्यतस्यमयासमेतस्यरणा
यभूयः तस्याशानिःशेषकुलक्षयायतमुद्यतोहं।निजवाजिसैन्यः यदिकुलिशधरोसौत्संयुगेदेवरा
जः पितृपतिरथचोग्रंदंडमुद्यम्यकोपात् धनपतिवरुणार्कोकरक्षितुं तंयतंते ।निशितशरवरौघैर्घतवि
ष्येतथापितिपि नियतमपरिदोषःकाननस्थंद्विलोकाः नियतितफलभक्षःसर्वभूतेषुमैत्रः प्रभवतिमपिपु
त्रेघातितोयेनतातः पिशितरुधिरतृप्तास्तस्यसंत्वद्यगस्ताध्रा श्रीमार्कंडेयउवाच इतप्रतिज्ञायतदानरि
ष्यंतसुतोदमः कोपामर्षातिताम्राक्षःश्मश्रुमावर्त्यपाणिना हाहतोस्मीतिपितरंध्यात्वादेवंविनिंद्यंच २९९
प्रोवाचमंत्रिणःसर्वान्नानिताय पुरोहितं दमउवाच यदत्रकृत्यंतन्नूतांपितुःप्राप्तेसुरालयं श्रुतेभ

२११A

वह्नियत्नोक्तं तेनसूद्रतपस्विना इत्युक्तः तपस्वीसन्नृपोवानप्रस्थव्रतेस्थितः मौनव्रतधरः शान्तोमन्त्रिमात्राचेंद्र
सेनया प्रोक्तः सानुदृष्ट्यति यथातथ्यं वपुष्मते तेनापिरवङ्गमाकृष्य जटांमध्ये नपाणिना कृत्वाजघानदु
ष्टात्मालोकनाथमनाथवत् मातापितंचसंदिश्यपधिक् शाङ्गं ब्रुवतांसतं मंदभाग्यं गतास्त्रीकंप्रातिष्ठाहव्य
वाहनं समालिंगनरिष्यंतंप्रयातात्रिदिवालयं सोहमद्यकरिष्यामियन्मात्रामेऽदाहृतं हस्त्यश्वरथपादा
त्यंसैन्यंचपरिकल्पतां अनिर्यात्यपितुर्वैरमहत्वापितृघातकं वचनंनकृत्वामातुर्जीवितुंकिमिहो
त्सहे श्रीमार्कंडेय उवाच मंत्रिणस्तद्वचश्रुत्वाहाहेत्युक्त्वातथावनंत् कृतवंतोविमनसः समेत्य
बलवाहनाः निर्ययुःसपरीवारा पुरस्कृत्यदमंनृप गृहीत्वानानाशिषोविप्रान् तत्कालज्ञान्पुरोधसः अ
हिराडिवनिश्वसन्दमः प्रायाद्वपुष्मतां सीमापालादिसमंतान्निघ्नन्याम्यादिशांत्वरन् निरीक्ष्यतंसमा
यांतंवपुष्मानमर्षपूरितः संक्रदनसुतेनापिदमोज्ञातोवपुष्मता आयातःसपरोवीरःसमात्यःसपरिछ
दः अकंपितेनमनसास्वसैन्यानादिदेशह दूतंचप्रेषयामासनिर्गम्यनगराद्वहिः त्वंशीघ्रतरमा
गच्छनरिष्यंतःप्रतीक्षते सभार्यःक्षत्रबंधोस्त्वंसहयाहियमांतिकं एतेमद्बाहुनिर्मुक्ताःपीतावाणा

मार्क॰ शिलाशितः शित्वाशरीरंसंग्रामेयास्यंतिरुधिरंतव श्रुत्वादमस्ततःसर्वंदूतप्रोक्तंयथोत्तरन् स्मृत्वाच
२०० तज्ज्ञानिःश्वसन्भुजगोयथा आहूयसमरेचैनंपुमांसोनविकल्पनाः ततोयुद्धमतीवासीद्दमस्यचवपुष्मता
300 रथाश्वरथिनानागोहस्तिनाहयपिताहयी अयूयजंतिविप्रर्षेसयुद्धस्तुमलोभवत् पश्यतांसर्वदेवानांसि
द्धगंधर्वयक्षिणां चकर्पेसुबधाब्रह्मन्युद्धमानेदमेक्रुधा नागाज्ञोनरथीनप्रवस्तस्यवाणासहस्त्रयः ततो
दमेनयुयुधेसेनाध्यक्षोवपुष्मतः हृदिविव्याधचधमक्रपुत्ताःशाघमांतिकं तस्मिन्नियतिसैन्यंचपलाय
नपरंवभौ सस्वामिकंततःप्राहदमःश्रांतुदमस्तथा क्षपार्द्दिंदुष्टपितरंघातयित्वातपस्विनं अश
स्त्रंचतपस्यंतंक्षत्रियोसिनिवर्त्यतां ततोनिवर्त्यसदमंयोधयामाससानुजः सपुत्रःसहसावंधि
वांधवैर्युयुधेरथी ततोशरशरानाम्मुक्तः वाणौर्व्यापनभोदिशः दमंचसरथंसाश्वंवाणजालैसम
र्पयत् ततःपितृवधोत्थेनकोपेनसदमस्तदा चिच्छेदतान्शरांस्तेषांविवधांगेषुतानपि एकेनैके
नवाणेनसप्तपुत्रान्स्तथान्जान् संवंधिनस्तथामित्रान्तान्ननयद्यमसादनं वपुष्मान्सरथोक्रो २००
धानिहतात्मजवांधवः युयुधेयदमेनाजौशरैराशीविषोपमैः चिच्छेदतस्यतान्वाणान्सधास्यचम

30

नापुत्रस्यसंवादं तथाष्टष्टिंस्वयंभुवा तथामनूनामुत्पत्तिंराज्ञांवाचरितंमुने अस्माभिरेक्तिंतत्रोक्तंमेकिम
...ल्लुमिच्छसि एतान्सर्वान्नरःश्रुत्वापठतेवासभासुच विधूपसर्वपापानिब्रह्मणोतेलयंब्रजेत् जैमिनि
... भारतेनानवद्यन्मेसंदेहःस्फोटनंद्विजः तद्भवद्भिःकृतंपत्रकश्चिदद्यकरिष्यति यूयंदीर्घायुषा
नुसप्शापकरिनिकृत पित्रशापकृताद्दुःखादौर्मनस्यंव्ययेयनुः एतावपुत्रावंचनंसजगाममहामुनि
श्रुत्वाप्रमुदितव्यासोपक्षिणांवाक्यमीरितं एतत्पुराणमखिलंवेदार्थैरुपबृंहितं धर्मशास्त्रैकति
ं श्रुत्वासर्वार्थमाप्नुयात् श्रुत्वापुराणमखिलंव्यासंसंपूजयेद्बुधः धर्मार्थकाममोक्षाणांयथोक्तं
...हेतवे इतिश्रीमार्कंडेयपुराणेदमचरितंसमाप्तं अवजानातिजन्मानिसप्तमूर्खश्चजायते पयमा
...वाज्ञातेसाधकाभिःशास्त्रेणन्नमे श्रुत्वाचपूजयेद्यस्तुपुराणंसप्तमंपुनः सर्वपापविनिर्मुक्तोपुना
...वनिजंकुलं पूतात्माधनवर्याश्चब्रह्मलोकंसनातनं पुनःसप्तमनुर्यावद्भुक्त्वाभोगान्यथेप्सितान्
पृथिव्यामेकराड्भूत्वापरंयोगमवाप्नुयात् इदंधर्मरहस्यंचगोपनीयंप्रयत्नतः नास्तिकायनदातव्यं २०१
वृषादिप्रभविघ्नवे गुरुद्विजातिगोवेदान्तथाभग्नव्रतेषपि मातापित्रोस्तथातीर्थवेदशास्त्रादिनि

300A

मार्कं० ३००

300

हामुने युयुधातेतिसंरब्धौपरस्परवधैषिणौ परस्परशराघातविच्छिन्नधनुषौत्वरन् गृहीतखड्गावुत्तीर्य
विक्रीडातेमहाबलौ दमः क्रुद्धान्नृपंध्यात्वापितरंनिहतंवने केशेषाचाक्रम्यनिपात्यधरणीतले शिरोधरा
[illegible]पादानुभुजमुद्यम्यचाब्रवीत् पश्यंतदेवताःसर्वामानुषासिद्धपन्नगाः पाद्यमानंहिहृदयंक्रूरस्यवंधोर्व
द्धिः
दमेन[illegible]ः एवमुक्त्वापिचदमोहृदयंस्फोट्यवासिना स्नातुकामससुरैःकृतयेननिवारितः ततश्चकारत
नप[illegible]रक्तेनेवोदकक्रियां अन्यरण्यंप्राप्यसपितुःपुनःप्रायात्स्वकंपुरं वपुष्मंतश्चमांसेनपिंडदानंचकार
ह ब्राह्मणान्भोजयामासरक्तकुलसमुद्भवान् एवंविधाहिराजानोवभूवुःसूर्यवंशजाः अन्येपिसुधि
[illegible]ः शूराःज्ञात्वानोधर्मकोविदः वेदांतपारगास्तांश्चनसंख्यातुमिहोत्सहे एतेषांचरितंश्रुत्वानरःपा
व
[illegible]मुच्यते इतिश्रीमार्कंडेयपुराणेदमचरितेवपुष्मंतवधः १२५ पक्षिणऊचुः एवमुक्त्वामुनेर्वाक्यमा
दि
[illegible]मेमहामुनिः विष्टश्यक्रोष्टुकिंचापिचक्रेमध्याह्नकींक्रियां अस्माभिश्चश्रुतंतस्माद्यत्तेप्रोक्तंमहा
नवार
अनादिसिद्धमेतद्धिपुराणोक्तंस्वयंभुवा मार्कंडेयायमुनयेतदुक्तंकथितंवचः पुण्यंपवित्रमायुष्य
सर्वकामार्थसिधिदं पठतांश्रुण्वतांचापिसर्वपापप्रमोचनं आदावेवकृतायेचप्रश्नायचतुरस्त्वया पि

301A

दके भिन्नमर्यादिने चैव तथा वेदातिलोचके मातापित्रोस्तथा तीर्थवेदशास्त्रार्थनिंदके भिन्नमर्यादि
चैव एतेषां नैव दातव्यं श्रुणोः कंठगतैरपि लोभाद्वा यदि वा स्नेहात् भया द्वापि विशेषतः पते द्वाणवये ध
पि स गच्छेन्नरकं ध्रुवं पुराणस्यास्य संख्या च कथिता तत्वबुद्धिना श्लोकानां षट्सहस्राणि तथा चाष्ट
शतानि च श्लोकाश्चन्निनवाशीतिएकादमसमाहितः कथितं मुनिना पूर्वं मार्कंडेयेन धीमता पुण्यपवित्रा पुण्या
च समाप्ता धर्मसंहिता इति श्रीमार्कंडेयपुराणे महिमा समाप्ता मार्कंडेजैमिनिसमागमः। प्रस्ताख्यानं। दुर्वासापु
ष्पश्रापः। कंकवधः। विध्नूपवधः। तार्क्ष्यजन्मः। मंदयालोपाख्यानं। तस्या विवाहः। धर्मिपक्षिणोत्पत्तिः। प्रश्नमोक्षः
। हरिश्चंद्रोपाख्यानं। वशिष्ठविश्वामित्रयोर्युद्धं। पितापुत्रसंवादः। नरकवर्णनं। दत्तात्रेयोत्पत्तिः। कुवलयाश्व[illegible]म
दालसाप्राप्तिः। अलर्कादिजन्मः। आचाराध्यायः। श्राद्धविधिः। योगस्थितिः। मन्वंतरकथा। दुःसहोत्पत्तिः। [illegible]बू
द्वीपवर्णनं। कूर्मनिवेशनं। वर्षवर्णनं। ब्राह्मणाचर्या। तामसं रैवतं। चाक्षुषं वैवस्वतं। सूर्यसावर्णिका[illegible]देवी
माहात्म्यं। महिषासुरवधः। देव्यास्तोत्रं। शुंभनिशुंभवधः। पितृस्तोत्रं। अग्निस्तवः। राजवर्द्धनोपाख्यानं। राज्य
वर्द्धनप्रशंसनं। वंशानुक्रमणं। नाभागाख्यानं। खनित्रचरितं। क्षुपचरितं। विविंशतिचरितं। वत्सध्रीचरितं॥

मार्कं
२००
२

विविंशतिचरितं।वत्सश्रीचरितं।करंधमचरितं।अविक्षिच्चरितं।मरुत्तचरितं नरिष्यंतचरितं दमिचरितं चेति इति श्रीमार्कंडेयपुराणस्यानुक्रमणिका संपूर्णा॥ संवत् १७६२ मंघरवदि ८ सोमवासरे

302

17